CC-0. In Public Domain. Digitization by eGangotri

४७४२— ४७४२

Almira-1
Shelf-4
14

9606

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नं० ४१४९

लक्ष्मणि । इमा

॥ अथसिंहव्याघ्रसहिताजागदीशीपञ्चलक्षणीप्रारभ्यते ॥

अथसिंहव्याघ्रसहिताजागदीशीपञ्चलक्षणीप्रारभ्यते

CC-0. In Public Domain. Digitization by eGangotri

पं.जा. १

श्रीगणेशायनमः॥ समारब्धेति॥ समारब्धंयदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतंयद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः। तथाच प्रामाण्यव्यवह
स्यायनोपोद्घातसंगत्या व्याप्तिस्वरूपनिरूपणमिति भावः। अव्याप्यवृत्तीति। कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरित्यर्थः। वृक्षत्व येन रूपेण येन सम्बन्धेन च साध्यत्वं तदव
च्छिन्नप्रतियोगिताकसाध्याभावस्य प्रवेशमादाय। अन्यथा तु व्याप्यवृत्तिसाध्यकस्थलेऽपि विशिष्टाभावादिकमादाय दोषो बोध्यः। अव्याप्यवृत्तिसाध्यके व्याकाशादिहेताव व्याप्त्यभा
वादाह॥ सद्धेतावितिं॥ वृत्तिमद्धेतावित्यर्थः। ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात्। नचावृत्तित्वेन समसा
ध्यवद्भिन्नस्यान्वयाविवक्षणात्साध्याभाववता सममेव तादात्म्येनान्वयविवक्षणान्न वैयर्थ्यमिति वाच्यम्। तथासति। साध्यवद्भिन्नात्मकोयोमनुवर्थः। संबंधी तदवृत्तित्वस्यैव स
म्यक्त्वेन साध्याभावपदव्यर्थताध्रौव्यात् अतः सप्तमीसमासंसमर्थयन्व्याचष्टे॥ साध्यवद्भिन्न इति॥ तथाच साध्यवद्भिन्नस्यावृत्तावनन्वयापाद्यथासन्निवेशेन वैयर्थ्यम्। साध्याभा
वे साध्यवद्भिन्नवृत्तित्वविशेषणं त्वव्याप्यवृत्तिसाध्यकसंग्रहार्थमेवेत्याशयः साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति धूमादेः सत्वादव्याप्तिरसम्भवो वास्यात्॥ अतः साध्याभावेति॥ न

॥ समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते न त्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्य
वृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह साध्यवद्भिन्नेति। साध्यवद्भिन्ने यः साध्याभाववत्तद्वृत्तित्वमित्यर्थः। कर्मादौ संयोगाद्यभावस्य। ॥ वृक्षकपिसंयोगी एतद्वृक्षत्वादि
त्यादेः संग्रहार्थमधिकरणभेदेनाभावभेदमादायैवलक्षणमिदं कार्यं तथाच साध्यवद्भिन्ने योऽभावस्तद्वृत्तित्वमित्यस्यैव सम्यक्त्वात्साध्यपदं व्यर्थमिति वाच्यं प्रतियोगितासंसर्गेण साध्यीय
त्वेनैव साध्याभावस्य प्रवेशः नत्वभावत्वेनापीति तद्धि पर्यशंकानवकाशात्। वस्तुतस्तु स्वप्रतियोगितावच्छेदकसंसर्गेण साध्यवद्भिन्ने वर्त्ततेयः साध्यतावच्छेदकसंबंधेन साध्यीयोऽभा
वस्तद्वृत्तित्वमर्थः। तथाच साध्यतावच्छेदकसंबंधेन साध्यीयत्वार्थकस्य साध्यपदस्यानुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसंसर्गेण वह्न्यादिमतोऽन्यस्मिन्पर्वतादौ व
र्त्ततेयः समवायसंबंधाद्यवच्छिन्नवह्न्यभावस्तद्वृत्ति धूमादेः सत्वादव्याप्तिः स्यादतस्तदुपात्तमिति नव्याः केचित्तु व्याप्यवृत्तित्वाऽव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासात्संयोगाद्यभावस्यै
वद्रव्यगुणाधिकरणभेदेन भेदेन तु गगनाद्यभावस्यापि मानाभावात्। तथाच साध्यवद्भिन्न गगनाद्यभाववति धूमादेः सत्वादव्याप्तिरतः साध्यपदमित्याहुः। तन्मंदं गुणे गगनाद्यभावे गुणत्वादिसा
मानाधिकरण्यं न तु द्रव्ये गगनाद्यभावे तथात्वमित्यादिप्रतीत्या गुणत्वसामानाधिकरण्यतदभावयोर्विरुद्धधर्मयोः संभवादित्यादिक्। नच घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान्
गगनत्वादित्यत्राव्याप्तिः साध्यवद्भिन्ने घटे वर्त्तमानस्य गगनादिसंयोगात्मकस्य साध्याभावस्याधिकरणे गगनत्वहेतोः सत्वादिति वाच्यम्। अभावाभावस्यातिरिक्तनामते एवैतल्लक्षणकर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं० ४९५२

भिन्नत्वइति। द्रव्यनिष्ठसंयोगाभाववतो भिन्नत्वेत्यर्थः मानाभावादिति। तथाचात्राव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरितिभावः॥ हेतोरिति। नचसाध्यवत्प्रतियोगिताकान्योन्याभावस्यकेवलान्वयित्वादसंभवएवचकुसुमितोनाव्याप्तिरितिवाच्यं। वन्हिमान्गगनादित्यत्रगगनादिहेतौलक्षणसंभवात्। तस्यापिसद्धेतुतयास्वयंवक्ष्यमाणत्वादितिभावः साध्यपदस्यसिद्धिकर्मेतत्तद्व्यक्तिपरतयातत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यरूपपर्यवसितार्थस्य द्रव्यंपृथिवीत्वादित्यादावेवलक्षणसंभवाद्गन्धवती पृथिवीत्वादित्यादावव्याप्तिर्न्निकथनमित्यपि वदंति ननुसकलस्यसाध्यप्रतियोगिकाभावस्याधिकरणाप्रसिध्याव्यभिचारिण्यतिव्याप्तिवारणार्थंयदिसाध्याभावस्यविशेषणसाकल्यंतदा वन्हिमान्धूमादित्यादिसद्धेतावव्याप्तिः तत्रापितत्तद्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्यतत्तत्पक्षवृत्तित्वावच्छिन्नाभावरूपस्यवासाध्यप्रतियोगिकाभावस्तोमस्याधिकरणाप्रसिद्धेरतआह साकल्यंसाध्याभाववतीतितथाचसाकल्यंनसाध्याभावविशेषणमतोनाऽप्रसिद्धिरितिभावः नन्वेवमपिसाध्याभाववन्निखिलांतर्गते महानसादौवर्त्तमानस्याभावस्यप्रतियोगित्वंधूमादौनास्तीत्यव्याप्तिनादवस्थ्यमतआह। साध्येचेति। तथाचसपक्षोमहानसादिः नसकलसाध्यस्याभाववानद्वत्यदोषः प्रांचस्तुव्यभि

भिन्नत्वेमानाभावादाहसाध्यवदिति हेतोःसाध्यवत्पक्षभिन्नदृष्टांतवृत्ति तेनाव्याप्तेराहसकलेति साकल्यंसाध्याभाववतिसाध्येचबोध्यं साध्याभावोवासाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोग्राह्यः तेनविपक्षैकदेशनिष्ठाभावप्रतियोगिनिव्यभिचारिणि नातिव्याप्तिः नवानानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः॥

चारिण्यतिव्याप्तिवारणार्थंसाध्याभाववतियावत्वविशेषणेदत्तेएवसाध्येयावत्त्वमव्याप्तिवारकतयासार्थकंभवतीत्यतः साध्याभाववत्येवसाकल्यंप्राक्योजयंतिसाकल्यमित्यादिनेत्यवतारयंति तन्मंदं साध्याभाववतिसाकल्यानुक्तावप्यतिव्याप्तिवारकतयैवसाध्येसाकल्यविशेषणस्यप्रथमतःसार्थक्यसंभवात्। अन्यथागगनावृत्तिधर्मवान्द्रव्यत्वादित्यादौपटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिनिद्रव्यत्वादावतिप्रसंगादितिध्येयं ननुसाध्यवत्यपिद्वित्वाद्यवच्छिन्नप्रतियोगिताकस्यसकलसाध्यप्रतियोगिताकाभावस्यसत्वादसंभवः किंचसकलपदोत्तरसाध्यनाम्नासकलसाध्यप्रतियोगिताकाभाववतोनुपस्थापनात्तेनसमस्तकलपदस्यकर्मधारयोप्यनुपपन्नइत्यतआहसाध्याभावोवेति। तथाचसाध्याभाववत्येवसाकल्यंदेयंनतुसाध्येपीतिभावः साध्याभाववतिसाकल्यप्रयोजनमाह तेनेति। विपक्षैकदेशः कश्चिद्विपक्षः साध्यनिष्ठसाकल्यस्यसाध्यतावच्छेदकावच्छिन्नाभावस्यचविवक्षायाः फलमाह। नवेति। एकव्यक्तिसाध्यकेसकलसाध्योक्तावप्यतिरेकस्यास्वतीसाशयेन नानेत्युक्तम्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पं·जा अव्याप्यवृत्तीति। कपिसंयोग्येतत्वादित्यादावित्यर्थः यद्यप्यग्रे हेत्वभावस्यापिप्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीय इत्यव्याप्यवृत्ति हेतावप्यव्याप्तिसंभव
२ त्ति। तथापि यथाश्रुतमूलस्य न तत्राव्याप्तिरित्यावेदयितुं व्याप्यवृत्ति हेतूक्तिः। व्यभिचारिणीति। एतद्वृक्षत्ववान् कपिसंयोगादित्यादावित्यर्थः। अभावद्वयइति। साध्याभावे हेत्व
भावेच्चेत्यर्थः। अत्र च साध्याभावेप्रतियोगिवैयधिकरण्यं साध्यताघटकसम्बन्धेन प्रतियोगिनो यद्नधिकरणं तद्वृत्तित्वं तेन धूमाद्यभाववतोप्ययः पिंडादेः कालादिसंबन्धेन धूमा
दिमत्वेपिनातिव्याप्तिः हेत्वभावेप्रतियोगिवैयधिकरण्यं तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटितं वाच्यं तेनायमात्मा ज्ञानादित्यादौ साध्याभाववतो
घटादेर्विषयतया हेत्वभावप्रतियोगिमत्वेपिनाव्याप्तिः। हेत्वभावोपीति। अपिना साध्याभावसमुच्चयस्तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः। यद्यपि साध्याभावोपी
त्येवक्रमानुरोधाद्वक्तुमुचितं अपिशब्दादेव हेत्वभावस्य लाभसंभवात्। तथापि तत्प्रतियोगित्वं चेत्यग्रेतनतत्पदेन निर्दिष्टहेत्वभावपरामर्शासंभवाद्धेत्वभावप्रतियोगित्वं चेत्य
भिधाने च ग्रंथगौरवंस्यादितीत्थमभिधानम्। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति प्रतियोगिपदं प्रतियोगितावच्छेदकताघटकसंबन्धेनावच्छेदकस्य वैशिष्ट्यलाभ

अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसत्वेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणायाभावद्वयेप्रतियोगिवैयधिकरणत्वं बोध्यं हेत्वभावोपि प्रतियोगि
तावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यं तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः॥ ११ एतेन ह्रदादौ कालिकादिसंबंधे

न धूमत्वाद्यवच्छिन्नस्य काष्ठादेः संयोगसंबंधेन सत्वेपि नाव्याप्तिः तत्प्रतियोगित्वं हेत्वभावप्रतियोगित्वं हेतुतावच्छेदकरूपेणेति हेतुतावच्छेदकसम्बन्धेनेत्यपि बोध्यम् तेनात्मभि
न्नं द्रव्यत्वादित्यादौ साध्याभाववत्यात्मनि वर्त्तमानस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणस्य कालिकादिसंबंधावच्छिन्नद्रव्यत्वत्वावच्छिन्नाभावस्य प्रतियोगित्वेपि
द्रव्यत्वस्य नातिव्याप्तिः नच हेतुतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्योक्त्यैवातिव्याप्तिवारणसंभवात्। हेतुतावच्छेदकसंबंधेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यं तथा सति
निर्धूमत्वव्याप्यवान् निर्वन्हित्वादित्यादौ निर्वन्हित्वभेदमादायैव लक्षणसम्भवे निर्धूमत्वव्याप्येत्याद्युत्तरग्रंथे वक्ष्यमाणाव्याप्त्यलग्नकतापत्तेरिति ध्येयं हेत्वभावेपि प्रतियोगिताव
च्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यविवक्षायाः फलमाह। तेन द्रव्यत्वादाविति। अन्यथा साध्याभाववति गुणादौ विशिष्टसत्ताभावस्य सत्तारूपप्रतियोगिसमानाधिकरण
त्वादव्याप्तिरेवस्यादिति भावः अत्र द्रव्यत्वस्य साध्यतायां सकलसाध्यप्रसिद्ध्याऽव्याप्तेरुक्तविवक्षयाप्यप्रतीकारादादिपदं तेन गुणवत्वादिसाध्यस्योपसंग्रहः द्रव्येतरासम राम
वेतमात्रं वा प्रकृते द्रव्यत्वमिति ध्येयं ॥ ॥ ॥ ॥ ॥ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुतावच्छेदकरूपेण हेत्वभावप्रतियोगित्वविवक्षायाः फलमाह। नवेति। सत्वादाविति द्रव्यत्वादौ साध्ये ——— इत्यनुवर्त्तते। यत्रैकव्यक्तिकमिति। तथा च द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः तत्र सकलसाध्याप्रसिद्धेरित्यर्थः नन्वितो व्यस्तस्सात्साध्यसामान्याभावस्यैव निवेशितत्वात्साध्ये साकल्यं न देयमेवेत्यत आह। विपक्षो वेति। एकव्यक्तिकमित्यनुषज्यते। तथा च यत्रैकव्यक्तिरेव साध्याभाववती तत्र गगनावृत्तिधर्मवान् गगनान्यत्वादित्यादावव्याप्तिः साध्याभाववतः साकल्याप्रसिद्धेरित्यर्थः। ननु साध्यद्विभेदेन व्याप्तेर्भेदाद्यत्रैकएव विपक्षस्तत्र त्यलक्षणे साध्याभाववति साकल्यविशेषणं न देयमशेषत्वरूपं वा साकल्यं निवेश्यमतो दोषांतरमाह। निर्धूमत्वव्याप्य इति। निर्धूमत्वस्य साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गतार्थता स्यादतो व्याप्यपर्यंतं निर्धूमत्वव्याप्यस्यापि स्नेहादेः स्नेहत्वादिना साध्यत्वेव ह्न्यभावस्य व्यभिचारित्वादसंग्रहीने दोषायेत्यत उक्तम्। तत्वेन साध्ये इति। निर्धूमत्वव्याप्यत्वेन साध्य इत्यर्थः। प्रत्येकमिति। तथा च हेत्वभावस्य महानसीयवह्नेः साध्याभाववत्सकलांतर्गतपर्वताद्यवृत्तित्वादव्याप्तिरितिभावः अत्र निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं निरुक्तवैयधिकरण्यावच्छिन्नयद्धर्मावच्छिन्नाभाववत्वं तद्धर्मवत्वं व्याप्तिरित्युक्तौ तु

नवा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्ताद्यावतिप्रसंगः यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्यतत्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिः तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह साध्यवदिति अत्रान्योन्याभावस्य साध्यवत्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिव लभ्यं ॰
न हि भवति नीलो घटो घटान्य इति { नैष दोष इति ध्येयं। ननु साध्यवत्प्रतियोगिकान्य[illegible]स्य धूमादिमति सत्वादव्याप्तिरत आह। अत्रेति। तथा च साध्यवत्पदेन निरूढलक्षणयोपस्थापितस्य साध्यतावच्छेदकविशिष्टसाध्यवत्वावच्छिन्नप्रतियोगिताकस्यान्यपदार्थैकदेशेऽन्यत्वे तादात्म्येनान्वयात्साध्यवति च विशिष्टसाध्यवत्वावच्छिन्नप्रतियोगिताकभेदासत्वान्नाव्याप्तिः गुरुधर्मस्यावच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टद्रव्यत्वावच्छिन्नभेदाप्रसिद्ध्यानाव्याप्तिरिति भावः। यद्धर्मविशिष्टबोधकपदसमभिव्याहृतेनान्यादिपदेनोपस्थापितेऽन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येनान्वयो न तु तद्धर्माश्रयप्रतियोगिताकत्वेनेत्यत्र व्युत्पत्तौ प्रमाणमाह॥ नहीति॥ तथा च तादृशव्युत्पत्त्यस्वीकारे नीलघटे घटप्रतियोगिकभेदसत्वान्नीलो घटो घटान्य इत्यपि व्यवहारः स्यादिति भावः अत्र च द्रव्यं घटान्यदित्याद्यप्रयोगात्तद्धर्मनिष्ठप्रतियोगिताकत्वेनान्यादिपदेन भेदो बोध्यते तद्वृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वात् तत एव घटो घटान्य इत्युच्चारणसंभवात् नीलघटत्वस्यानुयोगितावच्छेदकत्वपर्यंतानुधावनमिति मंतव्यं नीलो घटो घटान्य इत्येव सम्यक् पाठः तथैव प्रकृतोपयोगित्वसंगतेः घटादन्य इति पाठस्तु साध्यवदन्येत्यत्र पंचमीसमासे लुप्तविभक्तिस्मारितप्रतियोगित्वेप्रकृ

x तत्त्वेति यन्निष्ठप्रतियोगिताकत्वादेः स्वेत्यर्थः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पं·जा त्यर्थे तावच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमावश्यकमित्यवगमनीयः घटः पटो नेत्यादौ तु पटपदं तदन्यार्थपरमेव ननु प्रकृते तद्वत्पटत्वावच्छिन्नप्रतियोगिताकपरं निपा
३ तातिरिक्तस्य स्थले एव नामार्थयोरभेदातिरिक्तान्वयाव्युत्पन्नतया नञोपस्थापिते भेदे पटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटस्यान्वयसंभवात्। पटत्वावच्छिन्नप्रतियोगिताक
त्वं तु पटत्वमवच्छिन्नत्वं प्रतियोगित्वं चेति त्रितयमेव विशेष्यविशेषणभावापन्नं संसर्गः ननु वस्तुगत्या पटत्वावच्छिन्नं प्रतियोगित्वं तन्मात्रं पटो नेत्यत्र पटत्वावच्छिन्नत्वस्या
प्यनुभवसिद्धत्वात् अन्यथा प्रतियोगितावच्छेदकव्यक्तिभिरेव तत्तद्विशिष्टबुद्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यात् मानाभावात् अतएव केवलान्वयिग्रन्थे वह्निर्नास्तीत्यत्र व
ह्नित्वं तदवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्यादया भासत इति स्वयमप्युक्तं इत्थमेव च प्रमेयं नास्ति कंबुग्रीवादिमान्नास्तीत्यादिशाब्दबोधानां संसर्गकोटावेव प्रतियोगिता
यां प्रमेयत्वावच्छिन्नत्वावगाहितया भ्रमत्वं संसर्गप्रकारसाधारणविशेष्यविशेषणभावस्यैव भ्रमत्वघटकत्वात् अन्यथा स्वरूपसम्बन्धेन प्रमेयत्वाद्यवच्छिन्नप्रतियोगित्व
स्यालीकतया खण्डतत्सम्बन्धेन प्रमेयस्याभावे धर्मिण्यन्वयासंभवेन भ्रमत्वानुपपत्तेः सदुपरागेणाप्यसतः संसर्गमर्यादया भानस्यानंगीकारात् क्लृप्तेन पटत्वावच्छिन्नप्र
तियोगित्वसंबन्धेन चाभावे प्रमेयस्य सत्वेन तादृशसम्बन्धेन भ्रमत्वस्य वक्तुमशक्यत्वात् पटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वा
दिविशिष्टस्यान्वये निराकांक्षत्वाच्च। अन्यथा घटवत्यपि घटो नास्तीत्यादेः प्रमाणत्वापत्तेः तत्तद्घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्र सं
त्वात् एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्तात्वावच्छिन्नस्य समवायेनासत्त्ववत् घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन घटत्वावच्छिन्नवत्यपि घटाद्यभावस्य न तादृ
शसंबन्धेन प्रमेयत्वावच्छिन्नवत्त्वमतः प्रमेयं नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वावच्छिन्नस्यैवाभावांशे भ्रमत्वमित्यपि प्रत्युक्तं घटत्वादेरन्वयितानव
च्छेदकतया तदवच्छिन्नप्रतियोगितासम्बन्धेन प्रमेयत्वविशिष्टस्यान्वये निराकांक्षतया तथाशाब्दस्यासंभवादिति ध्येयम्। नीलो घटो नास्तीत्यादौ तु नीलघटत्वस्यान्वयिताव
च्छेदकत्वेन तादृशधर्मावच्छिन्नप्रतियोगित्वमेव संसर्गो न तु नीलत्वघटत्वादिप्रत्येकावच्छिन्नप्रतियोगित्वं नीलपटस्य पीतघटस्य वाधिकरणे तादृशप्रयोगापत्तेः नीलोप
लक्षितस्य घटत्वमात्रस्यान्वयितावच्छेदकत्वे तु घटत्वावच्छिन्नप्रतियोगित्वमेव तथा संयोगेन घटो नास्तीत्यादौ तु तृतीयाविभक्तेरवच्छिन्नत्वमर्थः संसर्गीभूतप्रतियोगितायां त
दन्वयासंभवात् किंत्ववच्छिन्नप्रतियोगिताकत्वं प्रतियोगित्वमात्रं वावच्छिन्नत्वसंसर्गेण संयोगादेः तत्रान्वयादेव विशिष्टलाभसंभवात् न चैवं संयोगेन घटाभावस्यैव समवाये
न घटविशिष्टद्रव्यत्वाभावतया समवायेन कपाले घटो नास्तीति व्यवहारापत्तिः तृतीयान्तसमभिव्याहारस्थले तदुपस्थाप्यप्रतियोगित्वस्यैव संसर्गतया व्युत्पन्नत्वात् सम- सम
वायावच्छिन्नघटप्रतियोगिताकाभावस्य च कपाले विरहात् अस्तु वा घटत्वावच्छिन्नत्वस्यैव संयोगसंबन्धावच्छिन्नत्वस्यापि प्रतियोगितांशे संसर्गमर्यादयैव भानं तृतीयान्तस ३

नि० नाधिकरणध्याससामानाधिकरण्यानधिकरणत्वं तथैव प्रधिकरणाधानधिकरणात्वे वा तु भ्रमप्रतिता भावाधिकरणानधिकरणे धैर्य तदवच्छिन्नवत्ताभावाधिकरणाधिकरणं वृत्ते वा सिद्धम्। दिना० ८

मभिव्याहारस्यनियामकत्वाच्चनातिप्रसंगः घटानधिकरणंभूतलमित्यादौतुलक्षणयाधिकरणपदमेव घटाधिकरणार्थकं घटपदंतात्पर्यग्राहकं अन्यथानधिकरणपदेनाधि
करणसामान्यभिन्नत्वोक्तौभूतलेतस्यबाधःस्यात् नचघटान्वितस्यैवाधिकरणभेदस्तत्रनञाबोधनीयः समासान्तर्गतनञामुत्तरपदार्थमात्रान्वयित्वव्युत्पत्तेः अन्यथानीलाघ
टोघटइत्यादौनीलघटान्यस्यघटत्वंनीलाप्रमेयः पटइत्यादौचनीलप्रमेयान्यस्यपटत्वंप्रतीयेत, वस्तुतःससम्बन्धिकपदस्थलेव्युत्पत्तिवैचित्र्यात्। प्रतियोगितानवच्छेदकघ
टानधिकरणंभूतलमित्यादौघटाद्यन्वितस्यैवाधिकरणादेर्भेदोभासते अन्यत्रत्रिपदतत्पुरुषानुपगमेपिघटस्यनाधिकरणंप्रतियोगितायानावच्छेदकमित्यादिरीत्यात्रिपदत
त्पुरुषेण विशिष्टलाभसंभवादितितुपरमार्थः पीतःशंखोनास्तीत्यादौशाब्दबोधस्तुनशंखत्वावच्छिन्नतयाप्रतियोगित्वमवगाहते तन्मात्रस्यान्वयितानवच्छेदकत्वात् शंखवत्
यानिश्चितेधर्मिण्यपितादृशःप्रयोगात् परंतुपीतशंखत्वावच्छिन्नप्रतियोगितात्वेनसंसर्गमर्यादयाप्रतियोगित्वमवगाहते नञादिपदानां यद्धर्मविशिष्टवैशिष्ट्यावगाहित्वो
प्रस्थाप्याभावधर्मिकान्वयबोधजनकत्वंतद्धर्मावच्छिन्नप्रतियोगितात्वेनप्रतियोगितासंसर्गकान्वयबोधजनकत्वव्युत्पत्तेः इयांस्तु विशेषः यद्घटोनास्तीत्यादिशाब्दे सांसर्गि
कीप्रतियोगित्वावगाहितापसिद्धेनघटत्वावच्छिन्नप्रतियोगितात्वेननिरूपितापीतःशंखोनास्तीत्यादौतुपीतशंखत्वावच्छिन्नप्रतियोगितात्वेनाप्रसिद्धेनैवेत्यादिकं बहुतर

नापीति। साध्यसमानाधिकरणंयस्ययदधिकरणानधिकरणंसाध्यंतत्वं। साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम्। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृ
त्तित्वमितियावत्। तदनधिकरणत्वमित्यर्थः। साध्यवह्निन्नस्यसाध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौनातिप्रसंगः॥ { मूहनीयं॥ इतिजागदीशीपंचलक्षणीसंपूर्णा ॥ ॥

श्रीगणेशायनमः॥ साध्यासामानाधिकरण्यपदस्यसाध्यवह्निन्नवृत्तित्वार्थकत्वेसाध्यवैयधिकरण्येत्यादिउत्तरलक्षणेनपौनरुक्त्यापत्तिरतोव्याचष्टेसाध्यमसमानाधिकरणंयस्येति
तत्वमितिपरेणान्वयः वह्निमात्रस्यैवव्यधिकरणतत्तद्धूमसमानाधिकरणत्वात् वह्निमान्धूमादित्यादावव्याप्तेराह। यदधिकरणेति। यदधिकरणमनधिकरणंयस्येतिव्युत्प
त्यायस्याधिकरणंसाध्यानधिकरणंतत्वमित्यर्थः तत्तद्धूमाधिकरणंतुनवह्निसामान्यानधिकरणमतोनाव्याप्तिरितिभावः ननुघटादिस्वरूपंयत्किंचिद्व्यक्त्यधिकरणंसाध्या
भूतधूमाद्यनधिकरणंतद्व्यक्तित्वानधिकरणत्वंवह्न्यादेरप्यतोधूमवान्वह्नेरित्यादावतिव्याप्तिः यद्यद्व्यक्त्यधिकरणंसाध्यानधिकरणंतत्तद्व्यक्तित्वानधिकरणत्वोक्तौतुमहागौ
रवमतआह। साध्यनिष्ठेति। साध्यनिष्ठाभावप्रतियोगित्वसद्भावेऽप्यस्तीत्यतःसामानाधिकरण्याभावउक्तः नचसाध्यनिष्ठस्यसामानाधिकरण्याभावस्यप्रतियोगित्वसामानाधिक
रण्यएवनतुवह्न्यादावितिसत्त्वेतावतिव्याप्तिःसाध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणवृत्तित्वस्यविवक्षितत्वात् वस्तुतःअसमानाधिकरण्यंसामानाधिकरण्यसंबंधेनाभाव

CC-0. In Public Domain. Digitization by eGangotri

सिं॰ जा॰ ४ ननु चैवं द्रव्यविशिष्टसत्त्वादित्यादावव्याप्तिः सामानाधिकरण्याभावस्याव्याप्यवृत्तित्वेन साध्यनिष्ठत्वात् एतदस्वरसेनैव वाकल्यांतरानुसरणादित्यपरे नन्वेवमपि वन्हिमान्

धूमादित्यादि विषमव्याप्तिहेतावव्याप्तिः महानसीयवन्हिनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगीभूतं यदाधेयत्वं तन्निरूपके पर्वतादौ धूमादेर्वर्तमानत्वात्साध्यसामा-

न्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ च महागौरवमत आह। साध्यनिष्ठाधेयत्वेति। अत्राधेयत्वं साध्यताघटकसंबंधेन ग्राह्यं तेन रूपवान्महाकाल-

त्वादित्यादौ संबंधसामान्येन रूपनिष्ठाधेयत्वानिरूपके गगनादौ हेतोरवृत्तित्वेपि नातिव्याप्तिः तद्वृत्तौ साध्यवद्भिन्नवृत्तौ ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्व-

मवश्यं हेतुताघटकसम्बन्धेन वाच्यमन्यथा वह्निनिष्ठाधेयत्वानिरूपके स्वावयवे समवायादिना धूमादेः सत्त्वाद्व्याप्त्यापत्तेः तथा च सत्तावान्द्रव्यत्वादित्यादावव्याप्तिः सा-

ध्यनिष्ठाधेयत्वानिरूपके जात्यादौ समवायेन संयोगेन वा वृत्त्यप्रसिद्धेः किंच द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणादिवृत्तित्वस्य विशिष्टस-

त्तायां सत्त्वादित्यत आह साध्यनिष्ठेति। धूमनिष्ठाधेयत्वानिरूपके जलादौ वह्न्याद्यधिकरणत्वाभावसत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतो व्यापकेति व्यापकत्वं तु प्रतियोगिवैयधि-

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान्द्रव्यत्वादित्यादौ न दोषः। साध्यवैय-

धिकरण्यं साध्यवद्भिन्नाधिकरणत्वं॥ {करण्याघटितमेव ग्राह्यं। तेन संयोगेन वह्न्यधिकरणत्वस्याव्याप्यवृत्तितया तदभावस्य तत्प्रायः पिंडवृत्तित्वेपि नातिव्याप्तिः वह्न्यधि-

करणत्वगगनोभयत्वावच्छिन्नाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिरतः सामान्यपदं तथा च हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्ना-

धिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः तेन वन्हिनिष्ठाधेयत्वानिरूपकाधिकरणजलादौ कालिकसंबन्धेन धूमाधि-

करणतायाः सत्त्वेपि नाव्याप्तिः। न वा वन्ह्यधिकरणत्वाभावस्यापि प्रमेयत्वादिना धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेप्यतिव्याप्तिः न च हेतुतावच्छेदकसंबंधेन य-

द्धर्मावच्छिन्नाभावत्वेन तादृशाधिकरणताव्यापकत्वमित्यस्यैव सम्यक्त्वेधिकरणत्वाभावपर्यंतानुप्रवेशो व्यर्थ इति वाच्यम्। वृत्त्यनियामकसंबन्धेन हेतुतायाम व्याप्तिप्रसं-

गात् तादृशसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः अस्माकं तु तादृशसंबंधेन यद्धेतुसंबंधित्वं तस्य स्वरूपसंबंधा वच्छिन्नाभावप्रतियोगित्वमादाय लक्षणसंभवात् किं-

चाधिकरणत्वाप्रवेशे वह्न्यादेः साध्यत्वे संयोगादिसंबंधेन रूपादिहेतावतिव्याप्त्यापत्तिः संयोगेन रूपाद्यभावस्य केवलान्वयितया वह्निनिष्ठाधेयत्वनिरूपकाधिकरणत्वव्यापक- राम॰

त्वादिति भावः। साध्यवद्भिन्नेति। अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षो बोध्यः तेन सत्तावान्द्रव्यत्वादित्यादौ नाव्याप्तिः॥ ॥ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुप्रागुक्तस्यार्थस्यशब्दान्तरेणाभिधानमनुवादः सचात्रासंभवीसाध्यंयदधिकरणानधिकरणंतत्वानधिकरणत्वस्यसाध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्यचप्रागुक्तस्यसाध्या
नधिकरणानधिकरणत्वशब्देनाबोधनादतआह। चरमेति। तत्वाधिकरणत्वाभावेतत्वाभावस्याप्रवेशाहेर्यथ्यमसंभवीत्यत्रउक्तं। अनतिप्रयोजनकतयेति। तथाचप्रकृतलक्षण
वाक्यस्यसाध्यंयदधिकरणानधिकरणंतत्वाभावेसाध्यस्ययदनधिकरणंतद्वृत्तित्वाभावएवचतात्पर्यात् प्रागभिप्रेतार्थस्यशब्दांतरेणाभिधानमेवानुवादःसचात्रसंभवत्ये
वेतिभावः साध्यमित्यादि साध्यानधिकरणेत्यादौमध्यवर्त्तिनञोव्यासेन चरमाधिकरणत्वांशेनसहान्वयादेवतल्लाभइत्याशयः। केवलान्वयिनीति। अव्याप्तिरितिपरेणान्वयः
अव्याप्तेर्हेतुमाह। साध्यनिष्ठेति। नानाव्यक्तिसाध्यकेचेतिमूलोक्तधूमहेतुमभिप्रेत्य नेनशब्दवानगगनत्वादित्यादौनानाव्यक्तिसाध्यकाव्याप्तिविरहेपिनक्षतिः न्यूनतांपरि
हरति। क्वचिदिति विशिष्टसत्तावाञ्जातेरित्यादावतिव्याप्तिरित्यर्थः विशिष्टधर्मावच्छिन्नाधिकरणत्वस्यैवतदवच्छिन्नाधेयत्वस्यानतिरिक्तत्वादितिभावः। यत्किंचिदि। साध्य

चरमाधिकरणत्वांशस्यानतिप्रयोजनकतयातदपहायद्रूपमेकोक्त्याअनूद्यदूषयति तदुभयमपीति। साध्येत्यादेःसाध्यंयदधिकरणानधिकरणंतत्वाभावः। साध्य
स्ययदनधिकरणंतद्वृत्तित्वाभावश्चार्थः। तत्रकेवलान्वयिनिसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्यानानाव्यक्तिसाध्यकेचएकसाध्यव्यक्तिनिष्ठाधेयत्वा
निरूपकाधिकरणत्वं। साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः। क्वचिद्व्यभिचारिण्यतिप्रसंगश्चाद्ये। द्वितीयेचसाध्यवैयधिकरण्ये यदिसाध्यवत्वावच्छिन्नप्रति॰
योगिताकोभेदो विवक्षितस्तदाकेवलान्वयिनियदिचयत्किंचित्साध्यवद्व्यक्तिभेदस्तदानानाधिकरणसाध्यकेसर्वत्राव्याप्तिः। केचित्तुसाध्यसामानाधिकरण्यंहे
तुतावच्छेदकसंबन्धेन+हेत्वधिकरणेतेनैवसम्बन्धेनसाध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थस्तेनधूमस्य। {वक्तव्यक्तित्वावच्छिन्नइत्यर्थः। नानाधिकर

णसाध्यकेति। यत्रसाध्यतावच्छेदकावच्छिन्नाधिकरणंनानातत्रेत्यर्थः। तेनकस्याञ्चिदपिवन्हिव्यक्तेर्नानाधिकरणवृत्तित्वविरहेपिनवन्हिसाध्यकधूमाद्यसंग्रहः। सर्वत्र केव॰
लान्वयिनितद्भिन्नेच सार्वभौममतमुत्थापयति। केचित्त्विति। हेत्वधिकरणवृत्तिसप्तम्यर्थोवच्छेद्यत्वंतत्त्वसाध्यवद्वृत्तित्वाभावेन्वितं। तेनैवेति। हेतुतावच्छेदकसंम्बन्धेनैवस॰
र्थस्तस्यचसाध्यवद्वृत्तित्वेनसहान्वयःसाध्यवत्वमपियेनसंबंधेनयेनरूपेणसाध्यतातत्संबंधेनतद्रूपावच्छिन्नवत्वंबोध्यम्। तेनसमवायेनवन्हेःसाध्यत्वेधूमेविशिष्टसत्व
साध्यकेसत्वादौनातिव्याप्तिः। तदधिकरणभिन्नत्वमिति। तदत्यन्ताभाव त्वोक्तौद्रव्यंसत्वादित्यादावतिव्याप्तिः गुणाद्यवच्छेदेनद्रव्यवृत्तित्वाभावस्यैवद्रव्यावच्छेदेनस
त्तायामभावसत्वादतोभिन्नत्वपर्यन्तानुसरणं भेदस्तुनाव्याप्यवृत्तिः तदव्याप्यवृत्तित्वेतु तादृशवृत्तित्वाभाववतीयावतीव्यक्तिस्तत्तद्भेदकूटवत्वंवक्तव्यमितिभावः॥ ७॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिं·जा· हेतुतावच्छेदकसंबन्धेनहेत्वधिकरणइत्यस्यफलमाह। स्वावयवेसंयोगेनेति। अवृत्तावपिनक्षतिरितिसन्वयः। तथाचतादृशसम्बन्धेनहेत्वधिकरणत्वाप्रवेशेस्वावयवावच्छे
५ देनधूमस्यवह्निमत्संयुक्तत्वाभाववत्वाद्वह्निमान्धूमादित्यादावव्याप्तिः स्यात्नपुनरसंभवः इदंवाच्यत्वेप्रमेयत्वादित्यादिकेवलान्वयिनिलक्षणसंभवादितिभावः अत्रचोत्पत्तिका
लावच्छिन्नेघटेपृथिवीत्वेरूपवद्वृत्तित्वनेस्यादिप्रतीत्याघटाद्यवच्छेदेनपृथिवीत्वादौरूपवद्वृत्तित्वाभावाभ्युपगमेहेत्वधिकरणनिष्ठमवच्छेदकत्वेनिरवच्छिन्नमग्राह्यतेनर
5 पवान्पृथिवीत्वादित्यादौनाव्याप्तिः। तत्रघटनिष्ठावच्छेदकत्वस्योत्पत्तिकालेनावच्छेदादितिध्येयं। तेनैवेत्यस्यफलमाह। वह्निमतिचसमवायेनेति। हेतुतावच्छेदकसं
बन्धेनसाध्यवद्वृत्तित्वानुक्तौसम्बन्धसामान्येनहेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वसामान्याभावेननिवेश्यः साधनाधिकरणाद्यवच्छेद्यतादृशाभावस्याप्रसिद्धेः। किंतु
यत्किंचित्सम्बन्धेनसाध्यवद्वृत्तित्वाभावःप्रवेशनीयः तथाचहेत्वधिकरणपर्वताद्यवच्छेदेनधूमादौवह्निमत्समवेतत्वाद्यभावसत्वादसंभवएवस्यात् यदितेनैवसम्बन्धेनसाध्य
वद्वृत्तित्वप्रवेशोनस्यादितिभावः। ननुहेत्वधिकरणावच्छेद्यत्वविशिष्टस्यसाध्यवद्वृत्तित्वाभावस्याधिकरणाप्रसिद्ध्यालक्षणमिदंसंभवितदधिकरणस्यैवतन्निष्ठधर्मावच्छेद
कतयागगनजलत्वादौवह्निमत्पर्वतसंयुक्तत्वाभावस्यधूमवत्पर्वतानवच्छेद्यत्वादत आह। तादृशाभावश्चेति। हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावश्चेत्यर्थः। सम्बन्धा

स्वावयवेसंयोगेनवह्निमतिचसमवायेनावृत्तावपिनक्षतिः तादृशाभावश्चसम्बन्धान्तरेणतत्रैववर्त्तमानेसुलभः।

न्तरेणहेतुतावच्छेदकसंबन्धान्यसम्बन्धेन तथाचहेतुमत्पर्वतावच्छेद्यत्वविशिष्टस्यवह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वंपर्वतीयरूपादावेवप्रसिद्धमितिभावः। यद्यपिरूपादौ
वह्निमत्संयुक्तत्वाद्यभावस्यव्याप्यवृत्तित्वात् तत्रपर्वतादिकंना वच्छेदकंभावाभावयोरेकत्रवृत्त्यर्थमेवावच्छेदकस्वीकारादित्यप्रसिद्धितादवस्थ्यं नचमहानसादिसंयुक्ते
कालिकादिसम्बन्धेनपर्वतादिनिष्ठघटादौवह्निमत्संयुक्तत्वाभावस्यपर्वताद्यवच्छेद्यत्वप्रसिद्ध्यानदोषइतिवाच्यम् इत्यमपिएतद्रूपवानेतद्रूपादित्यादावेतद्रूपाधिकरणा
वच्छेदेनएतद्रूपवत्समवेतत्वाभावस्याप्रसिद्धेर्दुर्वारत्वात् तथापिपर्वतावच्छेदेनतदीयरूपेनवह्निमत्संयुक्तत्वमित्यादिप्रतीत्याव्याप्यवृत्तेरवच्छेदकत्वस्वीकारादित्यमभि
धानेहेतुतावच्छेदकसंबंधेनसाध्यवद्वृत्तित्वाभावविशिष्टस्ययस्याधिकरणंतदन्यत्वेवाग्रंथतात्पर्यं तथाचव्याप्यवृत्तेरवच्छेदकत्वासत्वेपिसाध्यवद्वृत्तित्वाभावविशिष्टस्य
यस्याधिकरणंतद्भिन्नत्वमादायैवलक्षणसंगतिः नचवस्तुगत्यासाध्यवद्वृत्तित्वाभावविशिष्टस्ययस्याधिकरणंहेत्वधिकरणंतदन्यत्वोक्तौवह्निमान्धूमादित्यादावव्याप्तिः राम·
स्वावयवावच्छेदेनवह्निमत्संयुक्तत्वाभाववतोधूमस्याधिकरणतायाःसाधनवत्पर्वतादौसत्वात् साध्यवद्वृत्तित्वाभावविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्व ५

CC-0. In Public Domain. Digitization by eGangotri

हेतुमतस्तदन्यत्वोक्तौ तु वन्हिमान् धूमादित्यं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रैवासंभवः साध्यवदसंयुक्तत्वादि विशिष्टतत्तद्रूपादिव्यक्तित्वस्य गुरुतया प्रमेयरूपत्वावच्छिन्नायाः प्र
तियोगितायाइवतदवच्छिन्नाधिकरणत्वाप्रसिद्धेः केवलस्यातिप्रसंगएवविशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादितिवाच्यं सार्वभौमानांमते प्रतियोगि
तायाइवाधिकरणतायाअपि गुरुधर्मावच्छेद्यत्वोपगमात् अन्यथा समवेतत्वादिकमपेक्ष्य सत्तावत्समवेतत्वस्य गुरुतया साध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभाव
प्रसिद्ध्या सत्तावान् द्रव्यत्वादित्यादावव्याप्तिप्रसंगात् ननु साध्यसामानाधिकरण्यवतो न तदभाववत्त्वमतो द्रव्यं सत्वादित्यादौ व्यभिचारिण्यतिप्रसंङ्ग इत्यत आह। व्यभिचारण
स्त्विति। तादृशीति हेतुताघटकसम्बन्धेन हेतुमतीत्यर्थः। तादृशाभाववत्त्वं साध्यवद्वृत्तित्वाभाववत्त्वं अत्रैवानुभवं प्रमाणयति सत्तायामित्यादि एवं सत्तायामपि द्रव्यत्वसामान
धिकरण्यविरहे विशिष्टसत्वइति। विशिष्टसत्वशब्दप्रतिपाद्यहेतावित्यर्थः यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्ताव्यक्तावव्याप्त्याशंकायामुत्तरग्रन्थेन तदनिरासादसंगत्यापत्तेः। अतिरिक्तत्वादिति। विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः। तथाच गुणादिकं न हेत्वधिकरणमतो नाव्याप्तिः उभयत्वमपि एकविशिष्टापरत्वमेव तच्चातिरिक्तमेव नातः स्प
र्शवान् मूर्त्तत्वभूतत्वोभयस्मादित्यादावव्याप्तिरिति भावः यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपि विशिष्टसत्तादिहेतौ नाव्याप्तिः नच धूमाधिकर

व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरणएव तादृशतादृशाभाववत्त्वं। सत्तायांगुणेन द्रव्यत्वसामानाधिकरण्यमित्यनुभवात्। नचैवं गुणकर्मान्यत्ववि
शिष्टत्वेऽव्याप्तिः। विशिष्टस्यातिरिक्तत्वात्॥ { यामहानसाद्यवच्छेदेन पर्वतीयादिधूमे वन्हिमत्संयुक्तत्वाभावस्य चालनीन्यायेन सत्वादव्याप्तिः महानसादेरपि कालि

कादिसम्बन्धेन पर्वतीयधूमाधिकरणत्वात् तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादितिवाच्यं स्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववदवृत्तिधर्मव
त्वमित्यस्यैव फलितार्थस्य तत्तद्धूमत्वधर्ममादायैव लक्षणसंभवेन धूमत्वस्य हेतुतावच्छेदकत्वेपि क्षत्यभावात् तथापि विशिष्टस्यातिरिक्तत्वात्तत एवाव्याप्तिवारणसंभवे
हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवमसंभवो वा विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वे तादृशेण कथायां हेतोरुपन्यासो
नस्यादित्याशयः ननु विशिष्टसत्वस्यातिरिक्तत्वे मानाभावः नच गुणो विशिष्टसत्तावानिति प्रतीत्यभावएव मानं। गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्र
तीत्यसंभवात् नच विशिष्टनिरूपितमधिकरणत्वं यद्यतिरिक्तं तदा विशिष्टमेवातिरिक्तमस्तु विशिष्टाधिकरणतायाः क्लृप्ताधिकरणतास्वरूपत्वाभ्युपगमात् किंच विशिष्ट
स्यातिरिक्तत्वे द्रव्यविशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं नसत्तावदिति प्रत्ययप्रसंगः सत्ताभावबुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितयातदसत्वात्। ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिं·जा स्वातंत्र्येण विरोधितांतरकल्पने गौरवात् एवं विशेषणविशेष्योभयग्राहकसामग्रीविरहेपि विशिष्टग्रहप्रसंगः तदुभयग्राहकसामान्या विशिष्टस्य ग्रहे हेतुत्वकल्पने पि गौरवांतरं
६ स्फुटमेवेत्यत आह। अनतिरिक्तत्वेत्विति। गुरवस्तु विशिष्टस्यातिरिक्तत्वादिति ग्रंथस्य विशिष्टनिरूपितत्ताधिकरणत्वस्यातिरिक्तत्वादित्यर्थः। तथाच हेतुतावच्छेदकविशि
6 ष्टहेत्वधिकरणावच्छेदेन तादृशवृत्तित्वाभाववत्त्वमपि निवेश्यमतो नाव्याप्तिरित्याशयः नन्विशिष्टाधिकरणत्वयदिनातिरिक्तं विशिष्टसत्तावानिति प्रतीतेः प्रत्येकनिरूपि
ताधिकरणताद्वयावगाहितयैवोपपत्तेः अन्यथा विशेषणाभावनिर्णयदशायामपि विशिष्टसत्तावत्वप्रतीत्यापत्तेः विशिष्टसत्ताबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबं
धकतायाः स्वातंत्र्येण कल्पनापातादित्युच्यते तदाप्याह। अनतिरिक्तत्वेतीति प्राहुः विशेषणेति। विशेषणं तु गुणकर्मान्यत्वं विशेष्यं सत्ता तयोः सामानाधिकरण्यात्मकसंबं
धस्यैवेत्यर्थः साक्षात्संबन्धेन न स्यव्यभिचारित्वादाह। परंपरयेति। अवच्छेदकताख्यस्वरूपसंबन्धेनेत्यर्थः। सत्वगुणकर्मान्यत्वयोर्द्रव्यएव सामानाधिकरण्यमिति प्रतीत्याव
च्छेदकतासम्बन्धेन तदुभयसामानाधिकरण्यस्य द्रव्यएवसत्वान्नव्यभिचारइति भावः। नन्वेवं ज्ञेयत्वाधिकरणपटाद्यवच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य पटीयरूपादावे

अनतिरिक्तत्वेतु विशेषणविशेष्यसम्बन्धस्यैव परंपरया व्याप्यत्वात्। केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुस्तच्चिंत्यं। सत्तायां गुणे
नद्रव्यत्वसामानाधिकरण्यमिति।

{ वसत्वात्तदधिकरणभिन्नत्वमस्त्येव ज्ञेयत्वादिहेतोरित्यग्रे केवलान्वयिन्यव्याप्तिप्रदर्शनमसंगतमत आह। केवलान्वयिनीति
द्वितीयेति। तत्रसाध्यवह्निन्नस्याप्रसिद्धत्वादिति भावः। यद्यपीदं वाच्यं प्रमेयादित्यादौ तादात्म्येन केवलान्वयिनि हेतौ प्रथमलक्षणे व्याप्तिः संभवति प्रमेयावच्छेदेन वाच्य
त्ववत्तादात्म्यकत्वविरहेणाप्रसिद्धेः। नच घटाद्यवच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुलभः तथा सति। घटत्वं घटेन वाच्यमिति प्रतीत्यापत्तेः तथापि स्वाधिकर
णनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावोत्र लक्षणघटक इत्यभिप्रायेण द्वितीयलक्षणाभिधानं स्वपदस्य तत्तत्साधनव्यक्तिपरतया तादात्म्येन पटात्मक
हेत्वधिकरणीभूतपटव्यक्तिनिरूपिततादात्म्येन वाच्यत्ववत्तादात्म्यकत्वाभावस्य पटावच्छेदेन पटत्वादावेवप्रसिद्धेः। वस्तुतस्तु केवलान्वयित्वं वृत्तिमदत्यंताभावाप्र
तियोगित्वमात्रं नतत्वच्छेदकगर्भं। तथा च तादात्म्येन किंचिदपि प्रमेयं न केवलान्वयीति द्वितीयलक्षण एव तादृशकेवलान्वयिन्यव्याप्तिसंभवात् यथाश्रुतमेव सुम्य
गिति ध्येयं। नव्यास्तु केवलान्वयिनि चाव्याप्तेरिति केवलान्वयिसामान्ये व्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्यर्थः प्रथमलक्षणे यत्किंचित्केवलान्वयिनि तादात्म्येन प्र
मेयादिहेतावव्याप्त्यावपिनक्षतिरित्याहुः सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकत्वाभावं गुणाद्यवगाहते इत्यतस

६ नानाकारकप्रतीतिं दृष्टान्तयति।

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यत्वेगुणइतिनतूक्तप्रतीतेर्गुणावच्छेदेनद्रव्यत्वेपृथिवीत्वसामानाधिकरण्याभावोविषयःगुणस्यद्रव्यत्वानधिकरणतयातन्निष्ठपृथिवीवृत्तित्वाभावावच्छेदकत्वासंभवात् किं॰
तुद्रव्यत्वनिष्ठंयत्पृथिवीत्वसामानाधिकरण्यंतदवच्छेदकत्वाभावएवगुणेविषयइतितद्दीयमपिइतिभावः।अवच्छेदकत्वाभावमिति।प्रात्यक्षिकप्रत्ययाभिप्रायेण
देसत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमित्यादिशाब्दस्थलेऽवच्छेदकत्वोपस्थापकपदांतरविरहात्तदभावस्य गुणादौबोधयितुमशक्यत्वात्।किंतुसत्तानिष्ठंद्र-
व्यत्वसामानाधिकरण्यंनगुणावच्छेद्यमित्याकारएवतत्रबोधः।गुणादावित्यत्रसप्तम्यर्थस्यनञर्थेऽन्वयादितिध्येयं नन्वेवंतादृशप्रतीतेःसामानाधिकरण्याभावविषय-
कत्वमनुभवसिद्धंविरुध्येतसामानाधिकरण्यस्याव्याप्यवृत्तित्वेनतदवच्छेदकत्वाप्रसिद्ध्यातादृशावच्छेदकत्वाभावविषयकप्रतीतेर्भ्रमत्वापत्तिश्चस्यादतआह॥
परंपरासम्बन्धेनेति।निरूपकताख्यस्वरूपसम्बन्धेनेत्यर्थः।नत्ववच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः तथासति सत्तायांद्रव्येनद्रव्यत्वसामानाधिकरण्यमितिप्रती-
तिप्रसंगात्।सामानाधिकरण्यस्याव्याप्यवृत्तितयाकुत्राप्यवच्छेदकत्वसंबंधेनतस्यासत्त्वात्।नत्विति।तथाचद्रव्यंसत्त्वादित्यादावतिव्याप्तिरितिभावः।ननूक्तदृष्टांतस्थले

प्रतीतिर्हिद्रव्यत्वेगुणेनपृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्यपरंपरासंबन्धेनसामानाधिकरण्य-
स्यवा।अभावंगुणेऽवगाहते।नतुसत्तायामेवद्रव्यवृत्तित्वाभावंसत्तानद्रव्यवृत्तित्वाभाववतीद्रव्यवृत्तित्वाभावान।सत्तावृत्तिरित्यादिसर्वजनप्रसिद्धप्रती-
तिबाधितत्वात्।बाधकाभावात्तुसंयोगतदभावयोरवच्छेदकभेदेनैकत्रप्रतीत्यातदुभयोरेकत्रसिद्धिः।अतींद्रियसाध्यकेऽतीन्द्रियेव्यभिचारिण्यतिप्रसं-
गाच्च।तत्रसामानाधिकरण्याभावस्यप्रत्यक्षत्वासंभवेनासिद्धेः। { बाधकसत्त्वादवच्छेदकत्वाभावोस्तुप्रतीतेर्विषयःप्रकृतेतुसाक्षात्सामानाधिकरण्याभावविषयक-
त्वेनकिंचिद्बाधकमस्तीत्यतोबाधकमाह।सत्तानेति।तथाचसत्तायांद्रव्यवृत्तित्वाभावसत्त्वेद्रव्यवृत्तित्वाभाववद्भिन्नत्वधीस्तत्रनस्यादितिभावः ननुद्रव्यवृत्तित्वाभावोऽव्याप्य-
वृत्तिरेवेतितद्वद्भेदोप्यव्याप्यवृत्तिर्वाच्यः तथाचद्रव्यगुणात्मकविभिन्नावच्छेदेनतयोःसत्तायांसमवेशात्कुतोविरोधइत्यतआह।द्रव्यवृत्तित्वाभावइति नन्वेवंमूलेत्र
कपिसंयोगीतिप्रतीत्यावृक्षादौकपिसंयोगाभावोपिनसिद्ध्येत् तत्रापिवृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्यमूलेवगाहनसंभवादतआह।बाधकाभावादिति।कपिसंयोगा-
भावोनवृक्षवृत्तिरित्यादिप्रत्ययस्यासंभवादितिभावः।ननुद्रव्येवृत्तित्वाभावोनसत्तावृत्तिरितिप्रतीतिरेवासिद्धाद्रव्यवृत्तित्वाभावोगुणावच्छेदेनसत्तावृत्तिरितिप्रत्ययात्।
एकदेशोषस्यकर्तुमशक्यत्वादतोदोषांतरमाह।अतीन्द्रियेति।मनस्त्ववदणुत्वादित्यादावित्यर्थः।तत्रअतीद्रियसाध्यके असद्धेतौ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिं·जा· ननुप्रत्यक्षासंभवेनप्यणुत्वंमनस्त्वसामानाधिकरण्याभाववन्मनस्त्वाभाववद्वृत्तित्वात् पृथिवीत्ववदित्यनुमानेनैवतत्रसामानाधिकरण्याभावःसेत्स्यतीत्यतआह। नचेति।
७ नद्वृत्तीतिसाध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः। तथाचोक्तानुमानेमनस्त्ववत्वृत्तिभिन्नत्वमुपाधिःतस्यचसाध्यव्यापकत्वंघटत्वादौसाधानाव्यापकत्वंद्रव्यत्वादौग्राह्यंभेद
स्याव्याप्यवृत्तित्वेतुसाध्यवद्वृत्तितत्तद्व्यक्तित्वावच्छिन्नभेदकूटउपाधिर्बोध्यः ननूक्तोपाध्यप्रतिसंधानदशायामुक्तानुमानादेवसाध्यवद्वृत्तित्वाभावसिद्धिस्तत्रभ
१ विष्यति अन्यथाव्याप्यंतरस्यापितत्रातिप्रसङ्गादित्यतआह॥ किंचिदमित्यादि॥ तथाचकालोगोमान्गोत्वादित्यादौकालिकसम्बन्धेनहेतावव्याप्तिः। कालिक
सम्बन्धेनहेतुमतिमहाकालेतेनसम्बन्धेनकालवृत्तित्वाभावस्यकुत्राप्यसत्वात् नचकालावच्छेदेनगगनादावेवसाध्यवद्वृत्तित्वाभावस्यप्रसिद्धिः कालस्यगगना
द्यनधिकरणत्वेनतन्निष्ठवृत्तित्वाभावेकालावच्छेद्यत्वासंभवात् कालिकसम्बन्धेनगगनादेर्वृत्तिमत्वस्वीकाराच्च यद्यपिगोत्वाद्यधिकरणतत्तत्क्षणावच्छेदेनका
लवृत्तित्वाभावस्यतत्तत्क्षणासमानकालीनेतत्तत्क्षणगोचरज्ञानेप्रसिद्धिः तत्तत्क्षणस्यापिविषयतयास्वविषयकज्ञानाधिकरणतयातन्निष्ठतादृशवृत्तित्वाभाववत्ता

नचतदभाववद्वृत्तित्वेनतत्रतदनुमेयं। तद्वृत्तिभिन्नत्वस्योपाधित्वात्। किंचइदमिदानीमितिप्रतीतिनियामकविशेषण
ताविशेषेणहेतुतायांसद्धेतावव्याप्तिः। तेनसंबन्धेनाधिकरणेकालेतेनसंबन्धेनसाध्यवद्वृत्तित्वस्यविरहिणोऽप्रसिद्धेः॥ ७ ॥

यामवच्छेदकत्वसंभवात्। तथापि महाकालएवकालिकसम्बन्धेनाधिकरणंउपाधीनांतुतत्तद्वृत्तितायामवच्छेदकत्वमात्रमितिप्राचीनसिद्धान्तमनुरुध्येत् महाकालनि
रूपितविशेषणतयावाहेतावव्याप्तिर्द्रष्टव्या इदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतायायोविशेषस्तेनहेतुतायामितिव्याख्यायातादृशविशेषणतायाःसामा
मान्यतएवविभिन्नकालीनयोर्नाधाराधेयभावद्रूतिमतेनानुपपत्तिगन्धोपिस्वसमानकालीनस्यविषयतयाप्यनधिकरणत्वेनतदवच्छेदेनज्ञानेसाध्यवद्वृत्तित्वाभावप्रसि
ध्यसंभवादितिध्येयं। अत्रहेतुतावच्छेदकसंबन्धेनस्वाधिकरणेस्वनिरूपितहेतुतावच्छेदकसंबंधेनसाध्यवद्वृत्तित्वाभावस्यविवक्षायांनकोपिदोषःसाधनगोत्वाधिकरण
महाकालावच्छेदेनगोत्वनिरूपितकालिकसंबंधेनसाध्यवद्वृत्तित्वाभावस्यघटादावेवप्रसिद्धत्वात् साध्यसामानाधिकरण्यत्वयद्धर्मावच्छिन्नाधिकरणावच्छेद्यहेतुवृत्तिका राम·
स्यन्ताभावप्रतियोगितानवच्छेदकतद्धर्मवत्त्वंवाविवक्षितम्। इत्थंचवाच्यंप्रमेयादित्यादौप्रमेयव्यक्तीनांभेदेपिनाव्याप्तेर्भेदइत्यस्मद्गुरुचरणाः ॥ ॥ ॥ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिं॰व्या॰ केचित्तु स्वनिष्ठं यत्साध्यवद्वृत्तित्वं हेत्वधिकरणावच्छेद्यं तदभावाधिकरणभिन्नत्वमित्यर्थः। तादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्धमतो नाव्या
८ प्तिरित्याहुः साध्यवद्वृत्तित्वाभावाधिकरणत्वसामान्ये यन्निष्ठत्वयदधिकरणावच्छेद्यत्वोभयाभावस्तत्त्वं व्याप्तिः पर्वतीयरूपनिष्ठं यत्पर्वतावच्छेद्यं वह्निमत्संयुक्तत्वाभावाधि
करणत्वं न तद्धूमनिष्ठं यच्च धूमनिष्ठं न तद्धूमाधिकरणावच्छेद्यमधिकरणभेदेन तस्य नानात्वात् अन्यथा पर्वते तदीयरूपेण वह्निमत्संयुक्तत्वमिति वत्पर्वते धूमेन वह्नि
मत्संयुक्तत्वमित्योदिप्रतीत्यापत्तेः अतो वह्निमान्धूमादित्यादौ नाव्याप्तिः व्याप्यवृत्तेरवच्छेदकत्वास्वीकारे तु तादृशाभावाधिकरणत्वसामान्ये यदधिकरणावच्छेद्यत्व
सामान्याभावस्तत्त्वमित्येव वाच्यमित्यादिकं पुनरुद्दस्यूत्वादुपेक्षितं वाच्यत्वादिसाध्यके तादात्म्येन हेतावव्याप्तेश्च वाच्यत्ववत्तादात्म्याभावाप्रसिद्धेः एतेन सत्तायां कर्म
भिन्नद्रव्यत्वसामानाधिकरण्यमिति प्रतीतौ कर्मणइव कर्मत्वयोः समवायस्याप्यवच्छेदकत्वं भासते अन्यथा इदानीं सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यादिप्र[illegible]पत्तेः
एतत्कालस्य कर्मानतिरेकात् एवं च यद्धेतुव्यक्त्यधिकरणीयदेतुतावच्छेदकसंबन्धेसाध्यवद्वृत्तित्वा भावावच्छेदकत्वं नास्ति तत्त्वमित्यर्थः कालो गोमान् गोत्वादि
त्यादौ कालवृत्तित्वाभावावच्छेदकत्वस्य द्रव्यत्वादिनिष्ठ आत्मसमवेतत्वादौ प्रसिद्धस्य गोत्वाधिकरणीयकालिकसम्बन्धे विरहान्नाव्याप्तिरित्यपि निरस्तमिति संक्षेपः। तीत्वा
॥ इति सिद्धव्याघ्रलक्षणद्वयपूरणं॥ सम्वत् १९३०॥

॥वाराणसीप्रसादस्य नियोगेन तु यत्नतः॥ काशीसंस्कृतमुद्रायामङ्कितोयं शिलाक्षरैः॥१॥ श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासश्री ५ युतमहाराज
शिवलालदुबेजीकेमकानमेयहपुस्तकमिलेगा अथवा कचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगा॥
॥मितिपौषशुक्लद्वादशी १२ भौमवासरे॥

CC-0. In Public Domain. Digitization by eGangotri

॥इति सिंहव्याघ्रसहिता जागदीशी पंचलक्षणी सम्पूर्णा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं. ४१५२

॥अथजागदीशीपक्षताप्रारभ्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ श्रीगणेशाय नमः ॥ अथ पक्षताशिरोमणिः ॥ अनुमितिलक्षणैककार्यानुकूलतासङ्गत्या पक्षधर्मतां निरूपयितुमाह व्याप्तीति। सन्दिग्धेति यत्र साध्यस्य यादृशसंबं-
धावगाहिनिर्णयविरहविशिष्टः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्ष इत्यर्थः तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णी-
तसम्बन्धेन पक्षत्वम् न वा तमःप्रभृतिषु समवायेनाकाशादिसाधने तद्धेत्वल्यम्। संशययोग्यतां निरस्यति नापीति साधकबाधकमानेति सिद्धिबाधौ केवलान्वयिनि च पक्ष-
निष्ठाभावप्रतियोगित्वधीरेव सुलभो बाधः। ननु तत्रापि पुनरनुमित्सा ततः परामर्शान्तरं स्मरणात्मकाद्वा परामर्शादनुमितौ इष्टसाधनताविषयकादनुमित्सा ततोऽनुमिति-
रिति फलबलात्कल्पनीयमित्यत आह सिषाधयिषेति न चानुमितिजनिकेच्छैव पक्षता सा च क्वचित्स्वनिष्ठैव सर्वत्रेश्वरनिष्ठैव सुलभेति वाच्यं तस्या नित्यत्वेन सिद्धावस्या-
मपि पक्षताप्रसंगात् न च तस्यास्तदानीं न तज्जनकत्वं तद्भिन्नतद्योग्यता अनपायात् न च तदुपधानम् अनुमितेः पूर्वं तदभावात् न च तत्सामग्रीसमवधानं कारणमात्रस्य
पक्षताकुक्षिनिक्षेपप्रसंगाच्छेषवैयर्थ्यात्। तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य वक्तव्यत्वापाताच्च। सिषाधयिषेति यत्रानुमित्सानन्तरं साध्यतद्व्या-
प्यवत्त्वविशिष्टपक्षस्मरणम् अनुमितौ इष्टसाधनताविषयकतादृशस्मरणाद्वा अनुमित्सा अनुमित्सापूर्वकालोत्पन्नविशेषणस्मरणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्नि-
कर्षसहितात्साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरं चानुमितिस्तत्र पक्षतासम्पत्तये सहकृतान्तं साधकमानविशेषणं। सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयत्व-
प्रकारिका अनुमितिविषयिणी इच्छा यत्किंचिज्ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वेऽनुमित्यनुत्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते व-
न्हिज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरमनुमित्युत्पादाच्च यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य विशेषणत्वादिच्छाया अननुग-
मेऽपि न क्षतिः धूमेनानुमिनुयामितीच्छायामालोकपरामर्शात् सत्यामपि सिद्धौ वन्हिनानुमितिस्तदान्यमात्रलिंगकानुमितीच्छाकामिनी जिज्ञासादिवत् पृथक् प्रतिबन्धि-
कायदि च तत्रानुमितिस्तदा सिद्धिसत्त्वे तत्रानुमितेर्वारणाय तल्लिंगिकानुमितीच्छा तदन्यमात्रलिंगिकानुमितीच्छातिरिक्तानुमितीच्छा वा वाच्या लिंगविशेषेणापि च नि-
यन्त्रितं पक्षत्वं तल्लिंगकानुमितौ सिद्धिकालीना तल्लिंगिकानुमितीच्छाविरहविशिष्टान्यलिंगकानुमितीच्छैव वा प्रतिबंधिका साधकमानं साध्यवत्त्वनिश्चयः पाषाणमयं-
त्वादिना पर्वते तेजस्त्वादिना च वन्हेः सिद्धावपि पर्वतत्वेन तत्र वन्हित्वेन च तस्यानुमितेर्धर्मित्वसाध्यत्वयोरवच्छेदकानुप्रवेशनीयौ यदि च पर्वतत्वसामानाधिकरण्येनैक-
त्र साध्यसिद्धावपि विनानुमित्सामन्यत्र तादृशानुमितिरानुभविकी तदा धर्मिविशेषोऽपि निवेश्यो नान्यथा पक्षतावच्छेदकस्य सामानाधिकरण्येन साध्यसिद्धावपि तदवच्छे-
देनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन सिद्धेस्तत्सामानाधिकरण्यमात्रेणानुमितिं प्रति तु सिद्धिमात्रस्य विरोधित्वम् इत्थञ्च लिंगभेदन्या-

CC-0. In Public Domain. Digitization by eGangotri

योऽनुसरणीयः साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वेतां प्रति पक्षविशेष्यिकैव सिद्धिर्विरोधिनी एवञ्च पक्षविशेष्यकसिद्ध्यनन्तरमपिसा
ध्यविशेष्यिकानुमितिर्जायते तुल्यन्यायात् समानाकारायाः सिद्धेः प्रतिबन्धकत्वे पर्य्यवसानात् तादृशानुमितिं प्रति सिद्धिमात्रं विरोधिसाध्यप्रसिद्धिरेववा अतएव प्रसि
द्धसाध्यकस्थले पक्षविशेष्यिकेवानुमितिरनुभूयत इति अत्र च व्याप्तिस्मरणादिना पूर्व्वोनुमित्सानाशे परामर्शकाले च सिद्धिसत्वेऽनुमित्सान्तरोत्पत्त्यैवानुमितिस्तथैवका
रणीभूतस्य विशिष्टाभावस्य संपत्तिरित्यपाध्यायाः॥ अन्येतु द्वित्रिक्षणान्तरितायामप्यनुमित्सायामनुमितिदर्शनात् अनुमित्सायोग्यता वाच्यासा च न स्वोत्पत्त्यनन्तरं
स्वविषयसिद्ध्यनुत्पादः अनुमित्सानन्तरमनन्तरानुमित्यनुत्पादे दिवसादिविलम्बेनेन्द्रियादिनानिर्णीतेऽपिसाध्ये लिंगपरामर्शादनुमितिप्रसंगात् किन्त्वनुमित्सानन्तरं लिंगद
र्शनादिक्रमेण यावता कालेनोत्सर्गतः परामर्शो जायते तावानेव कालः फलबलेन तथा कल्पनात् अथवानुमित्सोत्पत्त्यनन्तरमनुमित्सानाशेऽपि सिद्धेरसत्त्वं यावत्कालमध्ये
ऽनुमितिर्जायते तावानेव कालोऽनुमित्सयोपलक्षितः यच्चिसिद्ध्यनन्तरं तन्नाशेऽपि द्वित्रिक्षणमध्ये विनानुमित्सामनुमित्यनुत्पादोऽनुभवसिद्धस्तदासिद्धापि तावानेवसमय
उपलक्षणीयः विशिष्यक्षणनियमस्त्ववहितैः करणीय इति वदन्ति। अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्व्वोक्तन्यायेन साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा पक्षवा
साध्यतद्व्याप्यधर्मतादृशव्याप्यधर्मान्तरविशिष्टपक्षस्य तत्पक्षकसाध्यतद्व्याप्यवत्त्वानुमित्योरिष्टसाधनताया श्चैकस्मरणं ततस्तयोरनुमित्सा ततः साध्यतद्व्याप्यवत्तानु
मितिस्तत्र तदनन्तरमनुमितिप्रसंगः योग्यता विवक्षणेतु सुतरामेवेति तदिच्छाविषयसिद्ध्यनुपहितत्वं तद्विशेषणं पक्षसाध्यभेदेन च पक्षताया भेदात् पृथक् पृथगेव कार्य्यका
रणभावः तथा च यत्र सिद्ध्यनन्तरं कदाप्यनुमितिर्न जाता तत्र सिद्ध्यभावमात्रं कारणं न तु तत्रेच्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च तेन यत्पक्षकयत्साध्यकानुमितौ कस्या
पीच्छा न जाता तत्रोक्तिसाधारण्यमात्रसंपादनायेश्वरेच्छानिवेशनायासो नोपादेयः। यत्तु सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नाया
सिद्धिः सिषाधयिषाविरहविशिष्टायास्तस्या अभावः पक्षता अत्र तृतीयक्षणव्यवधायकद्वितीयक्षण एवान्यवहितत्वपर्य्यवसानाद्यत्राविरलक्रमेण सिद्धिसिषाधयिषानु
मितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्तये द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु स्वक्षणस्य किमर्थमिति चेत् यत्र क्रमेण सिषाधयिषाप्रत्यक्ष
सिद्धिपरामर्शानुमितयस्तत्र तृतीयक्षणे पक्षतासम्पत्त्यर्थमिति तन्न यत्रानुमित्सानाशकाले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमिती तत्र पक्षताविरहप्रसंगात् अथप्र
थमक्षणमपेक्ष्य द्वितीयस्येव द्वितीयमपेक्ष्य तृतीयस्याप्यव्यवहितोत्तरत्वं स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वं वा तादृशाव्य
वहितोत्तरत्वं वाच्यं तथा च यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र प्रथमक्षणे पक्षतावारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टान्तं द्वितीयन्तु सिद्धेस्तत्रैव द्वितीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्द

प्र·प्रि· क्षणे पक्षतासम्पत्तये यदि पुनरिच्छाजनिकासामग्री प्रतिबध्नात्यनुमितिं तदानुमित्यव्यवहितपूर्व्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावमात्रं पक्षतेति चेत्तादृशसिद्धीनां तत्तद्व्यक्तित्वेना
२ भावः कारणं निरुक्तरूपविशिष्टत्वेन वा नाद्यः अनन्तकार्य्यकारणभावप्रसंगात् तादृशसकलसिद्धौ अनुमित्साविरहविशेषणज्ञानस्य वैयर्थ्यात् न तत्तत्समयेसम्बन्धव्यक्ती
नां तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्वप्रसंगाच्च नान्त्यः सत्यपि परामर्शादौ कस्याश्चित्सिद्धेरनन्तरमनुमितिः कस्याश्चिन्नेत्यत्र नियामकाभावात् न
४ वा कारणतावच्छेदकावच्छिन्नसमाजाधीनकार्य्योत्पादादिकं कारणतावच्छेदककोटौ निविशते तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषिते न स्वक्षणाव्यवहितोत्तर
क्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकस्वविषयत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नस्वविषयत्वेन स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमाना
नि३ धिकरणानुमितिकभिन्नस्वविषयत्वे न वा किंवा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवर्त्तित्वविशिष्टज्ञानत्वादिना कारणत्वं स्यात् अव्यवहितोत्तरस्याद्वितीयप्र
वक्षण इति नातिप्रसंगः न चाद्रिमेषु परामर्शस्थितिक्षणे यत्र विरोधिसिद्ध्यादिविनाशस्तत्रोत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्यातथात्वादिति वाच्यम् अनुमितिसामग्र्या
विरोधिन्या विरहेण तदानीमुत्पन्नादनुव्यवसायादेरनन्तरं संस्काराद्यात्तत्वं भवात् संस्कारजन्यत्वेन स्मृतित्वस्य प्रागेव निरासात् स्याद्वा स्वसमानाधिकरणानुमित्यव्य
वहितपूर्वक्षणवृत्तिभिन्नत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणक्षणवृत्तित्वविशिष्टत्वेन वा स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यव
हितपूर्व्वक्षणवृत्तित्वविशिष्टत्वेन वा प्रतिबंधकत्वं तदव्यवहितपूर्व्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं न चात्र प्रथमे यत्र सिद्ध्यात्मकपरामर्शानन्तरं सिषाध
यिषाया उत्पत्तिकाले तत्पुरुषीयस्य कस्यापि धर्म्मस्य न विनाशोऽनन्तरं पुनरनुमितिः तत्र तदुत्पत्तिसमयेऽपि सा स्यात् तत्पूर्व्वकालीनानां सर्व्वेषां तादृशपूर्ववर्त्तित्वेनाविरो
धित्वादिति वाच्यम् अनवरतपरिस्पन्दमानापरिमितपवनादिपरमाणुचेतनसंयोगसन्तानान्तःपातिव्यक्तीनामविरतमेवोपरमात् फलानुत्पादबले नापि तादृशकल्पनासं
भवात् कारणान्तरकल्पने गौरवाच्च अन्वयव्यभिचारसन्देहस्य च कारणत्वग्रहविरोधित्वात् उपादीयन्तां वा तत्तदात्मसमयविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः
भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वं तथा चोपमानादेः प्रमाणान्तरत्वं भज्येत सर्वत्रानुमि
तिसामग्रीसंभवात् विलीयेत च परामर्शत्वादिना कारणत्वं बाधकत्वादिना च प्रतिबन्धकत्वं अनयैव रीत्या कार्य्यान्तरेष्वपि क्लृप्तानां कारणानां प्रतिबंधकानाञ्च तथात्वप्रक्लृप्ता
नाञ्च तथात्वं प्रसज्येत अत एव न द्वितीयोऽपि प्रकारः वैयर्थ्याच्च सिद्धेः । सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानातिरिक्तसाधकमानयोरन्यतरस्याभावः कारणमिति तु के राम·
चित्तन्न साधकमानं हि सिद्धित्वरूपयोग्यं तदुपहितं तत्सामग्री वा नाद्यः चक्षुरादिसत्त्वे विनानुमितीच्छामनुमित्यभावप्रसंगात् न द्वितीयः सिद्धेः पूर्वं तदुपहितत्वाभावेन २

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षसामग्रीसत्त्वेप्यनुमित्यापत्तेः अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च न तृतीयः अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वम् अनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेन
चानुमितिकारणत्वमित्यन्योन्याश्रयात् स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोपविरहेणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्त्वे स्थाणुत्वारोपक्षणे तदभावानुमि
त्यापत्तेरित्यपि कश्चित् वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेकशालित्वान्नियमेन प्रथममुपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरप्यत्रैवान्तर्भावप्रसंगात् न
चानुमित्साविरहस्य प्रत्येकं विशेषणत्वे गौरवं शाब्दसिद्धौ सत्यामशब्दं ज्ञानं जायतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषयेच्छाविरहस्य प्रत्यक्षसामग्रीसत्त्वे
च तादृशेच्छायामनुमित्यनुत्पादात् साधकमाने अनुमितित्वादिप्रकारकेच्छाविरहस्य पृथगेव विशेषणतायास्त्वयापि वाच्यत्वात् स्वनिवर्त्तकप्रत्यक्षादिसामग्रीसमवहि
तान्यत्वादिना च तादृशेच्छयोरनुगमेऽतीव गौरवम् अन्यतरत्वघटकयोरन्योन्याभावयोर्मिथो विशेषणविशेष्यभावे विनिगमकाभावश्च आत्मनिष्ठत्वसमवायेन सिद्धेर
भावः भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारणरूपायास्तत्सामग्र्याः मणिविशिष्टस्य वन्हेरिवेतरेतरविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वायोगात् तथा च कथम
नुगतरूपेण तयोरभावः कारणमेवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वं प्रत्यक्षादिकारणचक्षुःसंयोगादेस्त्वन्यादृशमिति सामग्रीवि
शेषाभावस्य हेतुत्वेपि लाघवात् सिद्ध्यभाव एव पक्षव्यवहारनिमित्तं एतदेवाभिसन्धाय प्रवृत्तिनिमित्तमुक्तमिति वस्तुगतिः फलानुपहितसिद्धीच्छाविरहविशिष्टसि
द्ध्यभावापेक्षया बाधाभावस्य लघुत्वेपि सिद्धसाधनस्थले पक्षव्यवहारविरहेण तादृशसिद्ध्यभावस्यावश्यकत्वे बाधाभावो न निविशते गौरवात् विशिष्टसिद्ध्यभा
वस्य चात्मनिष्ठस्यैवानुमितिहेतुत्वेपि तस्य परम्परासम्बन्धादेव पर्वतादौ पक्षव्यवहार इति ध्येयम् एकस्य पुंसोऽनुमित्सासत्त्वेपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसाम
ग्रीसत्त्वेऽनुमित्यनुत्पादात् तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्साविरहकालीनतत्तत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरुपेतव्य इति वद
न्ति। अथ सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरस्तु न चैवं मण्यादिस्थलीयदाहं प्रत्युत्तेजकस्य हेतुत्वापत्तिः उत्तेजकानामननुगतत्वात् तावदभावविशिष्टमण्याद्यभाव
स्य चानुगतत्वादिति चेदिहापि दर्शितोऽननुगमः सिषाधयिषायाः सिद्ध्युत्तरानुमितित्वस्यानुगतानतिप्रसक्तं दुर्वचं सिद्धिस्थितिकालीनां स्वेतरसिद्धिकालीनां वानुमितिं
प्रति हेतुत्वकल्पने च विनापि सिषाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादाद्दुर्वारः एकस्य च पुंसः सिद्धिसत्त्वेऽन्यस्य सिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसंगः तत्तत्पुरु
षीयतादृशानुमितिं प्रति सिषाधयिषाया हेतुत्वेऽनन्तकार्यकारणभावप्रसंगः अपि च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गा
त् न ह्यदृष्टविशेषसामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति न चान्यत्रापि तद्विशेषसामग्र्यन्तरमस्तीति तत्कल्पने चातिगौरवं इह जायमाना सा सिद्ध्युत्तरैवास्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰प॰ त्साच न जायते कारणाभावादितिचेत् समाजनिष्ठानुमितिसामान्यन्तु स्यादेवकार्य्योत्साद्विरहस्य विनाकारणभावमसंभवात् करणव्यापारत्वेनावश्यककारणभाव
३ स्य परामर्शस्य कारणतावच्छेदिकापक्षतानकारणमितितु भ्रमः प्रतिबन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेनहेतुत्वात् अन्यथा यथासंभवनिमित्तकारणस्य
समवायिकारणत्वाद्यवच्छेदकत्वप्रसंगात् अथानुमितिसाधारणसिद्धेः प्रतिबंधकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्य्यकालवृत्तेरेवहेतुत्वात्
अनुमितिकाले च तदसंभवात् सानोत्सद्येतेति चेन्न यस्य मण्याद्यभावादेः कार्य्यसमकालतयान्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं नतु सर्व्वस्य गौरवात् अन्य
या समवायिकारणस्य कार्य्यसहभूतस्यैव हेतुत्वात् कारणमात्रस्य तथात्वप्रसक्तौ प्रागभावस्याप्यविनाशापत्तेरिति। प्रागभावस्य विनाप्यनुमित्सां क्वचित् परामर्शानुमि
तिप्रवाहस्याविरलग्नस्यानुभविकत्वात् कालभेदकल्पनायाञ्च मानाभावात् मानाभावाच्च पक्षता नानुमितिहेतुः परार्थानुमाने तु सिद्धसाधनमर्थान्तरविधया दूषण
मित्याहुः॥॥ अथ जागदीशी पक्षता॥ अनुमितिलक्षणेति। अनुमितिस्वरूपेत्यर्थः। व्याप्तिज्ञानजन्याया अनुमितेः किमन्यत्कारणमिति जिज्ञासायैव पक्षता निरूप
णादिति भावः अत्रानुकूलत्वे जनकजनकतावच्छेदकसाधारणप्रयोजकत्वमात्रं तेन व्याप्तेरनुमित्यहेतुत्वेपि नक्षतिः यत्तु जनकतावच्छेदकत्वमेवात्रानुकूलत्वं व्याप्ति
वत्पक्षताया अपि करणव्यापारतया सिद्धहेतुभावस्य परामर्शस्य जनकतायामवच्छेदकत्वादिति मतं तत्तुच्छं पक्षतानकारणमितितु भ्रम इत्याद्युत्तरग्रन्थविरोधापत्तेः पक्ष
धर्मतामिति। पक्षे धर्मत्वं यस्याइतिव्युत्पत्त्या पक्षतामित्यर्थः पक्षस्य धर्मत्वं धर्मविशेषः पक्षत्वमिति वा देवतादिशब्दवत्तलः स्वार्थिकत्वात् व्याप्तौ तीति। न च प्रकृतग्रन्थस्वर
संवलितस्यैव पाठस्य धर्तुमुचितत्वाद्व्याप्त्येव धारणमुक्तमिति वाच्यम् प्रयोजकत्वात् व्याप्तिनिरूपणानन्तरमित्येवं मूलपाठमनुसृत्यवा तथोपन्यासादिति भावः। ननु
संदिग्धसाध्यधर्मत्वमितिमूलस्य यदि संदेहविषयीभूतसाध्यवत्वमर्थस्तदा विनष्टवन्ह्यादेर्जलादावनुमितिर्नस्यात्तत्र तादृशसाध्याभावेन पक्षताविरहादतः साध्य
संशयस्यैव पक्षतात्वमाह पर्य्यवसितेत्यादिना यद्धर्मिकयत्संबंधावच्छिन्नयत्प्रकारकनिश्चयत्वे नयत्संशयं प्रतिनिवर्त्तकत्वं ससंदेहस्तत्पक्षकतद्धेपकानुमितौ हेतुभूता प
क्षतेत्यर्थः तेन वन्हिधर्मिकघटादिनिर्णयात्मकस्य पर्वतधर्मिकवन्हिमत्वनिश्चयस्य निवर्तनीयोपि वन्हौ घटादिसंदेहो न पर्वतपक्षकवन्ह्यनुमितौ पक्षता तत्र वन्हिमत्व
निश्चयत्वेनाप्रतिबन्धकत्वादिति भावः ~~(अत्र निश्चयत्वावच्छिन्नं तद्रूपनिश्चयत्वव्यापकत्वेनानुपलब्धं तेन ममेयं वन्हिः साध्यकेयमेव वन्हिमान ...~~
~~नवाक्यत्वादिसंग्रहः)~~। अत्र पक्षधर्मिकसाध्यवत्तानिश्चयनिवर्तनीयत्वमात्रं बाधनिश्चयेऽतिव्याप्तमतः संशयपदं न च बाधनिश्चयस्य पक्षतात्वे नक्षतिः विशिष्टबुद्धिसा राम
मान्यं प्रत्येव बाधनिश्चयस्य विरोधित्वादेव तत्रानुमित्यसंभवादिति वाच्यं संदिग्धाप्रामाण्यकबाधनिश्चयसत्वे सिद्ध्यात्मकादपि परामर्शादनुमित्यापत्तेः तादृशबा ३

धनिश्चयस्यविशिष्टबुद्ध्यप्रतिबंधकत्वात् यद्यपिनिर्वन्हिःपर्वतोरूपवान्नवेत्यादिसंदेहात्मकस्यबाधनिश्चयस्यपर्वतधर्मिकवन्हिमत्तानिश्चयनिवर्त्यत्वेसंशयत्वंवा
स्तीतिवन्हिसाध्यकपक्षतालक्षणस्यतत्रातिव्याप्तिः पक्षेसाध्यसंशयत्वोक्तौचनानुगमवार्त्तापि तथापिसंशयत्वमत्रतादृशनिश्चयाप्रतिबंधकत्वं तथाच पक्षधर्मि
कसाध्यवत्तानिश्चयनिवर्त्यत्वेसतितादृशनिश्चयप्रतिबंधकतावच्छेदकविषयिताशून्यज्ञानत्वंफलितार्थः तेनगृहीताप्रामाण्यकबाधनिश्चयस्यपक्षधर्मिकसाध्य
वत्वज्ञाननिवर्तकत्वाभावेपितन्निवर्तकतावच्छेदकविषयिताकत्वादेवव्युदासः यद्यपिचैवमपिवन्हिव्याप्यसाध्यकानुमितौवन्हिमान्नवेतिसंशयःपक्षतास्यात् । त
स्यापिपक्षधर्मिकवन्हिव्याप्यवत्वरूपसाध्यनिर्णयनिवर्त्यत्वात्तादृशनिश्चयाप्रतिबन्धकत्वाच्च नचेष्टापत्तिः पर्वतोवन्हिमान्नवेतिसंशयोत्तरं पर्वतोवन्हिव्याप्यवानि
त्येवंसाध्यनिर्णयेपिवन्हिव्याप्यसाध्यकानुमित्यापत्तेः तथापिप्रकृतपक्षविषयितावन्हिभूतसाध्यविषयिताघटितधर्मावच्छिन्नंयत्प्रकृतपक्षधर्मिकप्रकृतसाध्यव
त्तानिश्चयनिवर्त्यत्वंतन्निवेशितमित्यदोषः पर्वतोवन्हिमान्नवेतिसंशयस्यचवन्हिव्याप्यवत्तानिश्चयनिवर्त्यत्वेपितादृशनिवर्त्यतायाःपर्वतधर्मिकवन्ह्यभावप्रका
रत्वेनैवावच्छेद्यतयावन्हिव्याप्यवत्वरूपसाध्यवत्वविषयितानवच्छेद्यत्वात् नचतथापिवन्हिभूतांतद्दलंव्यर्थमितिवाच्यं वन्हिव्याप्यवत्त्वधर्मोपर्वतोवन्हिमान्न
वेतिसंशयस्यतादृशपर्वतत्वावच्छिन्नपक्षकवन्हिव्याप्यसाध्यकानुमितौपक्षतात्वव्युदासकत्वात् वस्तुतस्तुपक्षविषयितावन्हिभूतेत्याद्युपहायसाध्याभावत्वा
वच्छिन्नप्रकारि त्वसाध्यविशेष्यकत्वान्यतरावच्छिन्नमेवसाध्यनिश्चयनिवर्त्यत्वंवाच्यं तेनवन्हौपक्षेवन्हेःसाध्यतायांवन्हिर्वन्हिमान्नवेतिसंशयस्यपक्षविष
यितावन्हिर्भावेणसाध्यविषयित्वाप्रसिद्धावपिनतत्राव्याप्तिः नचैवंह्रदादौवन्ह्यभावस्यानुमानेह्रदोवन्हिमान्नवेतिसंशयःपक्षतानस्यात् तन्निष्ठायास्साध्य
केचित्तु ५ वत्तानिश्चयप्रतिबध्यतायावन्हिमत्ताविषयकत्वेनैवावच्छेद्यतयासाध्याभावत्वावच्छिन्नप्रकारित्वानवच्छेद्यत्वमितिवाच्यमिष्टत्वात् ह्रदोवन्ह्यभाववान्नवेत्याः
कारकसंशयस्यैवपक्षतात्वात् साध्यपक्षभेदेनपक्षतायानानात्वाद्व्याप्यवत्तासाध्यपक्षतालक्षणएवसाध्यविषयित्वघटितधर्मावच्छिन्नप्रतिबध्यतायाःप्रवे
श्यत्वादितिवदंति वन्हिव्याप्येवन्हिव्याप्यस्यसाध्यतायांवन्हिव्याप्योवन्हिव्याप्यवान्नवेतिसंशयस्यपक्षतात्वात् न्यायनये तादृशनिश्चयायास्तादृशपक्षधर्मिक
तादृशसाध्यवत्तानिश्चयनिवर्त्यतायाःपक्षीभूतसाध्यविशेष्यकत्वावच्छेद्यत्वादितिध्येयम्) केचित्तुसंशयत्वमत्रप्रकृतपक्षविषयितानिरूपितप्रकृतसाध्य
निष्ठविषयिताकत्वमतोवन्हिव्याप्यसाध्यकानुमितौवन्हिमत्वसंशयस्यनिर्वन्हित्वसाध्यकानुमितौमहानसीयवन्हिमत्वसंशयस्यनपक्षतात्वंतस्यतादृशसाध्य
पक्षोभयवैशिष्ट्यावगाहित्वाभावात् एवंचपक्षधर्मिकसाध्यवत्तानिश्चयस्यापितादृशत्वात्तद्वारणायनिवर्त्यान्तमित्याहुस्तन्न साध्यपक्षवृत्तिनवासाध्यंपक्षनिष्ठामा

आ·प· वप्रतियोगिनवेत्यादिसंदेहस्यापिलक्ष्यत्त्वपातत्राव्याप्तत्वात् तेषांपक्षसाध्योभयवैशिष्ट्यानवगाहित्वात् पर्वतोवन्हिव्याप्यवानित्येवंसाध्यनिश्चयनिवर्तनीयस्यपर्वतो॰
४ निर्वन्हिर्वन्हिव्याप्यस्तूपर्वतवान्नवेतिसमूहालंबनस्यवन्हिव्याप्यसाध्यकानुमितौपक्षतात्वप्रसंगाच्च तस्यापिवन्हिव्याप्यात्मकसाध्यपक्षोभयवैशिष्ट्यावगाहित्वा
त् आधेयत्वसंबंधावच्छिन्नसाध्यविषयितायाः प्रवेशेतुपक्षस्साध्यवान्नवेत्यादिसंशयस्यासंग्रहापत्तेरितिदिक् यत्तुसाध्यवत्तानिश्चयनिवर्त्यसंशयत्वमित्यत्र सं॰
शयत्वंसाध्याभावनिश्चयनिवर्त्यत्वरूपंसर्वत्रग्राह्यमतोनोक्तदोषाणामवकाशइतितत्तुच्छं पर्वतत्वावच्छेदेनवन्हेः साध्यवत्तास्थलेवन्ह्यभाववत्त्ववतस्सधर्मो व॰
न्हिमत्सर्वतोवृत्त्यंनवेतिसंशयस्यपक्षतात्वापत्तेः तादृशसंशयस्यपर्वतत्वावच्छेदेनवन्हिनिश्चयस्यतदवच्छेदेनवन्ह्यभावनिश्चयस्यापिप्रतिबध्यत्वादितिदिक् इ
दन्तुचिन्त्यते अन्यत्रास्तु यथातथापिवन्हिव्याप्यवतिवन्हेस्साध्यतास्थलेतद्धर्मिकतादृशनिश्चयप्रतिबध्यस्यसंशयस्याप्रसिद्ध्याकुत्रलक्षणेनेयवन्हिव्याप्यवा
न्वान्हिमान्नवेत्यादिसंशयस्याहार्यत्वेनाप्रतिबध्यत्वादिति ननुपक्षधर्मिकसाध्यसंशयत्वंसाध्यधर्मिकपक्षवृत्तित्वसंशयत्वादिकंवालघुलक्षणंकुतः परित्यक्तमत
आह तेनेति यादृशसंबंधावगाहित्वस्यफलमाह नवेति मूलस्यस्यसाध्यधर्मवत्वमित्यस्यपरित्यागेवीजमाह नवातमइत्यादिसंदिग्धसाध्यधर्मवत्वमितिमूलस्यसं
दिग्धसाध्येधर्मत्वयस्येतिव्युत्पत्त्यायद्वृत्तित्वसाध्येसंदिग्धमितियावत् किंवासंदिग्धः साध्यधर्मोयत्रेतिव्युत्पत्त्यायथाश्रुतोर्थः तत्रप्रथमेपक्षीभूततमःसमवेतस्यद्वि
तीयेच्चधर्मात्मकगगनसाध्यस्याप्रसिद्ध्याद्वयमपिलक्षणंदुष्टमित्याशयेनतमसःपक्षतयागगनस्यसाध्यतयोल्लेखः अत्रचमतेपक्षेसाध्यवत्तासंशयोत्तरंसिद्ध्यात्मक
परामर्शात्प्यनुमितिर्भवत्येवेतिबोध्यम् नचोक्तलक्षणस्यसाध्यसंशयमात्रपरत्वेऽग्रिममूलेतस्यविशेषणत्वादिविकल्पस्यासंगतिः तत्रविशेषणोपलक्षणपदयोः
कौमिज साक्षात्परंपराकारणपरत्वात् संदिग्धंसाध्यंयत्रतद्धर्मत्वंतत्संबन्धित्वमितिव्युत्पत्त्यालब्धस्यविशेष्यकसाध्यसंशयसंबंधित्वरूपंयथाश्रुतार्थमादायैवविशेषणत्वो
पलक्षणत्वयोरग्रेविकल्पइत्याहुः तद्वैकल्यम् पक्षतावैकल्यम् ननुयोग्यतायाश्चानिरूपणादितिग्रंथेनाऽग्रेनुमित्यापाद्यसंशयस्यापियोग्यतायानिरस्यितुमु
नृ ४ चितत्वात् तदनिरसनान्मूलस्यन्यूनत्वमतआह संशयेति सिद्धिबाधयोर्जनकस्यव्याप्तिज्ञानमनोयोगादेस्सर्वत्रैवानुमितेः पूर्वसत्वाद्याचष्टे साधकेत्यादि तथाचसाध
केनबाधकेनजनितंयन्मानमितिमूलेऽन्वयः ननुपक्षधर्मिकसाध्याभावनिश्चयात्मनोबाधस्यकेवलान्वयिन्यप्रसिद्धिरतआह। केवलान्वयिनिचेतिपर्वतोनवाच्यत्व
वानित्याकारकः परात्वभावप्रतियोगितासंबंधेनवाच्यत्वाद्यवगाह्यपिबाधःखंडशःप्रसिद्ध्यातत्रसंभवतीत्यावेदयितुंसुलभइत्युक्तं नचैवंनानाविधानांबाधबुद्धीना नाम·
मनुगमासंभवः प्रातिस्विकरूपेणतेषांनिवेशेतुनाप्यभावद्वयमितिमूलासंगतिर्बाधाभावस्यानेकत्वादितिवाच्यं पक्षधर्मिकसाध्यवत्ताज्ञानविरोधिनिर्णयत्वेनतासाम ४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुगमादितिभावः मूलेप्रत्यक्षपरिकलितमिति प्रत्यक्षपरिकलितत्वविशिष्टविषयकोनुमानजन्योबोधस्तद्विच्छावंतइत्यर्थः तेनोपजातप्रत्यक्षविषयत्वदशायामे
वानुमितिविषयत्वलाभान्नवचनयोर्विरोधस्यासंगतिरिति ध्येयं तत्रापीति अनुमित्सानाशस्थलेपि पुनरिति उत्पन्नपरामर्शानन्तरमित्यर्थः ननुपुनरनुमित्सार्थमनु
मितीष्टसाधनताज्ञानस्यपूर्वमपेक्षणात्तेनैवप्राक्तनपरामर्शनाशात्कुतस्तत्रानुमितिस्स्यादत आह ततःपरामर्शान्तरमिति ततोनुमितिरित्यग्रेन्वयः इष्टसाधनता
ज्ञानपरामर्शयोः पृथक्कल्पने गौरवादाह स्मरणात्मकेति विशिष्टानुभवंप्रत्येवविशेषणज्ञानस्यसाक्षाद्धेतुतयातादृशविशिष्टपरामर्शार्थंविशेषणज्ञानकल्पनेगौरव
मपिनास्तीत्यावेदयितुंस्मरणात्मकाद्धूत्युक्तं नचोक्तपरामर्शानंतरमनुमित्सादशायामनुमितिप्रसंगः सामग्रीसत्वादितिवाच्यं सिषाधयिषारूपायाःपक्षतायाःप्रा
६ गसत्वादिच्छासामग्र्याएवप्रतिबंधकत्वाच्चेतिभावः कल्पनीयमिति नचैतावतापिप्रत्यक्षाद्भिन्नंवन्हिज्ञानंजायतांवन्ह्यनुमितिर्जायतामित्यादिरूपाणामनुमि
त्साव्यक्तीनामनुगतरूपविरहात्कारणत्वासंभवइतिवाच्यं यद्यनुमित्सासत्वएवयत्पक्षकयत्साध्यकानुमितिस्तदनुमित्साविरहकूटत्वावच्छिन्नाभावत्वेनैव
तत्पक्षकतत्साध्यकानुमितावनुमित्सायाहेतुत्वसंभवादितिभावः यत्तुयत्पक्षकयत्साध्यकानुमितिनिवर्त्यानुमित्सात्वेनैवतत्पक्षकतत्साध्यकानुमितौहेतुत्व
मिति तन्नतादृशानुमितित्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वस्योक्तावशाब्दज्ञानंजायतामित्याकारानुमित्साया असंग्रहापत्तेः तस्यामशाब्दज्ञान
त्वेनप्रतिबंधकत्वात्प्रकृतपक्षसाध्यकानुमितिनिष्ठप्रतिबंधकतामात्रस्योक्तौचसमूहालंबनतादृशानुमितिप्रतिबध्यतामादायघटाद्यनुमित्सायामतिव्याप्त्या
पत्तेरिति ध्येयं मिश्रमतमाशंक्यनिषेधयति नचेति वाच्यमित्यन्वयः अनुमितिजनकेति तत्पुरुषीयतत्पक्षकतत्साध्यकानुमितौतादृशानुमितिजनकेच्छैवपक्षते
त्यर्थः विषयितयाधात्वर्थान्वयिनएवसनः समानकर्तृत्वस्यतंत्रत्वादितिभावः सुलभेति तथाचघनगर्जिताद्यनुमितौनव्यभिचारइतिभावः तस्याईश्वरेच्छायाः त
दानींसिद्धिदशायांनतज्जनकत्वं नतादृशानुमितिजनकत्वंतद्धितादृशानुमितिजनकत्वं त्वं नपायात् स्वरूपतःसत्वात् नचतत्पुरुषीयतादृशानुमितिंप्रतित
त्पुरुषीयतादृशानुमित्यव्यवहितप्राक्क्षण वृत्तित्वविशिष्टेच्छात्वेनहेतुत्वात्तदानींस्वरूपयोग्यत्वमेवनास्तीतिवाच्यं कार्याव्यवहितपूर्ववर्त्तित्वादिनाहेतुत्वस्या
ग्रेसार्वभौमनिरुक्तौनिरस्यत्वादितिभावः तदुपधानंतादृशानुमितिविशिष्टत्वंतदभावादिति तथाचासत्सामपिसिद्धावनुमितिर्नस्यात्त्वदुक्तैतकानुमित्यनंतरमेवानुमि
त्यंतरंस्यादितिभावः तत्सामग्रीति तत्पुरुषीयतत्पक्षकतत्साध्यकानुमितिसामग्रीविशिष्टत्वमेवतादृशानुमितिजनकत्वमित्यर्थः प्रसंगादिति तथाचपरामर्शादिकंहेतु
र्नस्यात् अवच्छेदकत्वादितिभावः इष्टापत्तौबाधकमाह प्रागेवेति तादृशानुमितिसामग्रीविशिष्टत्वेनैवहेतुत्वसंभवादिच्छाभागस्यवैयर्थ्यादित्यर्थः नचात्रसामग्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·प· पदेनेच्छेतरकारणस्तोमएवधर्त्तव्यस्तथाचसिद्धिकालीनपरामर्शस्यापितादृशस्तोमविशिष्टत्वादिति ततोऽनुमितिवारणार्थमेवेच्छाभागः प्रवेशनीयः इति वाच्यं सिद्धि
५ दशायामिच्छान्यस्यानुमितिकारणस्तोमस्यासत्वात् अन्यथा तादृशस्तोमविशिष्टायामपवदिच्छास्तदानीमपिसत्वादिच्छानिवेशेपितत्रानुमितेर्दुर्वारतापत्तेः घनग
र्जितायनुरोधेनतादृशेच्छायाः सामानाधिकरण्यप्रत्यासत्त्याहेतुत्वासंभवादिति भावः नन्वीच्छाभागोनदेयंतादृशानुमितिसामग्रीविशिष्टत्वेनैवहेतुत्वंवाच्यंतथैवानु
मित्सायाः सर्वत्रहेतुत्वसंभवादित्यतआह तदानीमिति सिद्धिदशायां यत्कारणाभावप्रयुक्तः सामग्रीविरहः तत्कारणस्येत्यर्थः। वक्तव्यतापातादिति तथाचावश्यकत्वा
त्सैवपक्षतेति भावः ननुक्रमोत्पन्नानां सिद्धीच्छापरामर्शानां युगपदसत्वात्सहकृतौ तद्दलं व्यर्थमत आह यत्रेति पक्षस्मरणमिति तदनन्तरं चानुमितिरित्यग्रेऽन्वयः
विशिष्टानुभवं प्रत्येव विशेषणज्ञानस्य हेतुत्वात्तदपेक्ष्य गौरवं नास्तीत्याशयेन स्मरणपर्यंतानुधावनं अत्रानुमित्सार्थमनुमितीष्टसाधनताज्ञानानन्तरं कल्प्यमतो
लाघवादाह अनुमितीत्यादि तादृशस्मरणादिति साध्यतद्व्याप्यविशिष्टपक्षस्मरणादित्यर्थः। अनुमित्सेति तदनन्तरं चानुमितिरित्यग्रेणान्वयः स्मृत्यात्मकसिद्धौ
सहकृतौ तविशेषणस्य प्रयोजनमुक्त्वाऽनुभवात्मकसिद्धौ तदाह पूर्वकालेत्यादिना ज्ञानेच्छयोर्यौगपद्यादनुमित्साजन्मक्षणे विशेषणस्मरणस्यासंभवादुत्तरक्षणे
तत्स्मरणे तु परामर्शदशायामनुमित्सानाशात्तत्र पक्षतेव नोपपद्यत इत्यत उक्तं पूर्वकालोत्पन्नेति अनुमित्सापूर्वकालोत्पन्नेत्यर्थः अनुमित्सायाः पूर्वं पक्षसन्निकर्षेऽनु
मित्सामवधूय वन्ह्यादिसाध्यकतद्व्याप्यवत्वेन पर्वतादेः प्रत्यक्षमेव स्याद्बहिरर्थे लौकिकप्रत्यक्षसामग्र्याः सर्वतो बलवत्वादनुमित्सानन्तरं सन्निकर्षे च परामर्शदशायां
नानुमित्सायाः सत्वमत उक्तमनुमित्साकालेति इदमुपलक्षणं यत्रानुमितीष्टसाधनताविषयकस्य साध्यतद्व्याप्यविशिष्टस्य प्रत्यक्षानन्तरमनुमित्सा तत्रापि पक्षतासं
पत्त्यर्थं सहकृतत्वं बोध्यं पक्षतासंपत्तय इति नचानुमित्सादशायामपि घटाद्यवच्छेदेन तदभावस्यात्मनि सत्वात्पक्षताभंगप्रसंगः देशानवच्छिन्नविशेषणतयैव सामा
नाधिकरण्यरूपस्यानुमित्साविरहवैशिष्ट्यस्योक्तत्वादिति ननु सिद्धिगोचरेच्छामात्रस्य सिषाधयिषात्वे द्रव्यत्वेन द्रव्यज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपराम
र्शाद्वन्ह्यनुमितिः स्यादत आह सिषाधयिषेति तत्साध्येति प्रकृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारिकेत्यर्थः तेन वन्हिविशिष्टह्रदाद्यप्रसिद्धाव
पि ह्रदो वन्हिमानित्याद्यनुमितौ न पक्षताहानिः नवा पाषाणमयत्वेन पर्वते तेजस्त्वेन वन्ह्यनुमितिर्जायतामितीच्छायामपि सिद्धिदशायां पर्वतो वन्हिमानित्यनुमिति
त्वादिच्छायाः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्हित्वावच्छिन्नाधेयताद्यनवगाहित्वादिति भावः वन्हिमत्त्वेन पर्वतस्य प्रत्यक्षं जायतामितीच्छावारणार्थमाह अ राम
नुमितिविषयिणीति यत्किंचिदिति द्रव्यत्वेन द्रव्यगोचरज्ञानं जायतामितीच्छायामपि वन्हेः सिद्ध्यात्मकपरामर्शादनुमित्युत्पादादित्यर्थः तेन ज्ञानं जायतामितीच्छोत्तरं ५

CC-0. In Public Domain. Digitization by eGangotri

सिद्ध्युत्पादेवक्ष्यमाणस्वविषयसिद्ध्यनुपहितत्वविशेषणादेवतदिच्छावारणं सिद्ध्युत्तरंचतादृशेच्छानभवत्येव ज्ञानमात्रस्यैव ज्ञानत्वप्रकारिकेच्छाविरोधित्वादितिमनु
क्तं नन्वनुमितिविषयत्वेनानुमित्साव्यक्तीनां प्रवेशे गौरवादनुमितित्वप्रकारिकेच्छत्वप्रवेश्यतामत आह अनुमितित्वेति सिद्ध्यात्मकपरामर्शोत्तरं पर्वते वन्हिज्ञानं जा
यतामितीच्छैव नोत्पद्यते सिद्धिविरोधित्वात् सिद्ध्यात्मकपरामर्शपूर्वकालोत्पन्नायास्तादृशेच्छाया नानुमितावुपयोगः स्वविषयसिद्ध्यनुपहितत्वाभावादतः प्रत्यक्षाद्य
तिरिक्तमित्युक्तं अनुमित्सात्वावच्छेति तथा च व्यभिचाराल्लाघवमकिंचित्करमिति भावः ननु यत्र वन्हिमत्त्वेन पर्वतस्य प्रत्यक्षं जायतामितीच्छैव प्रत्यक्षत्वेनानुमिति
मवगाह्य वृत्ता तत्रापि सिद्धौ सत्यामनुमित्यापत्तिः किंच प्रकृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारकेच्छाया एवोत्तेजकत्वे वन्हिभिन्नान्यविधेय
कानुमितिर्जायतां प्रत्यक्षादिभिन्नं वन्हिविधेयकं ज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शादनुमितिर्न स्यात् तथा च तादृशतादृशेच्छानामप्युत्तेजकत्वं वा
च्यमित्यननुगमइत्यत आह यादृशेति। सिद्धिसमानकालीनानामनुमितिप्राक्क्षणावस्थायि सिसाधयिषाणामुत्तेजकविधया पक्षतायां प्रवेशो व्यर्थः कारणतावच्छे
दकगौरवापादकत्वस्यात्तः सिद्धौ सत्यामित्युक्तम् अनेकेकारानुमित्साव्यक्तीनामननुगतरूपेणोत्तेजकत्वलाभार्थं यादृशयादृशेत्युक्तमिति प्राचः वस्तुतो यद्यदि
च्छाव्यक्तिसत्त्वइत्येव वक्तव्यं अन्यथा यत्र सिद्ध्यात्मको वन्हिमात्रपरामर्शस्तत्रानुमितिर्जायतामितीच्छायामपि वन्ह्यनुमित्युत्पादादनुमितित्वप्रकारकेच्छात्वे
नाप्युत्तेजकतया यत्र सिद्ध्यात्मको वन्हिपरामर्श एव सिद्ध्यनात्मकद्रव्यत्वादिसाध्यकः परामर्शस्तत्रानुमितिर्जायतामिच्छादशायां वन्ह्यनुमित्यापत्तेः एवं पर्वतमा
त्रपक्षकात्सिद्ध्यात्मकपरामर्शाद्वन्ह्यनुमितीच्छाया पर्वते वन्ह्यनुमितिस्तत्र वन्ह्यनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वे यत्र पर्वते महानसे च वन्हिव्याप्यवत्त्वपरा
मर्श एव पर्वते सिध्यात्मकः तत्रापि वन्ह्यनुमितिर्जायतामित्याकारकेच्छायां पर्वते वन्ह्यनुमित्यापत्तेः न चेष्टापत्तिरनुभवविरोधात् प्रकारांतरेण विषयपर्यवसान
संभवेनानुमित्सानामवगतार्थगोचरज्ञानाजनकत्वाद्रूपाकं तु समूहालंबनस्थलीयतत्तद्व्यक्तीनामुत्तेजककोटावप्रविष्टत्वान्न दोष इति परं तु तत्पक्षकतल्लिंगकानु
मितित्वावच्छिन्नप्रकारस्यैव पक्षतायाः कारणत्वमिति कल्प्यतल्लिंगकतत्पक्षकतत्साध्यकानुमितिप्रकारिकेच्छात्वाद्यवच्छिन्नाभावोऽनुगतरूपेणैव पक्षतायां लाघवा
न्निवेशनीयो ननु तत्तदिच्छाव्यक्तीनामभावसमुदाय इत्याशयेनैव यादृशेच्छेत्युक्तमिति ध्येयं इच्छाभावसमुदायस्येति इदमुपलक्षणं सिसाधयिषाधर्मि[illegible]यदाद्यप्रामाण्य
ज्ञानसत्त्वे सिद्धिदशायामनुमितिस्तत्तदप्रामाण्यज्ञानाभावसमुदायस्यापि सिद्धौ विशेषणत्वं बोध्यमत एव मिश्रैरनुमितिग्रंथेऽप्रामाण्यज्ञानास्कंदितायाः सिद्धेरप्रति
बंधकत्वमुक्तं नस्यातिरिति यद्यपि एवमपि तत्तदिच्छाविरहव्यक्तीनां विशेष्यविशेषणभावे विनिगमनाविरहेणानंतकार्यकारणभावः न चैकेच्छाविरहविशिष्टोऽपरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·प च्छाविरहस्तद्विशिष्टसिद्धित्वेन प्रतिबंधकत्वे सामानाधिकरण्यात्मकवैशिष्ट्यस्य द्विधाप्रवेशे गौरवमतस्तावतीनामिच्छाविरहव्यक्तीनामेकत्र द्वयमिति रीत्या युगपद्देव सि
६ द्धिविशेषणत्वं लाघवादिति वाच्यं सिद्धौ तावदिच्छाविरहवैशिष्ट्येपि सिद्ध्यंशे प्रसक्ततत्तदभावसामानाधिकरण्यस्य वैशिष्ट्यविधया प्रवेशात् सिद्धौ तावदभाववैशिष्ट्य
स्यैव तत्तदेकाभावेऽपराभाववैशिष्ट्यप्रवेशे गौरवानवकाशात्। तथापि सिद्धौ तत्तदभावानां युगपद्विशेषणत्वे वैशिष्ट्यरूपसामानाधिकरण्यवृत्तित्वांशस्य सकृदेव प्रवेशाल्ला
6 घवं प्रत्येकाभावेऽभावान्तरवैशिष्ट्यस्यासंबंधत्वे तु वैशिष्ट्यघटकवृत्तित्वस्य बहुशः प्रवेशे गौरवमतो युगपदेव तावतीनामभावव्यक्तीनां सिद्धिविशेषणत्वं लघुकल्प्यं किन्न सिद्धौ
तावदभावस्य युगपद्विशेषणत्वे विशेषणतासंबंधावच्छिन्नाधिकरणसमवेतत्वमेवानुगतस्संबंधस्तत्त्वेकाभावेऽपराभाववैशिष्ट्यविशेषणताविशेषावच्छिन्नाधिक व
रणे विशेषणतया वृत्तित्वसिद्धावभावान्तवैशिष्ट्यं तु विशेषणताविशेषावच्छिन्नाधिकरणे समवेतत्वमित्यनुगतवैशिष्ट्यासंभवात् एवं नैकाभावविशिष्टापराभावविशिष्ट
सिद्धित्वेन प्रतिबंधकत्वं किन्तु तावदभावविशिष्टसिद्धित्वेनैवेति दिक्। स्वतन्त्रास्तु तत्तदिच्छाविरहकूटविशिष्टसिद्धित्वावच्छिन्नाभावस्याखंडस्य तत्तद्व्यक्तित्वेन वहे
तुत्वं तत्तद्व्यक्तित्वं च तादात्म्यं न सैव व्यक्तिरित्यदोषः चिन्तामणिकृन्मते विशिष्टाभावस्यातिरिक्तत्वात् न च कारणतामात्रस्य धर्मावच्छेद्यत्वे मानाभावाद्वावच्छेद
के विनैव तादृशसिद्ध्यभावस्यानुमितिकारणत्वमिति प्रलापोऽपास्तः व्यापकतागर्भायाः कारणताया अवच्छेदकस्य नानाव्यक्तिस्थलइवैकव्यक्तिस्थलेपि संभवेन वार
यितुमशक्यत्वात् पदार्थान्तररूपायास्तु कारणताया अवच्छेदकस्य नानाधिकरणेष्वपि परित्यागप्रसंगादित्याहुस्तच्चिन्त्यम्। केचित्तु पक्षधर्मिकसाध्यविधेयकानुमि
तित्वप्रकारिकेच्छात्वेनैवानुगतरूपेणोत्तेजकत्वाल्लाघवात् इच्छान्तरस्थले च तादृशेच्छोत्तरं सैवानुमितिस्तत्रैव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तेरिति प्राहुः। आलो
कपरामर्शादिति। आलोकमात्रपरामर्शादित्यर्थः तदन्यथेति धूमेनालोकेन वा पर्वते वन्ह्यनुमितिर्जायतामितीच्छायामपि धूमलिंगकानुमित्यर्थं मात्रपदं। तथा च धूमलिंग
कानुमित्साविरहविशिष्टैवालोकलिंगकानुमित्सा धूमलिंगकानुमितौ प्रतिबंधिकेत्यर्थः अत्र यद्यपि धूमलिंगकानुमितित्वप्रकारिकेच्छात्वेनैवोत्तेजकत्वे धूमेन द्रव्यत्व
स्यालोकेन च वन्हेः पर्वतेऽनुमितिर्जायतामितीच्छायामपि वन्हिव्याप्यधूममात्रपरामर्शाद्धूमलिंगकानुमित्यापत्तेः धूमलिंगकवन्ह्यनुमितित्वप्रकारीच्छात्वेन तथात्वे तु धू
मेन महानसादावालोकेन च पर्वते वन्ह्यनुमितिर्जायतामितीच्छायामपि धूममात्रपरामर्शात्पर्वते वन्ह्यनुमित्यापत्तेः न च पर्वतपक्षकधूमलिंगकवन्ह्यनुमितौ तादृशानुमिति राम·
त्वप्रकारिकेच्छाविरहविशिष्टालोकलिंगकेच्छात्वेनैव प्रतिबंधकत्वं, धूमेनालोकेन वानुमितिर्जायतामितीच्छायामपि धूममात्रस्य परामर्शाद्धूमलिंगकानुमित्यभावापत्ते ६
स्तदिच्छायाः पर्वतपक्षकवन्ह्यनुमितित्वप्रकारकत्वाभावात् तथापि यद्यदिच्छाव्यक्तिदशायामालोकलिंगकानुमितीच्छाव्यक्तिसत्त्वेपि पर्वतधर्मिकधूमलिंगकवन्ह्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुमितिर्प्रामाणिकी तत्तदिच्छाविरहकूटविशिष्टालोकलिंगकानुमितित्वप्रकारिकेच्छात्वेनैव तादृशधूमलिंगकानुमितिप्रतिबंधकत्वं वाच्यमत एवालोकलिंगिकासतीयाधूमलिंगिका
पर्वतेवन्ह्यनुमितिः साजायतामितीच्छासत्वे पर्वतधर्मिकधूममात्रपरामर्शान्नवन्ह्यनुमितिस्तदिच्छाव्यक्तेरुत्तेजकानंतर्गतत्वात् नचयत्रधूममात्रपरामर्शोत्तरं धूमालोकोभयलिंगका
नुमितिर्जायतामितीच्छा तत्रास्तूभयलिंगकपरामर्शोत्पत्त्यानुमितिस्तत्र तदुभयलिंगकपरामर्शोत्पत्तिक्षणे धूमलिंगकानुमितिस्स्यादग्रिमानुमित्यनुरोधेन तदिच्छाव्यक्तेरुत्तेजकत्वादिति
वाच्यं तत्र समूहालंबनपरामर्शव्यक्तिविशिष्टतत्तदिच्छाव्यक्तित्वेनैवोत्तेजककोटौ निवेश्यत्वात् इत्थं चालोकेन महानसे वन्ह्यनुमितिर्जायतामितीच्छासत्वेपि धूमपरामर्शात्पर्वते वन्ह्यनुमितिः
रप्रत्यूहैव तदिच्छाव्यक्तेरपि स्वस्मिन्नुत्तेजकत्वात् अत एवालोकेन वह्न्यनुमितिर्जायतामितीच्छोत्तरं धूमालोकयोः समूहालंबनपरामर्शात्पर्वते वन्ह्यनुमितिर्नस्यात्तस्या
अ पि धूमपरामर्शाव्यवहितोत्तरत्वेन धूमलिंगकानुमितित्वात्तादृशानुमितिविरोध्यालोकलिंगकानुमितित्वाया स्त्वादितिपरास्तम् तदिच्छाव्यक्तेरप्युत्तेजकत्वात्तत्र धू
मलिंगकत्वप्रकारिकेच्छात्वेनोत्तेजकत्वासंभवस्यानुपदमुक्तत्वात् यत्तु पर्वतधर्मिकवन्ह्यनुमितिसामान्यप्रत्यालोकादिलिंगकपरामर्शाभावविशिष्टालोकादि
मात्रलिंगकानुमितित्वत्वेन प्रतिबंधकत्वं वाच्यं नतु धूमादितत्तल्लिंगकानुमितित्वावच्छिन्नं प्रति तदन्यलिंगकानुमितित्वत्वेन प्रतिबंधकत्वं कार्यतावच्छेदकगौरवापत्तेः
तथा चोक्तस्थले आलोकलिंगकपरामर्शसत्वेन तल्लिंगकानुमितित्वानानुमितिप्रतिबंधिका नच मात्रपदवैयर्थ्यं धूमपरामर्शोत्तरमालोकेन धूमेन वा वन्ह्यनुमितिर्जायता
मितीच्छादशायामनुमित्यर्थं तदुपादानादिति तन्न धूमपरामर्शदशायामालोकेन भस्मना च वन्ह्यनुमितिर्जायतामिच्छासत्वेप्यनुमितिप्रसंगात् आलोकपरामर्शाभाव
विशिष्टाया अपि तादृशेच्छाया आलोकलिंगकत्वमात्राप्रकारकत्वात् नचालोकलिंगकपरामर्शाभावविशिष्टेन धूमलिंगकत्वाप्रकारकालोकलिंगकानुमितित्वत्वेन पर्वत
धर्मिकवन्ह्यनुमितिसामान्यप्रतिविरोधित्वान्नैष दोष इति वाच्यं भस्मलिंगकपरामर्शोत्तरमप्यालोकेन धूमेन च वन्ह्यनुमितिर्जायतामितीच्छासत्वे वन्ह्यनुमितिप्रसं
गात्तादृशेच्छाया धूमलिंगकत्वप्रकारकत्वेनाविरोधित्वात्तस्मात्तल्लिंगकानुमितित्वावच्छिन्नं प्रतिप्रागुक्तक्रमेण तत्तदन्यमात्रलिंगकानुमितित्वत्वेन प्रतिबंधकत्वमेवस्र
म्यगिति दिक्। यदि चेत्तत्रेति। अन्यसाध्यकानुमितित्वाया इवान्यलिंगकानुमितित्वाया अपि स्वतः प्रतिबंधकत्वे मानाभावादिति भावः तत्रैति सिद्ध्यात्मकालोकपरामर्शो
त्तरं धूमेनानुमिनुयामीतीच्छादशायामनुमितिवारणायेत्यर्थः नचतत्तदनुमित्साव्यक्तीनामुत्तेजककोटौ प्रवेशादेव न तत्रानुमितिरिति वाच्यं यत्र सिद्ध्यात्मकालोक
परामर्शोत्तरं धूमलिंगकानुमित्सा ततः क्रमेण सिद्ध्यात्मकधूमपरामर्शाद्वन्ह्यनुमितिस्तत्र धूमपरामर्शोत्पत्तिक्षणे वन्ह्यनुमित्यापत्तेः पर्वतपक्षकवन्ह्यनुमितौ तदिच्छा
व्यक्तेरप्युत्तेजकत्वात् अन्यथा तत्रैव सिद्ध्यात्मकधूमपरामर्शाद्वन्ह्यनुमितिर्नस्यादिति भावः। यद्यपि वक्ष्यमाणस्वविषयसिद्ध्यनुपहितत्वविशेषणेनैव धूमादिलिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परा

जा॰प॰ गकतत्तत्परामर्शविशिष्टायां तत्तदिच्छाव्यक्तेरुत्तेजकतायां न कोपि दोषः प्रागुक्तस्थले धूमपरामर्शविशिष्टानुमित्साव्यक्तिविरहसहकृतसिद्धिसत्वादेव धूमपरामर्शोत्त

७ त्तिदशायामपि अनुमित्सापत्तेरसंभवात् तथापि मिश्रादिसंमतमेकावच्छेदेन पक्षतापरामर्शोभयजन्यत्वमनुमितेस्संपाद्यितुमनुमित्सामेवान्यथानिर्वक्ति तल्लिंगका

नुमित्सेति वाच्येति परेणान्वयः ननु तल्लिंगकानुमितित्वप्रकारिकेच्छाव्यक्तौ नामुत्तेजकत्वं वन्ह्यनुमितिर्जायतामितीच्छायां सिद्ध्यात्मकालोकपरामर्शादालोकलिं

गकानुमितिर्नस्यात्तदिच्छाव्यक्तेरालोकलिंगकत्वाप्रकारकत्वादत आह तदन्यमात्रेति धूमालोकाभ्यां वन्ह्यनुमितिर्जायतामितीच्छादशायां सिद्ध्यात्मकालोकपरामर्शाद

नुमित्स्यर्थं मात्रपदं तथा च तल्लिंगकानुमितित्वाप्रकारकत्वे सति यायत्किंचिल्लिंगकानुमितित्वप्रकारिकेच्छा तदतिरिक्तानुमित्सासिषाधयिषापदेन वाच्येत्यर्थः तेन

प्रमेयलिंगकानुमितिस्थले तदन्यलिंगाप्रसिद्धावपि न क्षतिः अत्र तदन्यमात्रलिङ्गकानुमित्सातिरिक्तं न विशेषणं किंतूत्तेजकीभूततत्तदिच्छाव्यक्तीनां परिचायकमिति म

न्तव्यम् ननु तल्लिंगकानुमित्साविरहविशिष्टसिद्धिसत्वेप्यन्यलिंगकानुमित्सान्यलिंगकपरामर्शोत्तरं प्रकृतपक्षसाध्यानुमितेरुत्पादेन व्यभिचारात्कुतः पक्षताया अ

नुमितिहेतुत्वमित्यत आह। लिंगेति लिंगविशेषनियंत्रितं लिंगविशेषावच्छिन्नकार्यताकम् तथा च यद्यदनुमित्साव्यक्तिसत्वे सिद्धिदशायां तल्लिंगकतत्पक्षकतत्साध्य

कानुमितिर्जायते तत्तदिच्छाव्यक्तिविरहविशिष्टसिद्ध्यभावस्तल्लिङ्गकतत्साध्यकानुमितित्वावच्छिन्नं प्रत्येव हेतुरतो न व्यभिचार इति भावः अन्यलिंगकानुमित्साया

स्तल्लिंगकानुमितौ स्वातंत्र्येण विरोधित्वे पक्षताया लिंगविशेषानियंत्रितत्वेपि न क्षतिरित्याह तल्लिंगकानुमिताविति सिद्ध्यभावदशायामन्यलिंगकेच्छासत्वेपि तल्लिंग

कानुमित्स्युत्पत्तेराह सिद्धिकालीनेति सिद्धिविशिष्टेत्यर्थः तल्लिंगकानुमित्सासत्वेऽन्यलिंगकानुमित्सायास्तल्लिंगकानुमित्यप्रतिबंधकत्वादाह तल्लिंगकानुमितीच्छावि

शेषविरहकूटविशिष्टेति तल्लिंगकानुमितित्वं तल्लिंगकपरामर्शाव्यवहितोत्तरानुमितित्वं तथा चालोकलिंगकानुमित्सादशायां धूमालोकयोः सिद्ध्यात्मकपरामर्शोत्तरं पर्वते

वन्ह्यनुमितिर्नस्यात्तस्यापि निरुक्तधूमलिंगकत्वेनालोकलिंगकानुमित्साप्रतिबध्यत्वादतो विशेषपदम् तेन वस्तुगत्या तल्लिंगकानुमितिगोचरयद्यदिच्छाव्यक्तिसत्वेन्य

लिंगकानुमित्साकाले तल्लिंगकानुमितिर्जायते तत्तदिच्छाविरहकूटविशिष्टान्यलिंगकानुमित्सात्वेनैव तल्लिंगकानुमितौ प्रतिबंधकत्वमुक्तस्थले चालोकलिंगकानुमि

त्साव्यक्तेरपि वस्तुगत्या धूमलिंगकानुमितिगोचरतया तदिच्छाव्यक्तेरुत्तेजककोटौ निविष्टत्वान्न दोषः विशेषपदासत्वपक्षेपि तल्लिंगकानुमित्साविरहविशिष्टत्वस्यो

क्तेरवार्यत्वः अत्रापि वैशिष्ट्यमेकसमयावच्छेदेनैकात्मवृत्तित्वम् तेन पुरुषान्तरीयतल्लिंगकानुमितीच्छामादायान्यलिंगकानुमित्सादशायां नानुमितेरुत्पादः राम॰

न च तल्लिंगकानुमित्साभिन्नतदन्यलिंगकानुमित्सैव प्रतिबंधिकास्तु तल्लिंगकानुमित्साविरहविशिष्टत्वप्रवेशे गौरवादिति वाच्यं यत्र सिद्ध्यात्मकापेक्षाबुद्ध्यात्मकधूमप ७

रामर्शोत्सरंक्रमेणालोकलिंगकानुमितित्वप्रकारेण धूमलिंगकानुमितित्वप्रकारेणेच्छाद्वयीतत्र चतुर्थक्षणे धूमलिंगकानुमित्यनुत्पादापत्तेः धूमलिंगकानुमित्साभि
न्नायाएवालोकलिंगकानुमित्सायाः सत्वादितिभावः अन्यलिंगकानुमित्सैववेतिवाकारो नास्थायाम् पूर्वकल्पोक्तस्य तल्लिंगकानुमित्साविरहविशिष्टसिद्ध्यभावत्वे
नतल्लिंगकानुमितिहेतुत्वस्यलाघवेनतदपेक्ष्यए तत्कल्पस्यगुरुत्वात्तत्पक्षसाध्यकानुमितौसामान्यतः सिषाधयिषाविरहविशिष्टसिद्ध्यभावत्वेनकारणान्तरस्या
प्यत्रकल्प्येवक्तव्यत्वादन्यथासिद्ध्यात्मकपरामर्शमात्रादनुमित्यापत्तेस्तादवस्थ्यादितिध्येयं ननुसाधनानंसिद्धिजनकमानं तथाचपरामर्शमात्रादप्यनुमितिर्नस्या ८४
त्तस्यैवतादृशसाधकमानत्वादतोव्याचष्टेसाध्यवत्वनिश्चयइति साध्यवत्वसंशयेप्यनुमित्युत्पादान्निश्चयइत्युक्तम् यद्यपिसाध्यवत्वनिश्चयत्वं यदिसाध्यसामा
न्याभावाप्रकारकत्वेसतिसाध्यप्रकारकत्वं तदापर्वतः कपिलवन्हिमान्नवेतिसंदेहदशायांपर्वतोवह्निमानित्यनुमितिर्नस्यात्तादृशसंदेहस्यापिवन्हिसामान्याभावा
प्रकारकत्वेसतिवन्हिप्रकारकत्वात् नचयेनरूपेणसाध्यतातन्मात्रावच्छिन्नप्रकारकत्वनिश्चयत्वघटकमतः कपिलवन्हित्वावच्छिन्नप्रकारताकसंदेहस्यवन्हित्व
मात्रावच्छिन्नप्रकारताकत्वाभावान्नदोषइतिवाच्यं पर्वतः कपिलवन्हिमानितिनिश्चयदशायामपिपर्वतोवन्हिमानित्यनुमित्यापत्तेस्तादृशनिश्चयस्यवन्हित्व
मात्रावच्छिन्नप्रकारकत्वाभावात् नचेष्टापत्तिरनुभवविरोधात् अतएवगवाश्रितत्वेसाध्येसकलगवाश्रितत्वंनहेतुरविशिष्टसाध्यवत्वानुमितौविशिष्टसाध्यवत्ता
ग्रहस्यापिविरोधितयापक्षधर्मताग्रहदशायांसिद्धसाधनादितिशक्तिवादेमिश्रैरप्युक्तं यदिचसाध्यप्रतियोगिकाभावाप्रकारकत्वेसतिसाध्यप्रकारकत्वमेवसाध्यनिश्च
यत्वंतदारुणवन्हिशून्यः पर्वतोवन्हिमानित्येवंनिश्चयेपिपर्वतोवन्हिमानित्यनुमित्यापत्तिः उक्तनिश्चयस्यवन्हिप्रतियोगिकाभावप्रकारकत्वेनाविरोधित्वात् तथा
पिवन्हित्वावच्छिन्नविधेयकानुमितिंप्रतिवन्हिसामान्याभावाप्रकारकवन्हिमात्रावच्छिन्नप्रकारकत्वेनकपिलवन्ह्यभावाप्रकारककपिलवन्हित्वावच्छिन्नप्रकार
कत्वादिनाचप्रत्येकधर्मेणैवप्रतिबंधकत्वात् तत्तत्सिद्ध्यभावकूटस्यैवपक्षतात्वं विरोधिसाध्यनिश्चयानामनुगतैकधर्माभावात् तत्तत्साध्यतावच्छेदकाव
४८ च्छिन्नप्रकारतान्यप्रकारत्वानिरूपितप्रकृतपक्षनिष्ठविशेष्यताज्ञानत्वमेवसाध्यनिश्चयत्वंवाच्यं पर्वतः कपिलवन्हिमान्नवेत्यादिसंशयेतुपर्वतनिष्ठविशेष्यत्व
वन्हित्वावच्छिन्नप्रकारत्वभिन्नेन कपिलवन्ह्यभावत्वावच्छिन्नप्रकारत्वेननिरूपितमतस्तद्व्युदासः संशयविशेष्यतामात्रस्यैवप्रकारताद्वयनिरूपित
त्वादेवंचनिर्वह्निर्वह्निमांश्चपर्वतइत्यादिसमुच्चयस्यापिसाध्यनिश्चयत्वसंभवात्तत्सत्वेपिनवन्ह्यनुमितिः समुच्चयस्थलेप्रकारताद्वयनिरूपितविशेष्यताद्वयोप
गमात् भूतलंघटवत्पटवच्चेत्यादिस्थलेभूतलस्यद्विधाभानवदत्रापिपर्वतस्यप्रकारताद्वयांशेद्वैविध्येनभानादित्यन्यत्रविस्तरः तत्रपर्वतेतस्यवन्हेः धर्मित्वेति
CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा.पु. नचैवं वह्निमान् वह्निमानित्येवमप्यनुमितिः स्याद्धर्मितावच्छेदकमनन्तर्भाव्य वह्निमत्तानिश्चयस्याविरोधित्वादिति वाच्यमिष्टत्वात् वह्निमत्पक्षक वह्निसाध्यकानुमि
८ तिमन्तर्भाव्य पक्षताया हेतुत्वाकल्पनेन तदापत्त्यसंभवाच्च अत्र धर्मितेत्युपलक्षणं एकसंबंधेन साध्यवत्तानिश्चयेपि संबंधान्तरेण साध्यानुमितेरुत्पादात्संबंधविशेषो
प्यनुसरणीयः पर्वतत्वस्यावच्छेदकत्वविषयीकृत्येत्यत्र पर्वते साध्यसिद्धावप्यन्यत्र पर्वते सर्वदैवानुत्पत्तेः पर्वतत्वसामानाधिकरण्येनेत्युक्तमवच्छेदकत्वमविषयी
४ कृत्य पर्वतत्वप्रकारेणेति तात्पर्यः। तादृशानुमितिः पर्वतत्वसामानाधिकरण्येन साध्यानुमितिः। धर्मिविशेषोपीति तथाच पर्वतत्वप्रकारेण तत्पर्वतधर्मिकवन्ह्याद्यनु
मितौ पर्वतत्वप्रकारेण तत्पर्वतधर्मिकवन्ह्यादिनिश्चयत्वेनैव प्रतिबंधकत्वं वाच्यमिति भावः इदमुपलक्षणम् साध्यतावच्छेदकरूपेणैकसाध्यव्यक्तेः सिद्धावपि
विनानुमित्सामन्यसाध्यव्यक्तेरनुमितेरानुभाविकत्वे साध्यविशेषोपीत्यपि द्रष्टव्यम् अन्यथेति धर्म्यन्तरेऽनुमित्यनुत्पादे हेतुधर्मिविशेषोपि न निवेश्य इत्यर्थः
अथ तत्पुरुषीयवन्ह्यादिविधेयकानुमितिं प्रति तत्तदीयानुमित्साविरहविशिष्टतदीयवन्ह्यादिमत्तानिश्चयत्वेनैव समानविशेष्यताप्रत्यासत्या प्रतिबंधकत्वं न तु सा
मानाधिकरण्यप्रत्यासत्या तथात्वं तथा सति पर्वतत्वादिविशिष्टविशेष्यकवन्ह्यादिप्रकारकानुमितौ पर्वतत्वादिविशिष्टविशेष्यकवन्ह्यादिमत्तानिश्चयत्वेन विरो
धित्वे धर्मितावच्छेदकविधया पर्वतत्वप्रवेशान्नसत्वाद्यनेकधर्मान्तरभावेणानन्तकार्यकारणभावकल्पनापत्तेः। नन्वत्रापि पुरुषभेदेनानन्तकार्यकारणभावः त
त्पुरुषस्यापि क्वचित्पक्षतया तद्भेदेन कार्यकारणभावनानात्वस्यावश्यकर्तव्यत्वात् तथाचार्थवशात्संपन्न एवावश्यं धर्मिविशेष स्यनिवेश इति चेन्न पाषाणमय
त्वेन पर्वते वन्हिनिश्चयेपि पर्वतत्वेन तत्र वन्ह्यनुमित्युत्पत्तेः समानविशेष्यतया प्रतिबंधकत्वासंभवात् नचैकधर्मावच्छिन्नविशेष्यत्वमेव प्रत्यासत्तिरित्यदोषः पाषा
णमयत्वस्याप्येकधर्मतया तदवच्छिन्नविशेष्यत्वस्याप्यव्यावर्तकत्वात् तत्तद्धर्मावच्छिन्नविशेष्यतात्वेन प्रत्यासत्तितायां तु तद्धर्मघटितसंबंधभेदेन कार्यकार
णभावानन्त्यमत्रापि तत्पुरुषस्यावच्छेदकधर्मविधया प्रवेशे गौरवं पुनरधिकं विनिगमनाविरहेण प्रकारताप्रत्यासत्या प्रतिबध्यप्रतिबंधकभावकल्पनापत्तिश्च वस्तुत
स्तु समानविशेष्यतया विरोधित्वे यत्र पर्वतत्वचत्वरयोरेव साध्यवत्तानिश्चयात्मकः साध्यव्याप्यवत्तापरामर्शस्तदनन्तरं च पर्वतांशे साध्यवत्तानिश्चयस्याप्रामाण्यज्ञा
नं पर्वतधर्मिकानुमितिर्जायतामितीच्छा वा तत्रोत्तरकाले पर्वतद्वव चत्वरेपि साध्यानुमितिः स्यात् प्रामाण्यज्ञानाभावविशिष्टस्यानुमित्साविरहविशिष्टस्य च साध्यनिश्च
यस्य चत्वरे विरहात् तादृशअप्रामाण्यज्ञानव्यक्तेरनुमित्साव्यक्तेर्वानुत्तेजकत्वे पर्वतेऽनुमित्यनुत्पत्तेरितिदिक् पक्षतेत्यादि पक्षतावच्छेदकीभूतपर्वतत्वादिधर्माव राम.
च्छेद्यत्वमविषयीकृत्य साध्यसिद्धावपीत्यर्थः। तदवच्छेदेनेति पक्षतावच्छेदकीभूतपर्वतत्वावच्छेद्यत्वविषयीकृत्यानुमितिदर्शनादित्यर्थः। तदवच्छेदेन सिद्धिरिति। ८

पर्वतत्वावच्छेद्यत्वावगाहि सिद्धेरित्यर्थः विरोधित्वमग्रेऽन्वयः तथा च पर्वतत्वावच्छेद्यत्वावगाहि पर्वतधर्मिकवन्हिविधेयकानुमितिं प्रति पर्वतत्वावच्छेद्यत्वावगाहि पर्वतध
र्मिकवन्हिमत्तानिश्चयत्वेन प्रतिबंधकत्वं तत्र च पर्वतविशेष्यकत्वं पर्वतत्वविशिष्टविशेष्यकत्वमात्रं तेन पर्वतत्वावच्छेदेन वन्हिनिश्चयेपि पर्वतो वन्हिमानित्याकारिका
याद्रुवनीलपर्वतो वन्हिमानित्याकारिकाया अप्यनुमितेर्नोत्पत्तिः पर्वतत्वावच्छेद्यत्वं न स्वरूपसम्बन्धविशेषो मानाभावात् किंतु पर्वतत्वव्यापकसाध्यप्रतियोगिकत्वं त
दपि संसर्गमर्यादयैव भासते पर्वतो वन्हिमानित्याकारकानुमितौ पर्वतत्वव्यापकवन्हिसंयोगत्वेनैव संयोगस्य संबंधविधया भानस्वीकारात् न च पक्षतावच्छेदकव्या
पकत्वमेव तदवच्छेद्यत्वमुक्तं साध्यप्रवेशो व्यर्थ इति वाच्यं पर्वतत्वावच्छेदेन तद्रूपवत्तानुमितेः प्रमात्वापत्तेः समवायस्यैकत्वात् पर्वतत्वव्यापकसमवायेन पर्वतस्य
तद्रूपव्यक्तिमत्वात् न च पर्वतत्वव्यापकवन्हिसंयोगेन वन्हेः साधनव्यापकत्वाग्रहात् नादृशसम्बन्धेन वन्ह्यनुमित्यसंभव इति वाच्यं भेकविशेषबाधसहकारा व्यापक
तानवच्छेदकप्रकारेण वनिरुक्तसिद्ध्यभावरूपपक्षतासहकाराद्व्यापकतानवच्छेदकसंबन्धेनापि साध्यानुमितेः सामान्यपरामर्शादेव संभवात् न च पर्वतधर्मिकव
न्ह्यनुमितिमात्रं प्रत्येव पर्वतत्वावच्छेद्यत्वावगाहिनिश्चयस्य विरोधित्वात् प्रतिबध्यकोटौ पर्वतत्वावच्छेद्यत्वप्रवेशो व्यर्थ इति वाच्यं पर्वतत्वावच्छेदेन सिद्धत्वं
तदवच्छेदेनानुमित्सया पर्वतत्वावच्छेदेनैव तत्सामानाधिकरण्येनाप्यनुमित्यापत्तेः यत्तु पर्वतत्वावच्छेद्यत्वमवच्छेद्यतासम्बन्धेन पर्वतत्वादिकं वा साध्यांशे प्रकारत
येवानुमितौ भासते तथा च पर्वतः पर्वतत्वावच्छेद्यवन्हिमानित्येव पर्वतत्ववद्वन्हिमानित्येव वानुमितिरिति प्राचीनास्तन्न अन्यशिखरावच्छेदेन पर्वतो वन्हिमानित्यनु
मितौ तु पक्षतावच्छेदकीभूतशिखरावच्छिन्नत्वस्वरूपसम्बन्धरूपमेव भासते न तु व्यापकत्वलक्षणमननुभवात् एवं च तत्र शिखरावच्छेद्यवन्हिसंयोगेन वन्ह्यनु
मितौ शिखरावच्छेद्यवन्हिसंयोगेनैव वन्हिनिश्चयो विरोधी न तु संयोगमात्रेणेत्यवधेयं सामानाधिकरण्यमात्रेणेति। पक्षतावच्छेदकरूपेण पक्षे साध्यानुमि १८
तित्वमेव तत्सामानाधिकरण्येनानुमितित्वं तच्च पक्षतावच्छेदकावच्छेदेनानुमितावव्याप्तीत्यतो मात्रपदं सिद्धिमात्रस्येति तत्र पक्षतावच्छेदकसामानाधिक
रण्यमात्रेणानुमितित्वं न तदवच्छेद्यत्वानवगाह्यनुमितित्वं पर्वतत्वावच्छेदेन तत्सामानाधिकरण्येन च परामर्शाद् पर्वतत्वावच्छेद्यत्वावगाहि तदनवगाह्यनु
मित्योर्युगपदुत्पादप्रसंगात् सामग्रीसत्वात् किंतु यद्रूपेण साध्यतावच्छेदकसंबंधस्तादृशधर्ममात्रावच्छिन्नसंसर्गताकपक्षधर्मिकसाध्यानुमितित्वं निरुक्तस्थ
ले च संयोगनिष्ठद्विविधसंसर्गताकसमूहालंबनानुमितिस्वीकारात् तथा च संयोगत्वमात्रावच्छिन्नसंसर्गताकपर्वतधर्मिकवन्हिविधेयकानुमितिं प्रति संयोगत्व
विशिष्टसंसर्गताकपर्वतधर्मिकवन्हिमत्तानिश्चयत्वेनैकरूपेण सिद्धिर्न प्रतिबंधकं पर्वतत्वावच्छेदेनानुमितौ तु संयोगनिष्ठसंसर्गतान संयोगत्वमात्रावच्छि

CC-0. In Public Domain. Digitization by eGangotri

जा॰प॰ न्याकिंतु पर्वतत्वावच्छेद्यवन्हिसंयोगत्वावच्छिन्नैवेतिपर्वतत्वसामानाधिकरण्येन सिद्धिसत्वेपि तदुत्पत्तिः नचैवं संयोगमात्रेण वन्हिनिश्चयेपि पर्वतीयसंयोगेन व-
९ न्ह्यनुमितिस्स्यान्नस्याच्च पर्वतीयत्वविशिष्टसंयोगेन वन्हिनिश्चयेपि संयोगमात्रेण पर्वते वन्ह्यनुमितिरिति वाच्यमिष्टत्वात् सामान्यघटितविशेषप्रकारेण वतादृ
शसंबन्धेनापि सिद्धिः सामान्यानुमितिविरोधित्वात् एवमनयैव दिशा अन्यत्रापि प्रतिबंधकमूह्यमिति संक्षेपः इत्यन्येति पक्षतावच्छेदकावच्छेदेन सिद्ध्युत्तरं तत्सा
९ मानाधिकरण्यमात्रेणानुमित्सायामपि तदवच्छेदेनानुमित्यनुत्पत्तेः तादृशानुमितौ पक्षतावच्छेदकावच्छेदेनानुमित्सैवोत्तेजिका वाच्या एवं पक्षतावच्छेदकसा
मानाधिकरण्येन सिद्ध्युत्तरं तदवच्छेदेनानुमित्सायामपि तत्सामानाधिकरण्येनानुमित्यनुत्पत्तेस्तादृशानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमित्सैवो
त्तेजिका वाच्येति लिंग विशेषनियंत्रितत्वमिवानुमितिविशेषेणापि नियंत्रितपक्षत्वं यत्रातत्पक्षकतत्साध्यकानुमितिं प्रत्येव सामान्यतः पक्षता हेतुः पक्षतावच्छेदका
वच्छेदेनानुमितौ तदवच्छिन्नसिद्धिकालीनतत्सामानाधिकरण्यमात्रेणानुमित्सा पृथक् प्रतिबंधिका पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितावपि सामाना
धिकरण्येन सिद्धिकालीनातदवच्छेदेनानुमित्सा पृथक् प्रतिबंधिका वाच्या यदि चासत्यामपि समानाकारकसिद्धौ पक्षतावच्छेदकावच्छेद्यत्वावगाह्यनुमित्सायां
सत्यां तत्सामानाधिकरण्यावगाह्यनुमितेर्नोत्पाद इत्तदा सिद्धिकालीनत्वं प्रतिबंधकत्वे न प्रवेश्यमिति भावः साध्यविशेष्यकेति विनानुमित्सामित्यादिः तांप्रतीति
पक्षविशेष्यकानुमितिंप्रतीत्यर्थः समानाकारेति तथा च संयोगसंबन्धावच्छिन्नाधेयतासंबंधेन पर्वतनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नविधेयकताकानुमि
तिं प्रति तादृशसंबन्धावच्छिन्नपर्वतनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नविशेष्यताकनिश्चयत्वेन विरोधित्वं विधेयत्वं तु न प्रकारतानियतं किंतु पर्वते वन्हिः।
पर्वतो वन्हिमानित्याद्यनुमितौ पर्वते वन्हिमनुमिनोमि न तु वन्हौ पर्वतमित्यनुभवसाक्षिको विषयताविशेषः क्वचिद्विशेष्यवृत्तिरपीति नासिद्धिः अतएव गुणानांगु
णत्वमित्यत्र विशेष्यीभूतस्यापि गुणत्वस्य विधेयत्वमुक्तमुपाध्यायैरिति ध्येयम् ननु पक्षविशेष्यकसिद्ध्युत्तरं साध्यविशेष्यकानुमितिर्न क्वाप्यनुभवसिद्धेत्यत
आह तादृशीति पक्षनिष्ठप्रकारतानिरूपितसाध्यविशेष्यकानुमितिं प्रतीत्यर्थः सिद्धिमात्रमिति साध्यविशेष्यका पक्षविशेष्यिका च सिद्धिर्विरोधीनीत्यर्थः पर्वतो
वन्हिमानिति निश्चयोत्तरं वन्हौ पर्वतव्याप्यवत्तापरामर्शाद् वन्हिः पर्वते इत्यनुमितौ च वन्हेर्न विधेयत्वं किंतु पर्वतस्यैव तथात्वं यद्व्याप्यवत्ताज्ञानजन्यत्वमनुमि-
तौ तदंशएव विधेयताख्यविषयतास्वीकारादिति भावः नन्वेवं प्रसिद्धसाध्यकपरामर्शात्सर्वत्रैव पक्षसाध्योभयविशेष्यकानुमिति स्स्यात्स्सता राम॰
द्रूपसत्वेनोभयधर्मावच्छिन्नसामग्रीसत्वादित्यस्वरसाल्लाघवाच्च साध्यज्ञानत्वेनैव साध्यविशेष्यकानुमितिंप्रति विरोधित्वमाह साध्यप्रसिद्धिरेवेति एवकारेणानु ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मित्साया उत्तेजकत्वस्यापि प्रतिक्षेपः सूचितः साध्यज्ञानमात्रस्य विरोधितायामनुभवमपि प्रमाणमाह अत एवेति साध्यविशेष्यकानुमितौ तज्ज्ञानमात्रस्य विरोधित्वा
देवेत्यर्थः इत्थं च धूमव्यापकवन्ह्यभाववान् ह्रद इत्यादिव्यतिरेकपरामर्शजन्यायां ह्रदे धूमाभाव इत्याद्यभावसाध्यकानुमितेरेवं साध्यविशेष्यकत्वात्तत्रैव साध्यज्ञानं
विरोधीति मंतव्यं वन्ह्याद्यभावसाध्यकस्थले तु विशेष्यविधया वन्ह्यादिविधेयकानुमितेरलीकतया तां प्रति साध्यज्ञानत्वेन विरोधित्वासंभवादिति ध्येयं विशेष्यता
स्य विधेयतावच्छेदकत्वसंबंधेनानुमितिसामान्यं प्रत्येव वा प्रकारतासंसर्गेण ज्ञानमात्रस्य प्रतिबंधकत्वं वाच्यं नचैवमपि गोत्वाभावो गोत्वव्यापकसास्नाशून्य इत्या॰
कारकपरामर्शाद्गोत्वाभावे गोत्वं नेत्येवं पक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयकानुमितिर्न स्यात्परामर्शस्यैव साध्यज्ञानत्वेन विरोधित्वादिति वाच्यं मिष्टत्वात्
गोत्वाभावो न गोत्ववानित्येवं पक्षनिष्ठविशेष्यतानिरूपितसाध्यविधेयताकानुमितेरेव तन्नोत्पादात्साध्यतावच्छेदकधर्मावच्छिन्नपक्षनिष्ठप्रकारतानिरूपितसा
ध्यविधेयकानुमितित्वेनैव वा प्रतिबध्यत्वं वाच्यमित्यपि कश्चित् वस्तुतस्तु अप्रसिद्धसाध्यकपरामर्शस्य विशेष्यविधया साध्यविधेयकानुमितित्वावच्छिन्न
प्रत्येव हेतुत्वमन्यथा गोत्वाभावव्याप्यवत्त्वप्रकारकपरामर्शजन्यायां विशेषणस्य विशेष्यविधया गोत्वाभावविधेयकानुमितौ व्यभिचारापत्तिः तथा चोक्तस्थ
ले गोत्वाभावो न गोत्ववानित्यपि नानुमितिर्विशेषणविधया गोत्वाभावविधेयकानुमितौ गोत्वव्यापकाभाववत्तापरामर्शस्याहेतुत्वात् तथाविधगोत्वाभावा
नुमितिहेतौ गोत्वाभावव्याप्यवत्तापरामर्शस्य विरहेण कारणबाधाच्च प्रसिद्धाप्रसिद्धसाध्यकोभयपरामर्शयोः प्रसिद्धाप्रसिद्धसाध्यकोभयानुमित्यनुगतधर्मा
वच्छिन्नं प्रत्यनुगतरूपेण हेतुत्वस्य दुर्वचत्वादित्यन्यत्र विस्तरः व्याप्तिस्मरणादिनेति यत्रानुमित्सोत्तरं व्याप्तिस्मरणं ततः सिद्ध्यात्मकपरामर्शस्तत्रेत्यर्थः तथैव तत्र
था सत्येव विशिष्टाभावस्येति अनुमित्साविरहविशिष्टसिद्ध्यभावस्येत्यर्थः मिश्रमतमाह अन्ये त्विति अनुमित्सायामिति सिद्धिदशायामिति शेषः वाच्येति। सिषाध
यिषापदेनेत्यादि स्वोत्पत्तीत्यादि स्वपदं तत्तदनुमित्सापरं तथा च तत्तदनुमित्सोत्पत्त्यनंतरत्वविशिष्टतत्तदनुमित्साविषयसिद्धिप्रागभावो योग्यतेत्यर्थः सिद्धिका
लीनयदनुमित्साव्यक्तिदशायामुत्तरकालमनुमितिर्भविता तत्तदनुमित्साव्यक्तिविषयीभूतसिद्धिप्रागभावस्य वर्त्तमानसिद्ध्यन्तरदशायामपि सत्त्वात्तदानीमनुमि
तेर्वारणाय विशिष्टं तत्तदनुमित्सोत्पत्त्यनंतरत्वं तु न तत्तदनुमित्सोत्पत्तिध्वंसविशिष्टत्वं तथा सत्यनुमित्सोत्पत्त्यनंतरक्षणेऽनुमित्यपलापापत्तेः सिषाधयिषोत्प
त्तिक्षणेऽनुमित्सोत्पत्तिध्वंसविशिष्टस्य तद्विषयसिद्धिप्रागभावस्यासत्त्वात् किंतु तत्तदनुमित्साप्रागभावविरहविशिष्टत्वं वैशिष्ट्यं चैककालावच्छेदेनैकात्मवृत्तित्व
मिति नातिप्रसंगः तत्तदनुमित्साप्रागभावविरहविशिष्टत्वमात्रोक्तावनुमित्सोत्तरमनुमित्सुत्पादे पुनरनुमित्यापत्तिरतस्तत्तदनुमित्साविषयसिद्धिप्रागभावपर्यंतानुधाव

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·प नैनं चसिद्धिकालीनानुमित्सयास्वविषयीभूतैकानुमित्युत्पाददशायामपि दिनांतरभाविस्वविषयीभूताऽनुमित्यनन्तरप्रागभावसत्वादुत्तरकालमनुमित्यंतरापत्तिरिति
१० वाच्यं तत्तदनुमित्साप्रागभावविरहविशिष्टस्य तत्तदनुमित्साविषयीभूतसिद्धिप्रागभावकूटस्य विवक्षितत्वात् उक्तस्थले चोत्पन्नानुमितेरेव प्रागभावस्यासत्वा
दितिभावः इद्विपादिनेति अनुमानतत्साध्यनिर्णयेतुस्वविषयसिद्ध्यनुत्पादएवनस्थेयादितिभावः यद्यपि स्वपदेनानुमित्युपधायकतत्तदनुमित्साव्यक्तीनांसुप
10 ग्रहे दिवसांतरीयानुमित्साव्यक्तेर्योग्यतायामप्रवेशान्नैषदोषस्तथापि वन्ह्यनुमितित्वप्रकारेणानीतानुमितिगोचरेच्छयासिद्धिकाले वन्ह्यनुमितिर्नस्यात्तद्विषया
नुमितिप्रागभावकूटस्य तदानीमसत्वात् तत्तदनुमित्साव्यक्तिपूर्वक्षणावृत्तित्वेन तत्तदनुमित्साविषयसिद्धीनां तत्तदनुमित्साकालीनत्वेन वा तत्तदनुमित्साविष
यसिद्धिप्रागभावानां विवक्षया कथंचिदुपपादनेप्यनुमितिद्वयं जायतामितीच्छाया ———— मनुमितिद्वयेन स्यात्तदनुमित्साविषयीभूतानुमितिप्रागभावकूटस्य प्रथमानुमित्युत्पत्ति
दशायामसत्वात् तादृशानुमित्साया अपि मिश्रैरुत्तेजकत्वोपगमादित्यादिदूषणं द्रष्टव्यमुत्सर्गतः बाधकं विना तेनानुमित्सोत्तरं यत्र परामर्शविरोधिज्ञानापसरणक्रमेण चिरकालोत्तरं परामर्शोत्प
दस्तत्र सिद्धिदशायां न योग्यता अत एव वक्ष्यति फलबलेनेति तावानेव काल इति सिद्ध्यनुपपद्यते नन्वेतादृशकालस्योत्तेजकत्वे किं मानमत आह फलेति ननु यत्रानुमित्सोत्तरं परामर्शस्त
त्रैतत्कालानामनुपादाने यत्र सिद्ध्यात्मकपरामर्शोत्तरमनुमित्सा तत्रानुमितिर्न स्यात्तत्र तत्कालानामनुत्तेजकत्वादत आह अथवेति उपलक्षितइति तथा चानुमित्सानाशाधिकरणतत्त
त्कालोऽनुमित्सा च द्वयमप्युत्तेजकमित्याशयः तावानेवेति सिद्धिनाशोत्तरमपि यावत्कालमध्येऽनुमितिर्नोत्पद्यते तावान्काल इत्यर्थः। ननु क्रियात्मकानां यावत्त्वम
यानामभावस्य सर्वदैवात्मनि सत्वान्नोक्तयोग्यताविवक्षयाप्यनुमित्सानाशोत्तरमनुमितेः संभव इत्यत आह विशिष्टेति तथा च जन्यमात्रस्य कालोपाधितया आ
त्मसमवेततज्ज्ञानादिकमेव तादृशसमयो वाच्य इत्यदोषः अवहितेरितिभावे क्तः तेनावधानैरित्यर्थः स[illegible]कर्मकस्यावपूर्वस्य धाधातोः पचत्यादेरिव कर्तरि क्तस्याद्यु
त्पन्नत्वादिति ध्येयम् अनुमित्साव्यक्तीनामिव तन्नाशाधिकरणक्षणानामप्युत्तेजकविधयापक्षतायां निवेशे गौरवं विनाऽनुमित्सामनुमित्युत्पादस्य संदिग्धत्वा
दित्यस्वरसोऽवधेयः तेनोक्त्या सूचितः उत्तानास्तु हेद्वये इत्यादिलौकिकप्रत्यक्षान्यथानुपपत्त्याऽपेक्षाबुद्धीनामिवानुमित्सानाशोत्तरसिद्धिदशोत्पन्नतत्तदनुमित्य
न्यथानुपपत्त्या प्रागुत्पन्नासिषाधयिषाव्यक्तीनामेव त्रिचतुःक्षणावस्थायित्वं कल्पयितुमुचितं विशेषगुणानां नाश्यनाशकभावस्य विशेषतस्तत्रैव विश्रामात् द्वि
तीयक्षणे नाशसामग्र्यनावश्यकत्वादिति प्राहुः साध्यनिर्णयेति साध्यनिर्णयत्वप्रकारकेच्छानंतरमित्यर्थः। पूर्वोक्तन्यायेनानुमित्साप्रागुत्पन्नविशेषणज्ञानादिक्र राम
मेण प्रत्यक्षमिति तत्र तदनंतरमनुमितिप्रसंग इति परेणान्वयः। तथाविधप्रत्यक्षस्य विशिष्टानुभवतया तज्जनकविशेषणज्ञानादिकल्पने गौरवादाह स्मरणं वेति। १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु यद्यदिच्छासत्त्वे सिद्धिदशायामनुमितिर्जायते तत्तदिच्छाव्यक्तीनामेवोत्तेजकतया पक्षतायामंतर्भावात्साध्यनिश्चयत्वप्रकारकेच्छायाः क्वापि पक्षतायामनिवेशा
न्नातिप्रसंग इत्यत आह यत्र वेति यत्र साध्यवान् साध्यव्याप्यवान् साध्यव्याप्यधर्मव्याप्यवांश्च पक्षः पक्षे साध्यानुमितिस्तत्र व्याप्यवत्तानुमितिस्त्विष्टसाधनमि
त्येकं स्मरणमित्यर्थः अत्रानुमित्सादशायामनुमितेर्वारणार्थं साध्यवत्त्वं निवेशितमानसत्वावच्छिन्नं प्रत्येवेच्छासामग्र्याः प्रतिबंधकत्वमतेन यानुमितेर्वारणासंभवा
त् साध्यव्याप्यवत्त्वस्य तद्व्याप्यधर्मांतरवत्त्वस्य च निवेशोनुमित्सोत्तरं साध्यतद्व्याप्यवत्त्वयोरनुमित्यर्थं मन्यथा परामर्शविरहेणोत्तरकाले साध्यानुमित्सापत्त्यसंभ
वात् इष्टसाधनत्वं पुनरनुमित्सायाः सामग्रीसंपत्त्यर्थं निवेशितमिति द्रष्टव्यं तयोरिति साध्यतद्व्याप्ययोरित्यर्थः अनुमितिप्रसंगः साध्यानुमितिप्रसंगः तत्तदिच्छाव्य
क्तिसत्त्वे सिद्धिदशायामनुमित्सुत्पादेन तस्या अप्युत्तेजकत्वादिति भावः मिश्रमतेप्याह योग्यतेति सुतरामिति तत्रानुमितिप्रसंग इत्यन्वयः अनुमित्सानाशेप्यनुमिति
मंगीकर्तुरनुमित्सासंभवे सुतरां तदापत्तिसंभवादिति भावः तदिच्छेति यद्यदिच्छाव्यक्तिरुत्तेजिका स्वविषयसिद्ध्यभावविशिष्टत्वं तद्विशेषणमित्यर्थः यद्यपि एवमपि
यत्रोक्तस्थल एव साध्यानुमितिद्वयेष्टसाधन   तागोचरस्मरणात्साध्यानुमितिद्वयप्रकारानुमित्सा तत्रैकानुमित्यनंतरं साध्यानुमित्यंतरं नस्यात्तु प्रथमानुमित्यु
त्पादेनानुमित्सायाः स्वविषयसिद्ध्युपहितत्वात् तादृशेच्छायामुक्तविशेषणाप्रक्षेपेपि यत्र प्रात्यक्षिकसिद्ध्युत्तरं वह्न्यनुमितित्वप्रकारेणैव वह्निप्रत्यक्षगोचरा
विसंवादिनीच्छा तत्र वह्न्यनुमितिर्नस्यात् अनुमित्सायाः स्वविषयीभूतप्रात्यक्षिकसिद्ध्युपहितत्वेन तदनुपहितत्वविशिष्टानुमित्सायाः विरहसहकृतायाः सि
द्धेः सत्त्वात् नच येन रूपेण सिद्धेस्तादृशेच्छाविषयत्वं तद्रूपावच्छिन्नसिद्ध्यभाववैशिष्ट्यं विवक्षितं तथा च वह्न्यनुमितित्वावच्छिन्नाभाववैशिष्ट्यस्य तदिच्छाव्य
क्तौ सत्त्वान्न दोष इति वाच्यं यत्र पक्षेयस्य साध्यस्य प्रत्यक्षं कदाचिदपि न जातं तत्पक्षकतत्साध्यकप्रत्यक्षाद्व्यतिरिक्तज्ञानं जायतामितीच्छाया अनुत्तेजकत्वाप
त्तेः येन रूपेण यत्रेच्छाविषयत्वं तादृशस्य तत्पक्षकतत्साध्यवत्ताप्रत्यक्षभिन्नज्ञानत्वस्यारवंडस्याप्रसिद्धेः तथाप्युत्तेजकीभूतयद्यदिच्छाव्यक्तौ यादृशयादृ
शसिद्धिः प्रतिबंधिका तादृशतादृशसिद्ध्यनुपहितत्वं तत्तदिच्छाविशेषणं तेन यत्पक्षकयत्साध्यकप्रत्यक्षमप्रसिद्धं तत्रापि तादृशप्रत्यक्षभिन्नज्ञानत्वप्रका
रिकेच्छाया तत्पक्षसाध्यकानुमितिरेव प्रतिबंधिकास्तीति तदनुपहितत्वमेव तदिच्छायां विशेषणमित्यदोषः ननु यत्पक्षसाध्यकानुमित्साकस्यापि नोत्पन्ना
तत्र सिद्ध्यभाववत्त्वमपेक्ष्य निरुक्तसिद्ध्यभावत्वेन हेतुत्वं गौरवग्रस्तमत आह पक्षसाध्येत्यादि यत्रेति ययोः पक्षसाध्ययोरित्यर्थः सिद्ध्यभावमात्रमिति गौरवस्य प्रामा
णिकत्वमपाकरोति। प्रयोजनेति इदमुपलक्षणं यत्र पक्षे साध्यवत्ताज्ञानोत्तरं कदाप्यनुमितिर्नोत्पन्ना तत्र साध्यवत्ताज्ञानाभावमात्रकारणनिश्चयत्वमपि न निवेशनीयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·प एवं यत्रैकविधानुमित्साया उत्तरमनुमितिस्तत्र नाहृशानुमित्सैव पक्षता तथा यत्पक्षसाध्यकपरामर्शकालीनसिद्धिदशायामवश्यमनुमित्सा तत्र पक्षतानानुमितिहेतुरिति
११ द्रष्टव्यं यत्तु यत्पक्षसाध्यकानुमितिस्थले परामर्शदशायां नियमतः सिद्ध्यभावस्तत्र सिद्ध्यभावोपि न हेतुरिति तन्मन्दं तादृशस्थले मानाभावात् योगिनामेव परामर्शदशा
यामवश्यं सिद्धिसंभवेन तदभावस्याहेतुत्वे तेषामेव सर्वदानुमितिप्रसंगादिति ध्येयम् मिश्रमतमाक्षिपन्नाह तेनेति सर्वत्र पक्षतायामनुमित्सानिवेशस्य निष्प्रयोजकत्वे
नेत्यर्थः धात्वर्थसमानकर्तृकेच्छायामेव सनो विधानादनुमितिगोचराया अपीश्वरेच्छाया अनुमात्रनिष्ठत्वाभावेन सिषाधयिषाशब्देन बोधयितुमशक्यत्वादायासहयुक्ते
सिषाधयिषानाशेपि द्वित्रिक्षणाभ्यंतरे सिद्धिसत्वेऽनुमितेः सम्पादकं सार्वभौमोक्तप्रकारमुपन्यस्यति यत्त्विति सिषाधयिषाविरहविशिष्टो यः स्वक्षणः तदव्यवहितोत्तरक्ष
णोत्पत्तिकानुमितिकोपायस्तद्भिन्नायाः सिषाधयिषाविरहविशिष्टायाः सिद्धेस्तस्या अभावः पक्षतेत्यर्थः अत्रानुमित्सानाशककालोत्पन्नसिद्ध्यात्मकपरामर्शादनुमित्युत्प
त्त्यर्थं भिन्नान्तं सिद्धिविशेषणं सिद्धिमात्रस्यैव प्रायशः स्वक्षणोत्तरयत्किंचित्क्षणोत्पत्तिकानुमितिकतया तद्भिन्नायाश्चरमसिद्धेरभावस्येदानीं सिद्ध्यात्मकपरामर्शस्थ
लेपि सत्वादनुमित्यापत्तिरत उक्तमव्यवहितेति सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वं च सिषाधयिषाविरहविशिष्टस्वक्षणध्वंसाधिकरणकालध्वंसान
धिकरणत्वे सति तादृशसमयध्वंसाधिकरणत्वं तत्र क्षणपदं विहाय स्वसमयध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति तादृशसमयध्वंसाधिकरणत्वमित्युक्तौ यत्र
क्रमेणानुमित्सासिद्धिपरामर्शानुमितयस्तत्र सिद्ध्युत्पत्तिकालपर्यंतस्थायिनमनुमित्सापूर्वकालोत्पन्नस्थूलकालोपाधिमादाय परामर्शक्षणेपि पक्षताविरहप्रसं
गः सिद्ध्यधिकरणतादृशोपाधेरनुमित्सापूर्वकालाद्यवच्छेदेन सिषाधयिषाविरहविशिष्टतयानुमित्साविरहविशिष्टनिरुक्तस्वसमयाव्यवहितोत्तरत्वस्य परामर्श
क्षण एव पर्यवसानात्तदानीं चानुमित्यनुत्पत्त्या तत्सिद्धेरपि निरुक्तानुमितिकभिन्नतया अनुमितेः प्रतिबंधकत्वादतः प्रथमक्षणपदं तथा च तत्र । सिषाधयिषावि
रहविशिष्टः स्वक्षणः परामर्शोत्पत्तिक्षण एवेति तदव्यवहितोत्तरोत्पत्तिकानुमितिकत्वान्न तत्सिद्धिविरोधिनी सदोषः सत्यंतमात्रोक्तौ च सिद्धिमात्रस्यैव प्रायशः स्वक्ष
णध्वंसाधिकरणकालध्वंसानधिकरणीभूतस्वपूर्वकालोत्पत्तिकानुमितिकतया तद्भिन्नसिद्धेरप्रसिद्धिः स्यादतः स्वसमयध्वंसाधिकरणत्वदलं यत्र क्रमेण सिद्धि
परामर्शौ तत्रानुमितिप्रसंगः परामर्शपर्यंतस्थायिनः प्रहरादिरूपस्थूलकालोपाधेर्निरुक्तस्वक्षणाव्यवहितोत्तरतया सिद्धिपूर्वदंडाद्यवच्छेदेनानुमित्युत्पत्तिमत्तया
च सिद्धेः स्वक्षणाव्यवहितोत्तरकालोत्पत्तिकानुमितिकत्वेनाविरोधित्वादतो द्वितीयक्षणपदं न च स्थूलकालोपाधेरेव स्ववृत्तियावद्ध्वंसविशिष्टतादृशायाः क्षणत्वादु राम·
क्तदोषतादवस्थ्यं यदुपाध्यवच्छिन्नस्याव्यवहितोत्तरक्षणत्वं तदवच्छेदेनानुमित्युत्पत्तिमत्त्वस्य विवक्षितत्वात् क्षणिकास्य शब्दानामतिरिक्तपदार्थस्यैवाक्षणत्वे ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मतेयथाश्रुतार्थस्यैवसम्यकृत्वाच्च उत्पत्तिपदानुक्तौएकानुमित्युत्पत्त्यनन्तरमनुमित्यंतरापत्तिः स्वस्वक्षणाव्यवहितोत्तरक्षणवृत्तित्वात्मकानुमितिकत्वेनतदन्यसिद्धे
रभावाद् तस्तदुपात्तंनच स्वक्षणाव्यवहितोत्तरक्षण वृत्तिस्वेतरानुमितिकत्वमेवप्रवेश्यतामुत्पत्तेः स्वेतरत्वापेक्षयागुरुत्वादितिवाच्यं यत्रसाध्यस्यानुमितिद्वयंजायते
मितीच्छयाप्रथमंसाध्यतद्व्याप्ययोरपेक्षाबुध्यात्मिकाएकानुमितिः ततःसाध्यानुमित्यन्तरंतत्रसाध्यानुमित्यन्तरप्रसंगात्॥ अनुमितिस्त्व स्वसमानाधिकरणा
प्रकृतपक्षसाध्यविषयिणीच ग्राह्यानातः पुरुषांतरीयानुमित्यादिकमादायातिप्रसंगः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नस्यप्रागुक्तसन्नस्यव्या
प्तिस्मरणादेः परामर्शमात्रस्थलेसत्वात्तत्रपक्षतासंपत्यर्थंसिद्धिपदमितिभावः ग्रंथलाघवार्थमंतिमस्यसिषाधयिषाविरहपदस्यव्यावृत्तिमभिधानएवप्रथमस्यः
प्रयोजनंपृच्छति अथेति तृतीयक्षणेति तृतीयक्षणस्यव्यवधायकेत्यर्थः सिद्धीति परामर्शात्मकसिद्धीत्यर्थः संपतयेति अन्यथास्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिका
नुमितिकभिन्नसिद्धेस्सत्वात्तत्रपक्षतानस्यादितिभावः द्वितीयोद्वितीयसिषाधयिषापदेनप्रत्याख्यः सिषाधयिषाविरहस्यैकत्वेनद्वितीयत्वायोगादेवमग्रेपि प्रथमिकस्ति
तिसिषाधयिषाविरहेत्यनुषज्यते स्वक्षणस्येति विशेषणमित्यनुषज्यते यद्यपिसिषाधयिषाविरहविशिष्टंयत्स्वतदधिकरणक्षणाव्यवहितोत्तरेत्यादिक्रमेणस्वस्यापिवि
शेषणत्वमनुमित्साविरहस्यसंभवति तथापिस्वस्मिन्सिषाधयिषाविरहवैशिष्ट्यस्यसामानाधिकरण्यरूपस्यप्रवेशेगौरवात् इत्याशयेन स्वक्षणस्येत्युक्तंयत्रेत्यादिसि
षाधयिषासिद्ध्योर्व्युत्क्रमेणानुमितिप्राक्कालेसिद्धिसामान्याभावएवसंभवत्यतः क्रमेणेत्युक्तंसिद्धेरनुमित्यात्मकत्वेऽनुमित्सायाःस्वविषयसिद्धकतादेनचरितार्थं
तयोत्तरकालमनुमितिर्नकस्यापिसंमताइतिव्यर्थं तत्रपक्षतासंपादनमतःप्रात्यक्षिकपदंपक्षतासंपत्यर्थमिति अन्यथातत्रस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकभि
न्नायाः सिषाधयिषाविरहविशिष्टसिद्धेस्सत्वादनुमितिर्नस्यादिती त्यंचतत्रसिद्धेःसिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वात्तद
न्यसिद्ध्यभावस्यसत्वान्नपक्षताहानिः नचसिषाधयिषाविशिष्टस्यापिसिद्धिक्षणस्यघटाद्यवच्छेदेनसिषाधयिषाविरहवत्वादुक्तदोषतादवस्थ्यमवच्छेदकशरीरा
वच्छेदेनसिषाधयिषाविरहवैशिष्ट्यस्यविवक्षितत्वादि तिभावः अत्रयत्रसिषाधयिषाघटादीच्छासिद्ध्यात्मकपरामर्शानुमितयःक्रमेणजाताः तत्रेच्छावि
रहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नायाः सिषाधयिषाविशिष्टायाः सिद्धेःसत्वात् अनुमितिर्नस्यादतः इच्छामपहायसिषाधयिषापर्यंतमनु
श्रुतंएवंघटेच्छासिद्ध्यात्मकपरामर्शानुमितिवारणायद्वितीयसिषाधयिषायाःप्रवेश इतिभावः प्रसंगादिति द्वित्रिक्षणाद्यंतरितानुमित्सास्थलेप्यनुमितिस्वीकारेणइ
ष्टापत्त्यसंभवादितिभावः उक्तंदोषंनिरसितुमाशंकते अथेति प्रथममित्यादि तथाच स्वसमयध्वंसाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वेसतिस्वसमयध्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·प साधिकरणत्वमेवाव्यवहितोत्तरत्वं वाच्यं तच्च तृतीयक्षणेऽनुमित्युत्पादेप्यस्तीति न पक्षताहानिः स्वक्षणेत्यत्र क्षणपदं समयमात्रपरं क्षणत्वपर्यंतस्य निष्फलत्वादि
१२ तिभावः लाघवादाह। स्वध्वंसेत्यादि स्वोत्तरप्रहारादिकृत्यन्यानुमितिकसिद्धिदशायां पक्षतावारणाय स्वत्वं तदल सिद्धिर्द्वितीयक्षणस्यापि विषयितासंबंधेन सिद्धिध्वंसाधि
करणीभूतातीतज्ञानादेर्ध्वंसाधिकरणत्वात् कालपदं स्वपूर्वप्रहारादिकृत्यन्यानुमितिकसिद्धिदशायां तद्वारणाय स्वाधिकरणेत्यादिविशेष्यदलम् कालपदोपादानात्कालिक
१२ सम्बन्धेनाधिकरणत्वलाभस्तेन सिद्धेः पूर्वप्रहारादेर्विषयितया सिद्ध्यधिकरणीभूतस्यातीतज्ञानादेर्ध्वंसाधिकरणत्वेपि नोक्तदोषः स्वाधिकरणत्वमात्रोक्तौ सिद्धिप्राक्कालवार
णासंभवेप्यनुमित्यंतरमनुमितेर्वारणार्थं स्वाधिकरणकालध्वंसाधिकरणत्वपर्यंतोपन्यासः सोऽन्यथाऽनुमित्यात्मकसिद्धेः स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधि
करणीभूतो यः स्वोत्पादक्षणस्तदुत्पत्तिकानुमितिकत्वेन तद्भिन्नसिद्ध्यभावस्य सत्त्वादनुमित्यंतरापत्तिः एवं स्वाधिकरणत्वमात्रस्य विशेष्यत्वे यत्रानुमित्यानाशक्षणे द्व्या
द्युक्तदोषनिरासोपि न स्यादिति ध्येयं नन्वेवं प्रागुक्तसिद्धिद्वयस्यैव हि त्रिक्षणसाधारणनिरुक्तस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतया तदन्यसिद्ध्यभावस्वरूपा
याः पक्षतायाः सहजत एव सत्त्वात् सिषाधयिषाविरहद्वयोपादानं व्यर्थमत आह। तथा चेति वारणायेति तत्रत्यसिद्धेः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेपि सि
षाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणस्तदुत्पत्तिकानुमितिकसिद्ध्यंतरभिन्नतया विरोधित्वादिति भावः स्वक्षणस्य विशेषणत्वे तद्दोषतादवस्थ्यादाह उ
त्तरक्षणस्येति अनुमित्युत्तरक्षणपर्यंतस्यापि स्थूलकालोपाधेरपि निरुक्तस्वाव्यवहितोत्तरकालत्वादेकानुमित्यनंतरमन्यानुमितेर्वारणार्थं द्वितीयक्षणपदस्यावश्यकत्वा
दुत्तरकालस्येति नोक्तं द्वितीयत्वेति विशिष्टांतमित्यनुषज्यते सिद्धेरिति विशेषणमित्यनुषज्यते। संपत्तयेद्इति अन्यथानुमित्यापून्य
स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्धेः सत्त्वात्तृतीयक्षणेऽनुमितिर्न स्यादिति भावः नचैवं यत्र परामर्शात्मकसिद्धेरव्यवहितक्षणे तद्धर्मिकसाध्यवत्त्वा
शेऽप्रामाण्यग्रहानन्तरं चानुमितिः तत्र तादृशाप्रामाण्यग्रहोत्पत्तिक्षणेऽनुमित्यापत्तेः तत्र सिद्धिव्यक्तेः सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणः तदु
त्पत्तिकत्वेन तदन्यसिद्धेः प्रागसत्त्वादिति वाच्यं अप्रामाण्यग्रहाभावविशिष्टत्वं तत्तत्सिद्धिव्यक्तित्वेनापि पक्षतावहिर्भावेणानुमितिविरोधित्वांतरस्यैव कल्प्यत्वादिति
भावः यद्यपि तृतीयक्षणसाधारणाव्यवहितोत्तरत्वकल्पे स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नाभावस्यैव सम्यक्त्वात्सिद्धिपदं व्यर्थं परामर्शहेतुभूतस्य
व्याप्तिस्मरणादेर्निरुक्ताव्यवहितोत्तरक्षणोत्पत्तिकानुमितितयैवाप्रतिबंधकत्वात् एवं च सिषाधयिषाविरहद्वयोपादानमप्यफलं यत्र क्रमेण सिद्धिसिषाधयिषानु गम
मितयस्तत्रानुमित्याजनकस्य फलेच्छादेरेव स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नस्य सत्त्वादनुमित्युत्पत्तिक्षणेऽनुमित्यसंभवात् न च जातिध्वंसाद्यप्रसिद्ध्या १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरुक्तस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नस्यात्मत्वादेस्सत्वात्परामर्शमात्रादप्यनुमितिर्नस्यादतः सिद्धिपदमितिवाच्यमेतावतापितादृशानुमितिकभिं
न्नसविषयकाभावस्यैवसम्यक्त्वेसाध्यवत्वनिश्चयात्मिकायाः सिद्धेः प्रवेशानौचित्यात्तथापिस्वत्वस्याननुगतत्वात्तादृशानुमितिकव्यक्तीनां तत्तद्व्यक्तित्वेनभें
दानिवेश्यात स्तत्रस्वपदेनसिद्धिव्यक्तयएवधर्त्तव्यानतुव्यक्त्यंतराणितावद्भेदप्रवेशेगौरवात् तथाचस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नस्यपरा
मर्शादेस्सत्वेप्यनुमितिर्नस्यादतः सिद्धिपदं नचैवं कार्योत्पादकसकारणतावच्छेदकाघटकत्वेनवाकार्योत्पादादिकंकारणतावच्छेदककोटौनिविशतेइत्यग्रिमग्रंथ
स्यासंगतत्वापत्तिः तत्स्यादिपदेनस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतत्तद्व्यक्तिप्रतियोगिकभेदकूटस्याप्युपग्रहात् तथाचक्रमिकसिद्धिसिषाधयिषा
नुमितिस्थलेप्रथमक्षणेपक्षतावारणार्थं विशिष्टांतस्योत्तरक्षणविशेषणत्वध्रौव्येद्वितीयमपिविशिष्टांतं तत्रैवद्वितीयक्षणेपक्षतारक्षणार्थमावश्यकमित्यस्यानुसरणाः
यत्तुस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसविषयकाभावस्यपक्षतात्वेपरामर्शादेरनुमितिहेतुतानस्यादित्येककारणपरिशेषापत्तिभियासिद्धिपदमितितन्मं
दं यत्रजागरणाद्यक्षणेस्मरणात्मकपरामर्शादनुमितिस्तत्रपरामर्शोत्पत्तिदशायामेवतदापत्तिप्रसंगेनपरामर्शादेरनुमितिहेतुत्वस्यावश्यकत्वात् तत्रत्यपरामर्शपूर्वव
र्त्तिनां निखिलसविषयकानांस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेनाविरोधित्वादितिकेचित् अपेक्षाबुद्ध्यात्मकपरामर्शेचतुर्थक्षणेऽनुमित्सर्थं सिद्धिपदमन्यथातादृश
परामर्शस्यैवनिरुक्तानुमितिकभिन्नसविषयकत्वेनप्रतिबंधकत्वापत्तिरित्याहुः तन्मंदं चतुर्थक्षणेद्वित्वादिप्रत्यक्षस्यानुत्पादेनतादृशपरामर्शस्यापेक्षाबुद्धित्वेमानाभावा
त् अन्यथानुमित्सोत्तरं सिद्ध्यात्मकस्यैवापेक्षाबुद्ध्यात्मकस्यचतुर्थक्षणेसिद्धिनिवेशेप्यनुमित्यभावप्रसंगात् ननुयत्रक्रमेणसिद्धिसिषाधयिषानुमितयस्तत्रप्रथमक्षणेप
क्षतासत्वेपीच्छासामग्र्याः प्रतिबंधकत्वादेवानुमित्यनुत्पत्तिसंभवात्प्रथमविशिष्टांतदलं व्यर्थमतएवद्वितीयमपितथेत्यत आह यदिपुनरितिसर्वत्रेच्छाजनकीभूतज्ञान
स्येच्छोत्पत्तिदशायां साक्षात्कारप्रसंगेनमानसत्वावच्छिन्नंप्रत्यक्षसामान्यंवाप्रतीच्छासामग्र्याः प्रतिबंधकत्वेप्यनुमितिंप्रतितस्यास्तथात्वेमानाभावात् नन्वेच्छासामग्री
दशायांस्मृतिशाब्दबोधाद्यनुदयाल्लाघवेनजन्यज्ञानत्वावच्छिन्नंप्रत्येवतस्याः प्रतिबंधकत्वमतस्तत्सत्वेऽनुमित्यसंभवइतिवाच्यंसत्यामपीच्छासामग्र्यांपश्येयंस्पृशे
यं शृणुयांशाब्दयामितीच्छादशायांजन्यज्ञानोत्पादेनचाक्षुषत्वस्पार्शनत्वश्रावणत्वशाब्दत्वादिप्रकारकेच्छाविरहविशिष्टेच्छासामग्रीत्वेनचाक्षुषत्वस्पार्शन
त्वशाब्दत्वाऽऽदिप्रत्येकधर्मावच्छिन्नंप्रत्येवप्रतिबंधकत्वेपाऽनुमितिमंतर्भाव्येच्छासामग्र्याः प्रतिबंधकत्वाकल्पनात् जन्यज्ञानत्वावच्छिन्नंप्रतितत्तदिच्छाविरहकृद्
विशिष्टेच्छासामग्रीत्वेनविरोधितायामिच्छासामग्रीसत्त्वेपिपश्येयमितीच्छातश्चाक्षुषस्यैवस्पार्शनस्यशाब्दबोधादेर्वाप्रसंगात् जन्यज्ञानस्याविशिष्टत्वात् तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·प· नानुमिताविच्छासामग्र्या इच्छायामप्यनुमितिसामग्र्या विरोधित्वं सुवचं विनिगमकाभावेनैकशेषस्य दुष्करत्वादित्याशयेन यदि चेत्युक्तं यत्तु अनुमितिसामग्र्य-
१३ पेक्षयेच्छासामग्री लघुरिति सैवानुमितौ प्रतिबंधिका न त्विच्छायामनुमितिसामग्री गुरुत्वादिति तन्तुच्छं तथा सत्यनुमित्साविरहविशिष्टाया एवेच्छासामग्र्या अनु-
मितिविरोधित्वं वाच्यमन्यथाऽनुमितिसा कालीनायामपीच्छासामग्र्यामनुमित्यभावापत्तेः एवं चानुमित्साकालीनानुमितिसामग्रीदशायामिच्छानुत्पत्त्यर्थमिच्छासा-
मान्यं प्रति त्वयानुमित्साकालीनानुमितिसामग्रीत्वेनावश्यं विरोधित्वं वाच्यमित्यनुमितिसामग्र्या गुरुत्वस्याकिंचित्करत्वादिति ध्येयं यद्यपि स्वाव्यवहितोत्तरक्षणोत्प-
13 त्तिकानुमितिकसिद्धिभिन्नसिद्ध्यभावस्यैव प्रक्रांतत्वात्तदुपादानमुचितं गौरवस्य वक्ष्यमाणलक्षणेपि अविशिष्टत्वात्तथापि कार्योत्पादस्यैव कार्याव्यवहितपूर्वत्व-
स्यापि कारणतावच्छेदकत्वं निरसितुं तदंतर्भावेन पक्षतां निर्वक्ति अनुमित्यव्यवहितेति प्रकृतपक्षसाध्यकस्वसमानाधिकरणतत्तदनुमित्यव्यवहितपूर्ववर्त्तिसिद्धि-
भिन्नसिद्ध्यभावः प्रकृतसाध्यकानुमितौ पक्षतेत्यर्थः प्रकृतपक्षसाध्यकानुमितिप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वघटितस्य सामान्यतस्तादृशानुमि-
त्यव्यवहितपूर्वत्वस्याप्रसिद्धत्वान्नत्तदिति न च प्रकृतपक्षसाध्यकानुमित्युत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वरूपसामान्यतस्तादृशानुमित्यव्यवहितपूर्वत्व-
सुवचमिति वाच्यं तस्याप्युत्पत्त्यंतर्गतस्वत्वघटितत्वेन विशेषितो विश्रामादित्थं च स्वसमानाधिकरणतत्तदनुमित्यव्यवहितपूर्ववर्त्तित्वावच्छिन्नभेदकूटस्य घटक-
तया तत्र स्वपूर्ववर्त्तिसिद्धिकालीनानुमितिव्यक्तीनां निवेशः कार्यो न तु सिद्धसमानकालीनानुमितिव्यक्तयोपि निवेश्याः प्रयोजनाभावाद्गौरवाच्चेत्यावेदयितुं प्रथमं
सिद्धिपदं यत्तु प्रकृतपक्षसाध्यकस्वसमानाधिकरणानुमितिसामान्याव्यवहितपूर्ववर्त्तित्वस्याप्रसिद्ध्या तन्निवेशासंभवात् वस्तुगत्या तादृशानुमित्यव्यवहितपूर्ववृ-
त्तियद्यत्त्वं तद्भेदकूटस्यैव निवेश्यतया तत्र च सिद्धिभिन्नस्य मनःसंयोगादेः प्रतियोगिविधया प्रवेशे गौरवादतः सिद्धिपदमिति मतं तत्तुच्छं तथा सति कार्याव्यवहितपूर्व-
त्वस्यानिविष्टतयाऽग्रे तत्तत्कारणतावच्छेदकखंडनस्योन्मत्तप्रलपितत्वापत्तेः द्वितीयं तु सिद्धिपदं तादृशसिद्धिभिन्नस्य परामर्शमात्रस्य सत्त्वेप्यनुमितेरुत्पत्त्यर्थमन्य-
था तस्यैव प्रतिबंधकत्वापत्तेरिति भावः। प्रथमकल्पं दूषयति तादृशेत्यादि तत्तद्व्यक्तित्वेनेत्यस्य सिषाधयिषाविरहविशिष्टेत्यादि तथा च सिषाधयिषाविरहविशिष्टतत्त-
त्सिद्धित्वावच्छिन्नाभावेत्यर्थः यथाश्रुते यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणस्तदुत्पत्तिकानुमितिक-
भिन्नसिद्धेः सिषाधयिषादशायां सत्त्वादनुमित्यनापत्तेः इत्थं च सकलसिद्धावित्याद्यग्रिमग्रंथोपि संगच्छत इति ध्येयं निरुक्तरूपेति सिषाधयिषाविरहविशिष्टस्वक्षणा- राम·
व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नसिषाधयिषाविरहविशिष्टसिद्धित्वेनैवेत्यर्थः अनंतेति अवच्छेदकभेदेनैव कारणत्वस्य नानात्वादिति भावः न च १३

CC-0. In Public Domain. Digitization by eGangotri

तत्तत्सिद्ध्यभावकूटत्वेनैकरूपेणैव हेतुत्वमपेक्षाबुद्धिविशेषविषयत्वरूपस्य कूटत्वस्यापेक्षाबुद्धिव्यक्तीनां भेदेन नानात्वसंभवादिति भावः ननु प्रामाणिकानंत्यं न दोषाये-
त्यत आह। तादृशेति परामर्शदशायां यस्यां सिद्धौ नानुमित्सावैशिष्ट्यं तत्तत्सिद्धिव्यक्तावनुमित्साविरहविशेषणव्यर्थत्वादित्यर्थः परामर्शसमानकालीनसिद्धिव्य-
क्तीनामभावस्य हेतुत्वे मानाभावाच्चेत्यपि द्रष्टव्यं ननु सर्वस्यासिद्धौ न देयमेव तद्विशेषणमत आह तत्तत्समयेति सिद्ध्यधिकरणतत्तत्क्षणेन समं सम्बन्ध्यव्यक्ती-
नामित्यर्थः ननु तत्तत्समयसंबंधस्य विरोधित्वे सिद्धिमतद्व पुरुषांतरस्याप्यनुमितिर्न स्यात्तादृशसंबंधस्याविशिष्टत्वादत आह तत्तत्समयावच्छिन्नेति सिद्धिकाली-
नतत्तन्मनोयोगव्यक्तीनां स्थिरतया सिद्धिविगमेप्यनुमितिर्न स्यादतोऽवच्छिन्नांतं सिद्धिमतद्वजनांतरस्यापि तत्तत्समयावच्छिन्नमनोयोगसत्वात्तस्याप्यनुमितिर्न स्या-
दतस्तत्तदिति मनोयोगस्य विशेषणं मनोविशेषणत्वे तु तत्तत्समयावच्छिन्नतन्मनः प्रतियोगिकसंयोगस्यापि पुरुषांतरे संभवात् सिद्धिमतद्वतस्याप्यनुमित्यनापत्ते-
रिति भावः नच तत्तत्सिद्धित्वेन प्रतिबंधकत्वमपेक्ष्य तत्तत्समयावच्छिन्नतन्मनोयोगत्वेन प्रतिबंधकत्वं गौरवादेव परित्याज्यमिति वाच्यं त्वया सकलसिद्ध्यनुमित्सा- व
विरहवैशिष्ट्यस्यैवमपि सर्वस्मिन्मनोयोगे तत्तत्समयावच्छिन्नत्वस्यानुपादेयतयोभयत्रापि दूषणसमाधानयोश्च साम्यादिति भावः कस्याश्चिन्नेति सिद्धेरनंत-
रमनुमितिरित्यनुषज्यते नियामकाभावादिति नियामकालाभादित्यर्थः विशिष्टाभावस्य विशेष्याद्यभावरूपतया निरुक्ताभावस्य विशेष्यीभूतसिषाधयिषाविरहवि-
शिष्टसिद्धेरभावस्वरूपत्वे तादृशसिद्धिसत्वे कदाप्यनुमितिर्न स्यात्स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वरूपविशेषणाभावरूपत्वे विवक्षिते विवेकेः
नानुमित्युत्पादस्यैवानुमित्युत्पादप्रयोजकत्वे पर्यवसानादात्माश्रयादिति भावः ननु मणिकारमते विशिष्टाभावस्यातिरिक्ततया तस्य सत्वासत्वमेवानुमितेरुत्पाद
नुत्पादनियामकं वाच्यमत आह नवेति कारणसमाजाधीनं तत्तद्धर्मावच्छिन्नकार्यस्योत्पादादिकं तत्तद्धर्मावच्छिन्नकार्यस्य कारणतावच्छेदककोटौ न निविशते गुरु-
धर्मेणैव तादृप्येणापि जनकतायामन्यथासिद्धत्वादित्यर्थः तेन ज्ञानोत्पत्त्यादिविशिष्टबुद्धौ ज्ञानोत्पत्त्यादिज्ञानत्वेन हेतुतायां कार्योत्पादस्यावच्छेदकत्वेपि ज्ञानोत्पत्ति-
विशिष्टबुद्ध्युत्पत्तित्वेनाप्रवेशान्न दोषः आदिपदात्कार्याव्यवहितपूर्वत्वादेः स्वक्षणाव्यवहितोत्तरक्षणानुत्पन्नकार्यात्वस्य च परिग्रहः कार्योत्पादादिघटितधर्मे-
णहेतुत्वे प्रतिबंधिमाह तथा सतीति स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकास्वसमानाधिकरणानुमितिर्यस्य तादृशसविषयकत्वेनेत्यर्थः कारणत्वं स्यादित्यग्रेणान्वयः स्वक्ष-
णाव्यवहितोत्तरतादृशानुमितिकस्य परामर्शस्यैव सत्वादनुमित्युत्तरमनुमितेर्वारणाय उत्पत्तिकालावच्छिन्नेति स्वोत्पत्तिक्षणावच्छिन्नेतितदर्थः। उत्पत्त्यवच्छिन्नस्य-
घटादिज्ञानस्योत्तरमप्यनुमितिः स्यादतः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकेति स्वक्षणे उत्पन्नक्षणः समयमात्रं न तु क्षणमात्रं वै व्यर्थात् अनुमितेरपि स्वसमयाव्यव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितोत्तरीभूतस्वस्थितिक्षणपर्यंतस्थायिप्रहारादुत्पत्तिकानुमितिकतयाततोऽप्यनुमित्यंतरा——पत्तिरतो द्वितीयं लक्षणपदमनुमितेरपि स्वक्षणाव्यवहितोत्तरक्षण
वृत्तिस्वात्मकानुमितिकत्वात्तदुत्तरमनुमित्यंतरस्य वारणाय उत्पत्तिपदं न च स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वेतरानुमितिकत्वमेव तदर्थं उच्यतामिति वाच्यं यत्र साध्या
नुमितिद्वयं जायतामिच्छयापासाध्यतद्व्याप्ययोरपेक्षाबुद्ध्यात्मकानुमित्युत्तरं साध्यमात्रस्यानुमितिस्तत्र साध्यस्यानुमित्यंतरप्रसंगात् पूर्वानुमितेः त्रिक्षणस्थायित्वात्तत्रोत
त्तिः आद्यक्षणसंबंधः आद्यक्षणसंबंधत्वं च स्वाधिकरणसमयध्वंसानधिकरणत्वमात्रं न तु स्वाधिकरणत्वमपि प्रवेश्यं वैयर्थ्यादिति द्रष्टव्यं स्वक्षणाव्यवहितोत्तरक्षणो
त्पत्तिपुरुषान्तरानुमितिकादृष्टादिज्ञानादनुमितेर्वारणाय स्वसमानाधिकरणेति एकत्र पुंसि तादृशानुमितिकत्वस्य हि तत्त्वस्य पुरुषांतरेऽपि सत्त्वात्तत्रानुमितेर्वारणाय सवि
षयकेति सिद्ध्यात्मकपरामर्शानुमित्सानुमितीनां क्रमिकस्थले तादृशज्ञानासंभवात् ज्ञानत्वापेक्षया गुर्वपि सविषयकत्वं निवेशितं न चैतस्य स्वत्वद्वयघटितत्वादुक्तरूपे
णहेतुतायां गौरवमिति वाच्यं स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिसामानाधिकरण्यं तादात्म्योरिति भावः कार्यतावच्छेदकत्वे प्रतिबंधिमुक्त्वा का
र्यो व्यवहितपूर्वत्वस्य तथात्वे प्रतिबंधिमाह स्वमानेत्यादि अत्र तादृशानुमित्यव्यवहितपूर्वत्वं न तादृशानुमितिप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति
तादृशानुमितिप्रागभावाधिकरणत्वरूपमप्रसिद्धत्वात् किंतु तादृशानुमितिक्षणोत्पन्नध्वंसप्रतियोगित्वं तथा च सिद्धिमात्रादनुमित्यापत्तेस्तस्यापि समानाधिकरणा
नुमित्युत्पत्तिक्षणोत्पन्नध्वंसप्रतियोगिप्रहारादिकालोत्पन्नत्वादतः क्षणपदं यत्र परामर्शेन स्वनाशक्षणेऽनुमितिर्जन्यते तत्र द्वितीयक्षणेऽप्यनुमित्यापत्तिः परामर्शस्ये
वस्वसमानाधिकरणानुमित्यव्यवहितप्राक्क्षणावृत्तेरुत्पत्त्यवच्छिन्नस्य सत्त्वादुक्तमुत्पन्नेति न च स्वत्वस्याननुगतत्वादुक्तरूपेण हेतुत्वमसंभवीति वाच्यं यत्तत्त्वा
देरिव स्वत्वस्याप्यनुगतत्वमंगीकृत्यैव दूषणोपक्रमात् अन्यथा तद्व्यक्तित्वेन स्वपदार्थस्य प्रवेशे कार्यत्वात्तादृग्गुरुत्वादेव कारणतायामप्रवेशसंभवे नान्यथासिद्धि
मुद्रया तदीयावच्छेदकत्वखंडनस्योन्मत्तप्रलपितत्वापत्तेरिति भावः आदिपदलब्धस्य स्वक्षणाव्यवहितोत्तरक्षणानुत्पन्नकार्यकान्यत्वस्य कारणतावच्छेदकत्व
प्रवेशे बाधकमाह। स्वक्षणेत्यादि स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकास्वसमानाधिकरणानुमितिर्येषां तदन्यस्य सविषयकत्वेनेत्यर्थः अत्राप्युत्पत्त्यवच्छिन्नत्ववि
शेषणं प्रवेशनीयमिति नातिप्रसंगः केचित्तु प्रागुक्तस्योत्पत्तिघटकस्वत्वघटितत्वेनानुगतत्वाभावादुक्तं स्वक्षणेत्यादि न चैकानुमित्युत्तरमनुमित्यंतरस्य वारणाय प्रथम
स्यापि स्वोत्पत्तिकालावच्छिन्नत्वेन विशेषणीयत्वादननुगमतादवस्थ्यं स्वोत्पत्तिकालावच्छिन्नत्वेन स्वानुत्पत्तिक्षणावच्छेद्यत्वाभावकूटवत्त्वस्य विवक्षितत्वादि
त्याहुः तत्तुच्छं अनुगतस्वत्वमंगीकृत्यैव दोषोपक्रमात्। अन्यथा कार्यतायास्तद्व्युपलक्षितायास्तद्व्यक्तेरेव कारणतावच्छेदकत्वे कार्यतादेरवच्छेदकत्वखंडनस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संगतत्वापत्तेः पश्चाद्वक्ष्यमाणस्यापिस्वत्वगर्भत्वेनसंदर्भविरोधापत्तेश्चेतिदिक् ननुसविषयमात्रस्यैवप्रायशः स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरण
यत्किंचिदनुमितिव्यक्तिकतयातदन्यसविषयकस्यसंसारिण्यभावात् परामर्शमात्रादप्यनुमितिर्नस्यात् तादृशक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिसामान्यक
भिन्नसविषयत्वेनकारणत्वेमहागौरवमतआह किंवेति यत्तत्तद्रूपेणहेतुतायामनुमितिसामान्योपधायकत्वं परामर्शस्यनस्याद्धि नश्यदवस्थपरामर्शानुमितिस्थले
कथितरूपावच्छिन्नस्यतस्यासत्वादतआह किंवेत्यादिकमिति नन्वस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयकत्वेनहेतुत्वोक्त्या
पूर्वमेवपरामर्शस्यानुमित्युपधायकतानियमस्यत्यक्तत्वात्तदासंशनेसंदर्भविरोधापत्तेः अत्रानुमितिपूर्ववर्त्तिनोज्ञानस्यानुमितिदशायामपिसत्वादुत्तरकालमनुमितेर्वा
रणायतादृशपूर्ववर्त्तित्वविशिष्टस्योक्तं तथाचतदवच्छिन्नस्यप्रागसत्वान्नदोषः ज्ञानत्वादिनेत्यादिनासविषयत्वभावनात्वादेःपरिग्रहः ननुप्रथमकल्पेतृतीयक्षणसाधार
णस्य प्रागुक्ताव्यवहितोत्तरत्वस्यप्रवेशेव्याप्तिज्ञानमात्रादनुमितिःस्यात्तस्यापिपरामर्शसंपत्त्यास्वाव्यवहिततृतीयक्षणोत्पत्तिकानुमितिकत्वादतआह स्वाव्यवहितोत्त
रश्चेति तथाचस्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वगर्भमेवाव्यवहितोत्तरत्वमितिवैधूर्यमितिभावः नवेति वाच्यमित्यन्वयः पूर्वोत्पन्नस्यैवपरामर्शस्य
स्थितिक्षणेनुमित्यव्यवहितपूर्वत्वविशिष्टस्यसंभवात् किंवेत्यादिकल्पेदोषासंभवादादिमेषुत्रिष्वित्युक्तं अतथात्वादिति स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिक
त्वाभावात् स्वसमानाधिकरणाव्यवहितपूर्वक्षणोत्पन्नत्वाभावात् स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषयकत्वाभावाच्चेत्य
र्थः तदानींविरोधिसिद्ध्यादेर्नाशदशायाम् अनुव्यवसायादेरित्यस्यपञ्चम्यन्तस्यसंभवादित्यनेनयोजना अनुव्यवसायादितोनुमितिसंभवादित्यर्थः आदिनावाद्यप्रत्य
क्षांतराद्युपसंग्रहः ननुयत्रपरामर्शविषयिण्याकामिनीजिज्ञासयापरामर्शमात्रमुत्पाद्यनष्टं तत्रपरामर्शोत्तरक्षणेतस्याप्रतिबंधात् ज्ञानमात्रस्यैवानुत्पत्त्यापश्चादनु
मितिर्नस्यादतआह अंततः संस्कारेति अंततोजीवनयोनिकृतेरसत्वे नचयत्रसर्वांशेएवोपेक्षात्मक उक्तपरामर्शस्तत्रसंस्कारस्यासंभवस्तादृशस्थलेमानाभावा
त् अनुमित्यात्मककार्येणानुमितसंस्कारस्यान्यथानुपपत्त्यानुपेक्षात्मकस्यैवतत्रकल्पनात् इतोप्यस्वरसं [illegible] किंवेत्यादिकल्पस्याहतत्वादितिभावः ननुतादृशानुमिते
संस्कारजन्यत्वेस्मृतित्वापत्तिरतआह संस्कारजन्येति जन्यत्वंसमवायेनग्राह्यं नातः संस्कारध्वंसेव्यभिचारः प्रागेवशब्दः सुतरामर्थेनिपातितः निरासादितिप्रत्यभिज्ञायां
व्यभिचारादप्रयोजकत्वाच्चसंस्कारजन्यत्वेस्मृतित्वानियमादितिभावः ननूक्तप्रतिबंधिभयाज्ज्ञानवनिष्ठकारणतायाअवच्छेदकविधयाकार्यतायांतादात्म्यादिकमनिवेश्यतामभाव
रूपायाःपक्षतायाः कारणतायानन्निवेशेनकिंचिदपिबाधकमतस्तत्रापिप्रबंधिमाह स्याद्वेति तथासती त्यनुषज्यते ज्ञानमात्रस्यैवप्रायशोव्यधिकरणानुमित्यव्यवहि

CC-0. In Public Domain. Digitization by eGangotri

ना·प· तत्पूर्ववृत्तित्वात्तदन्यस्य मलपादेरभावः परामर्शविधुरेप्यात्मन्यस्तीति तत्रानुमितेर्वारणाय स्वसमानाधिकरणांतं अनुमितिश्च पक्षसाध्यादिविशेषनियंत्रिताग्राह्या तेनैव

१५ कसाध्यानुमितिदशायां सिद्ध्यादिसत्वेपि नान्यसाध्यकानुमितेरुत्पादः तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वलक्षणस्य वक्ष्यमाणाव्यवहितपूर्वत्वस्यानुमितिस्थूलका

लेपि सत्वात्तद्वृत्तिसिद्धिसत्वेप्यनुमित्यापत्तेरतः क्षणेति ननु यत्र सामग्रीवशात् साध्यतद्व्याप्ययोरनुमित्यात्मकपरामर्शः ततः साध्यस्यानुमित्सेतरं जायतामितीच्छात

तोऽनुमित्यंतरं तत्रानुमित्याकालेप्यनुमित्यापत्तिः पूर्वोत्पन्नानां सर्वेषामेव तदात्मगुणानां तादृशानुमित्यव्यवहितपूर्वक्षणवर्तित्वेनाविरोधित्वादत आह स्वसमानेति

15 तथाचोक्तस्थले प्रथमानुमितिक्षणस्यैव तादृशाव्यवहितपूर्वत्वानधिकरणतयातद्वृत्तित्वविशिष्टस्य परामर्शादेरेव विरोधिनः सत्वान्न दोष इति भावः अनुमित्युत्पत्तिप

र्यंतस्थापि स्थूलकालोपाधेरपि तादृशानुमित्यव्यवहितपूर्वत्वानधिकरणतयातद्वृत्तित्वविशिष्टस्य परामर्शमात्रस्य सत्वेप्यनुमितिर्न स्यादतः क्षणपदं ननु तादृशा

नुमित्यव्यवहितपूर्वत्वं तादृशानुमित्युत्पत्तिक्षणोत्पत्तिध्वंसप्रतियोगित्वरूपमेवाग्रे वक्ष्यते न तु तादृशानुमित्युत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वरूपं तथा सति स

र्वेषामेव क्षणानां तादृशानुमित्युत्पत्त्यधिकरणीभूतस्थूलकालोत्पन्नध्वंसप्रतियोगितया निरुक्ताव्यवहितपूर्वत्वानधिकरणत्वस्यैव दुर्लभत्वापत्तेरेवं च तादृशानुमित्युत्प

त्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वानधिकरणक्षणवृत्तित्वविशिष्टत्वे न प्रतिबंधकत्वमपेक्ष्य तादृशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्व विशि

ष्टत्वेन विरोधित्वं युक्तं क्षणद्वयाप्रवेशेन पूर्वतो लाघवादित्याशयेनाह स्वसमानेति अत्र तादृशसमयाव्यवहितपूर्वत्वं तादृशसमयोत्पत्तिकध्वंसप्रतियोगित्वमात्रं न तु तादृ

शसमयोत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वमाद्योत्पत्तेर्वैयर्थ्यान्निष्फलत्वाच्च समयपदं त्वव्यवहितघटकोत्पत्तेः कालिकसंबंधेन वृत्तित्वलाभार्थमन्यथानुमितिपूर्व

क्षणस्यापि तादृशानुमित्युत्पत्त्यनधिकरणबुद्ध्यादौ विषयित्वादिसंबंधेन वर्तमानोत्पत्तिको यो ध्वंसस्तत्प्रतियोगित्वेन तत्क्षणवृत्तित्वविशिष्टस्य परामर्शादेः प्रतिबंधकत

यास्वकालेप्यनुमित्यनापत्तेरिति ध्येयं नन्वनुमित्यव्यवहितपूर्वत्वं तदुत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वं तथा चाति पूर्वक्षणस्यापि अनुमित्युत्पत्त्यधिकरणस्थूलकालो

त्पत्तिकध्वंसप्रतियोगित्वात्तद्वृत्तिमत्वस्यापि सिद्ध्यादेरप्रतिबंधकत्वापत्तिरत आह तदव्यवहितेति तादृशानुमित्यव्यवहितपूर्वत्वं चेत्यर्थः शेषकल्पे निरुक्ताव्यवहित

पूर्वत्वस्याप्रविष्टतया सामान्यतोऽव्यवहितपूर्वत्वस्य निरूपणानौचित्यादिति ध्येयम् ननु जन्याभावत्वलक्षणध्वंसत्वस्य प्रवेशे वैयर्थ्यमभावान्तराणामुत्पत्तिविरहेणैव नि

रसादिति वाच्यं ध्वंसत्वनिरूपकप्रतियोगित्वलाभार्थं तदुपादानात् अन्यथा सर्वेषामेव क्षणानामनुमित्युत्पत्तिकालोत्पत्तिकस्वभेदात्मकध्वंसांतरप्रतियोगितयातिप्रसंगापत्तेः राम:

ध्वंसत्वस्याखंडत्वमते वैयर्थ्याशंकानुत्थानाच्चेति भावः न चेति वाच्यमित्यन्वयः अत्र उक्तेषु मध्ये प्रथम इति अन्त्ययोस्तु कल्पयोस्तादृशानुमित्यव्यवहितपूर्वत्वानधिक १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रणक्षणवृत्तित्वविशिष्टेन स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टेन च परामर्शो नैव प्रतिबंधादनुमित्सोत्पादकालेऽनुमितेर्नसं
भव इति भावः सिद्धिरसत्वेऽनुमित्सामवधूयानुमितिरेवोत्पद्यते परामर्शपूर्वं सिद्धिसत्वे च सैव तादृशाव्यवहितपूर्ववर्त्तिभिन्ना विरोधिनी भविता इत्यतः सिद्ध्यात्मकेत्युक्तं
प्रतिक्षणमवश्यं कस्यचिद्विनाशोपगमात् तत्तुरूपीयस्येत्युक्तं तद्वृत्त्यात्समयेऽनुमित्सोत्पादसमयेऽनुमितिः तादृशपूर्ववर्त्तित्वेन समानाधिकरणानुमित्यव्यवहित
पूर्वक्षणवर्त्तित्वेन प्रत्यन्यनुमित्साया अप्युपायेच्छात्वात्तत्कारणीभूतफलेच्छाया एवानुमितिप्रागवृत्तिभिन्नायास्सत्वादनुमित्सोत्पत्तिकालेऽनुमितेरसंभवः तथापि स्व
स्वात्मिकानुमितिर्जायतामित्याकारिकैवात्र सिषाधयिषा बोध्या सा च फलेच्छात्वादेव न फलेच्छान्तरमपेक्ष्यत इत्यदोषः परामर्शोप्यत्र स्मरणात्मको ग्राह्यः अन्यथा विशि
ष्टानुभवत्वेन दर्शमपेक्ष्यणीयस्य विशेषणज्ञानादेस्तादृशपूर्ववर्त्तिभिन्नत्वेन विरोधित्वसंभवात् न च स्मरणात्मकपरामर्शहेतोः संस्कारस्यैव फलनाश्यस्य तादृशपू
र्ववर्त्तिभिन्नत्वसंभवः समूहालंबनसंस्कारजन्यपरामर्शस्य चरमफलत्वाभावेन संस्कारनाशकत्वादिति वदंति यत्तु सिद्ध्यात्मकपरामर्शोऽत्रानुमितिरूप एव ग्राह्यस्तत्रा
पि फलेच्छादेरपि स्वसमानाधिकरणानुमित्यव्यवहितपूर्ववर्त्तित्वादेव प्रतिबंधकत्वा—— संभवात् तत एव च पुनरनुमितिरित्यत्र पुनः पदेन सिद्ध्यात्मकपरामर्शस्यानु
मितित्वं ग्रंथकृतैव व्यंजितं न च सिद्ध्यात्मकानुमितिसत्वेऽनुमित्सैव दुर्घटानुमित्यन्तरत्वप्रकारेण तत्संभवादिति मतं तत्तुच्छं अनवतरतेत्यत्र ग्रन्थासंगतेः क्षणिकपदा
र्थानभ्युपगमेन संयोगादीनामपि तादृशपूर्ववृत्तित्वेन प्रतिबन्धकत्वायोगादिति यद्यपि स्वावच्छिन्नसमानाधिकरणानुमित्यव्यवहितपूर्ववर्तितानवच्छेदकधर्मविशि
ष्टत्वेन प्रतिबंधकत्वविवक्षयाप्युक्तसिषाधयिषोत्पत्तिकालेऽनुमितेर्वारणं संभवतीति स्वोत्पत्तिक्षणावच्छिन्नतत्तत्सिद्धिव्यक्तित्वस्यैव तादृशपूर्ववर्त्तितानवच्छेदकतया
तद्विशिष्टाप्रसिद्धेः अनुमित्सापूर्वसत्वात् तथापि यथाश्रुतमेव समाधिं सौकर्यादाह अनव रतेति अनवरतम् अनुक्षणम् परिस्पंदमाना येः परिमिताः पवनादिपरमाण
वस्तैः सार्द्धं यः चेतनसंयोगसन्तानस्तदन्तर्गतसंयोगव्यक्तीनामनुक्षणमेव नाशादित्यर्थः तथा च परामर्शोपर्यंतस्यापि न्यः परमाणुतत्तत्संयोगव्यक्तय एव तत्रानुमितिं प्रति प्रति
बंधिका इति भावः ननु तत्र कारणाभावप्रयुक्तः फलानुत्पादः कारणान्तरमेवाक्षिपेदित्यत आह कारणान्तरेति ननूक्तक्रमेण कारणतानिश्चये सति तादृशसंयोगो परमः कल्प
नीयः कारणतानिश्चय एव तस्माकूवर्तिनां न संभवत्यन्वयव्यभिचारसंदेहेन प्रतिबंधादत आह अन्वयेति संदेहस्येति प्रकृताभिप्रायेणाविरोधित्वादिति ग्राह्याभावानव
गाहित्वादिति भावः ननु यत्र पक्षः साध्यवान् साध्यव्याप्यवान् साध्यानुमित्यंतरं चेष्टसाधनमित्या कारकानुमितेः पश्चात्साध्यानुमित्सा ततः साध्यानुमित्यंतरं तत्रानु
मित्साकालेऽनुमित्यनुत्पादेनान्वयव्यभिचारनिश्चयात्कारणान्तरमवश्यं कल्पनीयं पक्षणिकपदार्थानभ्युपगमादनुमित्सापूर्ववर्त्तिनां सर्वेषामेव समानाधिकरणप्रथमा

आ॰प॰ नुमित्यव्यवहितप्राक्क्षणवृत्तित्वेन तद्भिन्नत्वाभावादित्यस्वरसादाह उपादीयंतामिति प्रतिबंधकतयेति शेषः तथाच प्रथमानुमित्युत्पत्तिक्षणसंबंधा एव अनुमित्यव्यव-
१६ हितपूर्वक्षणवर्त्तिभिन्नत्वेनानुमितिप्रतिबंधकाइतिभावः तत्तदात्मसमयसंबंधानामतिरिक्तत्वमतेनेदं ननु स्याद्देत्याद्युक्तप्रकारत्रयमपि स्वत्वगर्भत्वादननुगतमतस्ताद्रूप्येण प्र-
तिबंधकतायामनेककारणपरिशेषापत्तिरत आह भवेति अत्र च तत्पुरुषीयानुमित्यव्यवहितपूर्वक्षणत्वं स्वप्रागभाववन्निष्ठकालिकसंबन्धेन तादृशानुमित्याश्रयशब्दत्वं वाच्य-
मतो नानुगमाद्यनवकाशः नच तादृशशब्दस्यानुमितिक्षणेपि सत्वात् पुनरनुमित्यापत्तिः कार्यसहभावेनैव तस्य हेतुत्वात् तादृशशब्दविशिष्टत्वं वा वक्तव्यं वैशिष्ट्यं च स्ववृत्ति-
16 त्वस्ववृत्तिध्वंसप्रतियोगित्वोभयसंबंधेन शब्दस्य चतुःक्षणस्थायित्वमते तमपहाय सुखदुःखादीनां द्विक्षणस्थायिगुणानामन्यतमस्यैव निवेशनीयमित्यभिनवः पं-
शाः पूर्वक्षणत्वादिनेत्यादिना तादृशपूर्वत्वानधिकरणक्षणाभाववत्वादेरुपग्रहः परामर्शादेःकारणत्वरक्षामनुसृत्याह तादृशेति अत्र तत्तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषी-
यानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेन हेतुतायां कालिकमेव व्यापकत्वं प्रविष्टमतः पुरुषांतरे तत्पुरुषीयानुमितिर्नापादनीया विशिष्टत्वादिनेत्यादिपदेन तादृशपूर्व-
त्वानधिकरणवृत्तित्वविशिष्टाभाववत्वादेः परिग्रहः ननूक्तरूपेण कारणतायामिष्टापत्तौ को दोष इत्यत आह तथाचेति उपमानादेरित्यादिना शब्दस्य परिग्रहः सर्वत्रेति
उक्तक्रमेणेत्यादिव्याप्त्याद्यप्रतिसंधानदशायामुत्पन्नयोरुपमितिशाब्दयोः कारणबाधेनानुमितित्वासंभवादेव तत्कारणयोरुपमानशब्दयोः प्रमाणान्तरत्वमिष्यते प्रागुक्तरू-
पेरनुमितिहेतुत्वे कारणबाधासंभवात्तयोरप्यनुमानएवान्तर्भावः ननु यत्रोपमित्यादिस्थलेनानुमिनोमि किंतूपमिनोमीत्यादिरेवानुव्यवसायस्तत्रैवोपमित्यव्यवहितपूर्व-
क्षणस्यानुमित्यव्यवहितपूर्वत्वाभावात्कथं सर्वत्रोक्तानुमितिसामग्री अन्यथोपमित्यादिकं प्रत्युपमित्यव्यवहितपूर्वक्षणत्वादिना हेतुत्वकल्पनात्सर्वत्रैवोपमितिसामग्री
संभवादनुमानस्य प्रमाणांतरत्वं भग्नमित्येव किंन्न रोचयेदित्यत आह विलीयेतैवेति परामर्शत्वादिनेति व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन व्याप्यवत्पक्षनिश्चय-
त्वेन चानुमितौ हेतुत्वं न स्यादित्यर्थः प्रागुक्तसविषयकत्वादिनैव परामर्शस्य तथात्वनिर्वाहादितिभावः बाधत्वादिनेत्यादिपदेन सत्प्रतिपक्षोपसंग्रहः प्रागुक्ताव्यवहितपूर्व-
वर्त्तिभिन्नत्वेनैव बाधादेः प्रतिबंधकत्वसंभवादितिभावः न च बाधादेर्विशिष्टबुद्धिसामान्यं प्रत्येव विरोधित्वादनुमितित्वावच्छिन्नं प्रतिबाधत्वादिना प्रतिबंधकत्वं प्रसक्तमे-
व नेति वाच्यं सति बाधे विशिष्टबोधेच्छाया साक्षात्कारिण्याइवानुमित्यादिरूपाया अपि विशिष्टबुद्धेरुत्पत्तिनिप्रियानुमितित्वावच्छिन्नं प्रत्येव बाधत्वादिना पृथक् विरोधि-
त्वस्यावश्यकत्वादितिभावः कार्यांतरेषु शाब्दबोधदाहादिषु अतथात्वमकारणत्वमप्रतिबंधकत्वं च प्रसज्येतेत्यन्वयः एवं तथात्वमित्यत्रापि तथाच शाब्दबोधत्वा- राम
वच्छिन्नं प्रति स्वसमानाधिकरणशाब्दाव्यवहितप्राक्क्षणोत्पन्नविषयकत्वेन हेतुत्वे विनश्यदवस्थस्य पदार्थोपस्थित्यादेः शाब्दधीहेतुत्वं न स्यात् प्रत्युत शाब्दधी- १६

प्राक्क्षणोत्पन्नसंस्कारादेरपि तत्र हेतुता स्यात् एवं स्वसमानाधिकरणदाहाव्यवहितप्राक्क्षणवृत्तिभिन्नत्वेनैव मण्यौषधादेर्दाहं प्रति प्रतिबंधकत्वे कदाचिदुपहितदाहानां मण्या
दीनां दाहप्रतिबंधकत्वं न स्यात् प्रकृते तादृश्ये णोदासीनस्यापि घटादेर्दाहविरोधित्वं स्यादित्यर्थः अत एव कार्याव्यवहितपूर्वत्वादेः कारणतानवच्छेदकत्वादेव द्वितीय इ
ति तादृशानुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावमात्रं पक्षतेति ग्रंथोक्तकल्प इत्यर्थः द्वितीयप्रकारे दोषान्तरमप्याह वैयर्थ्याच्चेति स्वसमानाधिकरणतत्तदनुमित्यव्यव
हितपूर्ववर्तित्वविशिष्टप्रतियोगिकभेदकूटस्य प्रवेशे गौरवात् स्वप्रागभाववन्निष्ठस्वसामानाधिकरण्यसंबंधेन प्रकृतसाध्यकानुमितिविशिष्टत्वलक्षणमेव तादृशानुमि
त्यव्यवहितपूर्ववर्त्तित्वं द्वितीयप्रकारे लाघवान्निवेश्यतयाच तदवच्छिन्नभिन्नसिद्ध्यभावस्यैव सम्यक्त्वेन प्रथमसिद्धिपदं विफलमखंडाभावघटकत्वेपि तादृश्येण हेतुतायां
गौरवादिति भावः [illegible]पातिमतं दर्शयति सिषाधयिषा इत्यादि केवलपरामर्शसत्वेप्यनुमितिर्न स्यात् तस्यैवानुमित्साविरहविशिष्टसाधकमानस्य सत्वादतोऽनुमानातिरिक्तप
दम् अत्र प्रत्यक्षमानमेव निवेश्यं पि तु युक्तं नत्वनुमितिभिन्नसिद्धिजनकमाने समानविषये शाब्दादिसामग्रीसंभवेऽनुमितेरेवोत्पादात् तत एव एकपदार्थस्यापरपदार्थसंसर्ग
व्याप्यधर्मवत्वस्य योग्यतात्वे संसर्गस्यानुमितिरेव स्यात् ननु शाब्दधीरिति योग्यताग्रंथे मणिकारैरप्युक्तमिति वदंति अन्यतरस्येति इत्थं च साधकसिद्धिमानं च सिद्ध्यात्मकमि
तिजनकप्रमाणमित्युभयमेव मूलस्य साधकमान शब्दस्यार्थ इति भावः उपहितमिति तया सिद्ध्या उपहितं विशिष्टं पक्षतावच्छेदकसामानाधिकरण्येन सिद्धिविशिष्टसत्तादृ
शसिद्धिजनकमिति यावत् तत्सामग्री अनुमित्यन्यसिद्धेः सामग्री चक्षुरादित्यादिना पदज्ञानादेरुपग्रहः ननु सिद्ध्यनुपधानदशायां सिद्धिजनकस्य प्रत्यक्षसामग्र्यादेः पृथगेवा
नुमितिविरोधित्वं वाच्यं स्वजन्यैकसिद्ध्युपहितप्रत्यक्षसामग्र्या सिद्ध्यन्तरजननदशायामनुमितेर्वारणार्थमेव निरुक्तसाधकमानस्य पक्षतायां प्रवेश्यत्वात् तत आह अनुमा
नेति वैयर्थ्येति साधकमानस्य परामर्शादेरनुमितेः पूर्वं तद्वैशिष्ट्याभावादेव विरोधित्वासंभवादिति भावः। अनुमितिभिन्नसिद्धिप्राक्क्षणावच्छिन्नत्वमेव तादृशसिद्ध्युपहि
तत्वमित्युक्तौ नातिप्रसंगः न वा वैयर्थ्यमिति ध्येयम् अनुमितिसामग्र्यभावत्वेनेत्यादि अन्यथा वन्ह्यादेः सन्निकर्षदशायामनुमित्सया प्यनुमितिर्न स्यादिति भावः। प्रत्य
क्षसामग्र्यभावत्वेनेति अन्यथा समानविषये सत्यामपि प्रत्यक्षसामग्र्यामनुमित्युत्पादप्रसंगादिति भावः अन्योन्याश्रयादिति अनुमितिसामग्र्यभावत्वेन प्रत्यक्षहेतुताग्र
हेत्तरमेव प्रत्यक्षसामग्रीमवगत्य तदभावत्वेनानुमितिहेतुत्वं ग्राह्यमनुमितिसामग्रीज्ञानं चानुमितिं प्रति प्रत्यक्षसामग्र्यभावत्वेन हेतुताग्रहं विनानेत्यन्योन्याश्रयाद्दु
त्केरूपेण कार्यकारणभावग्रहासंभवादित्यर्थः अथानुमितिसामग्र्यभावातिरिक्तं प्रत्यक्षहेतुस्तोममेव प्रत्यक्षसामग्रीपदेनोपादाय सिद्धितदन्यतरत्वावच्छिन्नाभावस्य
पक्षताविधयानुमितिहेतुत्वमतो नान्योन्याश्रय इत्यत आह स्थाणुत्वेति आरोपलक्षणेति अनुमितिमात्रस्यैवानुत्पत्तिभिया सिद्धिप्रत्यक्षसामग्र्यन्यतराभावस्यैकार्यस

CC-0. In Public Domain. Digitization by eGangotri

ना॰प॰ ह्रवर्तित्वेन हेतुत्वासंभवादिति भावः प्रतियोग्यारोपातिरिक्तस्य प्रत्यक्षकारणस्तोमस्यैव प्रत्यक्षसामग्रीपदेनाभिधानात्प्रतियोग्यारोपस्याभावप्रत्यक्षं प्रति हेतुत्वेमानाभावा
१७ च्चेदं न युक्तमित्यस्वरसेन कश्चिदित्यक्तं स्वयं दूषणमाह। वस्तुतस्त्विति अनुस्वातं त्र्यमन्यथासिद्धत्वं तत्त्व प्रत्येकाभावस्यान्वयव्यतिरेकयोर्विवादग्रस्तमत आह। नियमेति अ
न्यतरत्वेन प्रतियोगिज्ञानात्पूर्वं प्रत्येकप्रतियोगिज्ञानध्रौव्येन प्रत्येकाभावस्यैव प्रथममुपस्थितत्वादित्यर्थः। ननु प्रत्येकाभावाग्रहेपि शाब्दादिनान्यतरत्वावच्छिन्नाभावस्य ग्रहसं
भवान्नेदमुक्तमत आह लाघवादिति प्रत्येकाभावत्वेन हेतुतायावच्छेदकलाघवादित्यर्थः प्रत्येकमनुमित्साविरहविशिष्टसिद्ध्यभावत्वेन तथाविधप्रत्यक्षसामग्र्यभावत्वेन च त
57 थात्वं अनुमितिहेतुत्वमित्यर्थः ननु प्रत्येकाभावत्वेन हेतुद्वयमपेक्ष्यान्यतराभावत्वेन गुरुणाप्येकमेव हेतुत्वं कल्पनार्हमत आह। अन्यथेति। अत्र पक्षतायां बाधादेरित्यादि
नासत्वेति पक्षसंग्रहः तथा चानुमित्साविशिष्टसिद्धेस्तथाविधप्रत्यक्षसामग्र्या बाधसत्वेति पक्षादेश्चान्यतमत्वावच्छिन्नाभावत्वेनैवानुमितिहेतुतास्यात्सद्धाधाद्यभावस्य पृ
थक्कारणत्वे गौरवादित्यर्थः नच विशिष्टबुद्धिसामान्यं प्रत्येव बाधसत्वेति पक्षयोर्विरोधित्वात् पक्षताकुक्षौ तन्निवेशानौचित्यमिति वाच्यं सति बाधादिनिर्णये वुभुत्सादशायां
विशिष्टप्रत्यक्षवत्ताद्दृशानुमित्याद्यप्रसंगेन विशिष्टत्वानुमितित्वावच्छिन्नं प्रत्यपि बाधादेर्विरोधित्वस्यावश्यकत्वात् वस्तुतोत्रान्तर्भावप्रसंगादिति ग्रंथस्याऽन्यतरत्वेन प्रतिबं
धकतायामन्तर्भावप्रसंगादित्यर्थः तथा च विशिष्टबुद्धिसामान्ये विशिष्टानुमितित्वाद्यवच्छिन्ने वा बाधसत्वेति पक्षान्यतरत्वावच्छिन्नाभावत्वेन हेतुताप्रसंगस्तद्ग्रंथतात्पर्य
मन्यथा तद्विधेयकानुमितित्वावच्छिन्नं प्रत्येव सिद्धिप्रत्यक्षसामग्र्योस्तत्प्रकार कानुमितित्वावच्छिन्नं प्रत्येव बाधसत्वेति पक्षयोर्विरोधित्वात्तावदन्यतमत्वावच्छिन्नाभा
वत्वेन पक्षतायामननुगतानुमितिहेतुत्वासंभवादिति ध्येयम् यद्वा बाधस्य धीविशिष्टधीसामान्यविरोधितया साध्यविधेयकानुमितिं प्रतिपक्षतायां हेतुतायामन्तर्भावे विपरीतगौर
वमाशंक्यैव दीधितिकृता बाधादेरित्यत्रादिपदमुपात्तं तेन तत्तल्लिंगकपरामर्शाभावकालीनतत्तल्लिंगकानुमित्साव्यक्तीनां परामर्शधर्मिकतत्तद्प्रामाण्यव्यक्तीनां चोपग्रहः पक्ष
धर्मिकसाध्यविधेयकानुमितित्वावच्छिन्नं प्रत्येव सिद्धिप्रत्यक्षसामग्रीनिरुक्ततल्लिंगकानुमित्सापरामर्शधर्मिकतत्तद्प्रामाण्यव्यक्तीनामन्यतमाभावत्वेनाप्यनुमितेरेकरूपे
णपक्षतायाः कारणत्वं स्यादिति फलितार्थः अथवानुसिद्धिप्रत्यक्षसामग्र्योरन्यतरत्वावच्छिन्नाभावस्याखंडस्य तद्व्यक्तित्वेनैव साध्यविधेयकानुमितिहेतुत्वं वाच्यमतः
प्रत्येकाभावत्वेन हेतुतायां न लाघवावकाशः इत्यत अस्तु तथाविधमाह अन्यथेति। यद्यखंडाभावस्य तद्व्यक्तित्वेन साध्यविधेयकानुमितित्वावच्छिन्नं प्रति हेतुत्वं बाधकाभावस्य पिन
स्त्ति योग्य विशेषितरूपेणाभावस्य हेतुतामन्यथासिद्धान्तैस्त्वपरित्यागस्तु सिद्धिप्रत्यक्षसामग्र्योरन्यतरत्वावच्छिन्नाभावस्याखंडस्यापि हेतुतायां समानद्वयमपि माह शाम पर: पं रा॰म॰
थाः अथाभावद्वयस्य हेतुत्वेऽनुमित्साविरहस्य सिद्धिनिवेशाद्गौरवमन्यतराभावस्य हेतुतायां तु सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वेनानुमित्साविरहस्य सकृदेव तस्य विशेषणाल्लाघवमि १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्याशंक्य निषेधति सिद्धिश्चेति अन्यतराभावस्य हेतुत्वपक्षेप्यनुमित्साविरहो हि निवेशङ्त्याह शाब्दसिद्धावित्यादिना शाब्दान्यसिद्धिदशायामशाब्दप्रकारिकेच्छैव नोत्पद्यत इ
त्यतः शाब्दसिद्धाविरुक्तं विरहस्येति पृथग्विशेषणतायामऽन्वयः अनुमित्साद् इति अनुषंगवशादनुमितेरनुत्पादादित्यर्थः प्रकारांतरेणासंभवात्स्वसिद्धिकायाएव सिषाधयिषा
या अनुमितिनिर्वाहकत्वादिति भावः अनुमितित्वादीत्यादिपदं प्रत्यक्षातिरिक्तज्ञानत्वादिप्रकारिकेच्छासंग्रहार्थं पृथगिति नचयद्यदिच्छासत्वे सिद्धिप्रत्यक्षसामग्र्योरन्यतरद
शायामनुमितिः तत्तदिच्छाव्यक्त्यभावकूटविशिष्टस्य सिद्धिप्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षता तथा च प्रत्यक्षसामग्रीकालीनाऽशाब्दज्ञानं जायतामितीच्छाव्यक्तेरुत्तेजकप
कोटावप्रवेशादेव तदानीमनुमित्स्कत्वादसंभवादनुमित्सायाः सकृदेव विशेषणत्वं संभवतीति वाच्यं सिद्धिप्रत्यक्षसामग्र्यन्यतरस्थलीयतत्तदिच्छाव्यक्तीनामभावसमुदायैक
स्यैकत्रनिवेशे तेषां विशेषणविशेष्यभावे विनिगमनाविरहेण महागौरवात्तदपेक्षया सिद्धिस्थलीयतत्तदिच्छाविरहविशिष्टसिद्ध्यभावत्वेन प्रत्यक्षसामग्रीस्थलीयतत्तदिच्छा
विरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेनैव हेतुत्वस्यौचित्यादिति भावः स्वनिवर्त्तकेति स्वनिवर्तकं यत्प्रत्यक्षादि तत्सामग्रीसमवहिततत्वान्योत्तेजकत्वमिति स्वनिवर्तकानुमितिसा
मग्रीसमवहितताया अनुमित्साया उत्तेजकत्वस्यार्थप्रत्यक्षादीत्युक्तमादिना शाब्दोपमित्यादेः संग्रहः अन्यत्वादिनेत्यादिपदेन सिद्धिप्रत्यक्षसामग्र्यन्यतरदशायां यद्यदिच्छान्य
क्तिसत्वे चानुमितिस्तावदन्यतमत्वरूपस्येच्छानुगमकधर्मस्योपग्रहः ननु प्रत्येकाभावयोः कारणताद्वयमपेक्ष्यान्तिगुरुणाप्युक्तान्यतराभावत्वेनैव कारणत्वं युक्तं बाधसत्वेपि प
क्षान्यतराभावत्वेनैव हेतुतास्वीकारेपिक्षति विरहादत आह अन्यतरत्वघटकयोरिति सिद्धिभेदविशिष्टं यत्प्रत्यक्षसामग्रीभिन्नं तदन्यत्वं प्रत्यक्षसामग्रीभेदविशिष्टं यत्सिद्धिभिन्नं
तदन्यत्वं वा सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वमित्यत्र विनिगमकाभावस्तथा चानुमित्साविरहविशिष्टतादृशप्रत्येकावच्छिन्नाभावत्वेन हेतुतावच्छेदकभेदेन कारणताद्वयमुक्त
मिति भावः ननु प्रतियोगि विनैव सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वरूपाखंडभेदव्यक्तिः पक्षतायां निविष्टा तत्र च विशेषणविशेष्यव्यत्यासशंकापि नास्ति न च प्रतियोगिविनाकृ
ताखंडभेदव्यक्तिमुपादाय पक्षतानिर्वचने प्रतियोग्यविशेषितेनापि सिद्धिप्रत्यक्षसामग्रीगगनाद्यन्यतमत्वेन सिद्धिप्रत्यक्षसामग्र्यनुमितिपूर्ववर्तिभिन्नतत्तज्ज्ञानादिघटितान्य
तमत्वेन वाऽवच्छिन्नाभावानुमितौ हेतवस्त्युस्तथा च परामर्शत्वादिनाप्यनुमितौ हेतुत्वं न स्यादित्युक्तप्रायमिति वाच्यं सिद्धिमात्राभावस्य पक्षतात्वेपि तादृशाभावानां हेतुत
प्रसंगस्यान्यथासिद्ध्यानिरसनीयत्वात्त्वन्मते गुरुधर्मावच्छिन्नाभावत्वेनेव मन्मतेपि गुरुधर्मावच्छिन्नप्रतियोगिताकस्याप्यखण्डाभावस्य तद्व्यक्तित्वेन हेतुतायामन्यथासिद्धि
संभवादत आह आत्मनिष्ठेति भिन्नभिन्नेन स्वजनकादृष्टवत्वादिना कालिकरूपेण वेत्यर्थः कालिकादिघटितसामग्र्याः प्रतिबंधकत्वे गौरवादाह तत्तदसाधारणेति चक्षुः सं
योगाद्यात्मिकायाः प्रत्यक्षसामग्र्या इत्यर्थः अभावः कारणमिति प्राक्तनेनान्वयः ननु प्रत्यक्षासाधारणकारणसमवहितमनोयोगसिद्ध्यन्यतरयोः समवायासंबंधावच्छिन्नाभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·प· एवहेतुर्वाच्यइत्यत आह मणिविशिष्टस्येतिम नोयोगादेरित्यादिनाज्ञानाद्युपग्रहः अयोगादिति एकजनकत्वप्रतिबंधकत्वयोर्विरोधादितिभावः यद्यप्यात्ममनोयोगत्वेनानुमि
१८ तिजनकस्यापि निरुक्तान्यतरत्वेन तत्प्रतिबंधकत्वेपि न क्षतिः एकरूपेण तत्तयोर्विरोधान्मणित्वापेक्षया गुरुत्वेनैवमणिविशिष्टवन्हित्वेन दाहप्रतिबंधकत्वाकल्पनात् तथा
पि विशिष्टाभावस्य विशेषणाद्यभावानतिरिक्तत्वादखंडनव्यक्तित्वेन हेतुत्वासंभवादुक्तान्यतरत्वावच्छिन्नाभावत्वेन च हेतुत्वे ऽन्यतरत्वांशे विशेषणविशेष्याभावव्यस्ता
18 सेन गुरुतरकार्यकारणभावद्वयापत्तेः सिद्धिप्रत्यक्षसामग्र्योः प्रत्येकाभावत्वे नैवहेतुत्वमित्येवमूलं युक्तमिति ध्येयं तथा चेति प्रतिबंधकतावच्छेदकसंबंधाननुगमे
चेत्यर्थः तयोः सिद्धिप्रत्यक्षसामग्र्योः प्रतियोगितावच्छेदकसंबंधभेदादिवत्तदवच्छेदकताघटकसंबंधभेदादप्यननुगतरूपेण संभवं दर्शयितुमाह एवमिति एकप्रहरा
द्यवच्छेदेनैकात्मनि सिषाधयिषाविरहविशिष्टसिद्धेस्सत्त्वेप्यनुमित्यादशायां पक्षतासंपत्त्यर्थमेककालेति कालपदं स्वपरमिति यद्यपि पूर्वक्षणाद्यवच्छेदेनैवानुमित्या
विरहविशिष्टायाः सिद्धेरनुमित्यादशायामपि सत्वात्तदानीं पक्षतानस्यान्नचानुमित्याविरहेणोपलक्षितायाः सिद्धेः सिषाधयिषादशायां सत्त्वेपि न तद्विरहवैशिष्ट्यावच्छि
न्नसिद्धेः सत्त्वं तदानीं विशेषणाभावादिति वाच्यं तथासत्येकक्षणावच्छेदेनेत्यस्य वैयर्थ्यापत्तेः तथापि सामयिकानां तेषाभावानां समवायावच्छिन्नमेवाधिकरणत्वं स्वरू
पाख्यसम्बन्धेन त्वधिकरणत्वमात्रं तथा सति प्रतियोगिसत्त्वदशायामपि तदधिकरणे तदभावापत्तेः तदीयसंबंधप्रयुक्तत्वात्तद्वत्त्वस्येत्याशयेनैकक्षणावच्छेदेनेत्युक्तं
अत एव रूपवत्तानियामकसंबंधो न शुद्धसमवायः वाय्वादेरपि रूपवत्तापत्तेः किंतु तत्तद्व्यक्तिनिरूपितसमवाय एवेति सिद्धांतः यद्विाभावस्य स्वरूपमेव स्वरूपसंबंधः स च
प्रतियोगिसत्त्वदशायामधिकरणे न वर्तते प्रतियोगिनस्तद्विरोधित्वात् वृत्तिमतद्द्वृत्तेरव्याप्यवृत्तित्वात् समवायिकत्वमभावस्य न समवायघटितस्वरूपसंबंधेन वृत्तिमत्वं प
रंतु समयविशेषावच्छेदेन स्वरूपसंबंधेन वृत्तिमत्वं गोत्वाद्यभावानां तु वृत्तिनैसमयावच्छिन्नाभावात् भावाभावयोरेकधर्मिणि सत्तायामेव विरोधभंजनार्थमवच्छेदकस्वीका
रात् इदानीमश्वे गोत्वं नास्तीत्यादिप्रतीतौ चाधिकरणत्वेनैव समयस्य भानादिति विभाव्यते तदेकात्मवृत्तित्वलक्षणस्य वैशिष्ट्यस्य समवायित्वप्रदर्शनार्थमेवैकक्षणाव
च्छेदेनेत्युक्तं न च वैशिष्ट्योपि तदन्तर्भावद्गुरुत्वमद्गुरुचरणाः अन्यादृशं स्वाश्रयनिष्ठादृष्टजन्यत्वादिरूपं न चानुमित्याविरहविशिष्टसिद्धेरनुमित्याविरहविशिष्टप्रत्यक्ष
सामग्र्याश्चान्यतरत्वावच्छिन्नाभावत्वेन हेतुत्वे द्विविधस्य वैशिष्ट्यस्य प्रवेशेपि नाननुगम इति वाच्यं प्राक्क्षणावच्छेदेन सिषाधयिषाविरहविशिष्टायाः सिद्धेः प्रत्यक्षसा
मग्रीवा तस्याः सिषाधयिषाविरहविशिष्टतादशायामपि निरुक्तान्यतरत्वेन प्रतिबंधकत्वात्तदुत्तरक्षणेऽनुमित्यनापत्तेः न च सिषाधयिषाविरहविशिष्टतादशायां सिद्धेः राम·८
सिषाधयिषाविरहविशिष्टान्यत्वमेव भेदस्याव्याप्यवृत्तित्वात् तथा च तदानीं निरुक्तान्यतरत्वावच्छिन्नं नास्त्येवेति वाच्यं तथाप्युक्तान्यतराभावेन हेतुत्वे गुरुतरका १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यकारणभावद्वयापत्तिः तादृशस्याखण्डस्य प्रमाणाभावेन निरस्तत्वादिति भावः ननु यद्यनुमित्साविरहविशिष्टप्रत्यक्षादिसामग्र्याभावोऽपि पृथगनुमितिहे
तुस्तदा मूलस्थसाधकमानपदेनापि सामग्रीविशेषणत्वाभिधेयतां यथाश्रुतानुरोधान्नतु साध्यवत्तानिश्चय इत्यत आह सामग्रीविशेषेति लाघवादिति अनुमानातिरिक्तसिद्धि
४७ सामग्रीमध्ये सिद्धेः प्रवेशे लाघवादित्यर्थः तथा च प्रत्यक्षपदप्रवृत्तिनिमित्तनिर्वचनानुरोधादेव साधकमानपदेन साध्यनिश्चयो व्याख्यात इति भावः प्रवृत्तिनिमित्तनिर्वचने मूल
स्वरसमाह तदेवेति अन्यथानुमितिकरणमिदमित्येव ब्रूयात्तावतापि यद्यपि इत्याद्युक्तशंकाव्युदाससंभवादिति भावः नन्वेवमपि लाघवाद्वाधनिश्चयाभाव एव पक्षपदप्रवृ
त्तिनिमित्तमस्त्वित्यत आह फलानुपहितेति स्वविषयसिद्ध्यनुपहितत्तदनुमित्साविरहविशिष्टेत्यर्थः विशिष्टबुद्धिसामान्यं प्रत्येव बुभुत्साविरहविशिष्टबाधनिश्चयाभा
वत्वेन हेतुत्वमतेऽपि लाघवमाविस्कर्तुमनुपहितान्तानुसरणं न निविशतद्दत्येस्य पक्षपदशक्यतावच्छेदकतायामित्यादिः ननु सिद्ध्यभावस्य पक्षतात्वेऽपि सिद्धिदशायां पर्व
तादौ पक्षव्यवहारो दुर्वारः समवायावच्छिन्नसिद्ध्यभावस्य विशेषणतया पर्वते सत्त्वात् न च तदीयसिद्धिविशेष्यत्वाभाव एव तं प्रति पक्षव्यवहारनिमित्तं न स्यानुमित्सहेतु
त्वात् अनुमितिहेतावेव पक्षतायाः प्रवृत्तिनिमित्तत्वात् पक्षतानुमितिहेतुरित्यादिव्यवहारादाह विशिष्टेति अनुमित्साविरहविशिष्टेत्यर्थः परंपरासंबंधादिति तथा च
प्र पदयत्र पुंसि निरुक्तसिद्ध्यभावस्तत्कालावच्छेदेन तत्पुरुषीयस्वप्रतियोगिविशेष्यत्वाभावरूपपरंपरासंबंधेन निरुक्तसिद्ध्यभाववत्त्वं तत्कालावच्छेदेन तत्पुरुषं प्रतिपक्षव्य
वहारनिमित्तमिति भावः ननु सिषाधयिषाविरहविशिष्टप्रत्यक्षादिसामग्र्यभावस्य पृथगपि हेतुत्वं दुर्घटं पुमन्तरावच्छेदेनानुमित्साविरहविशिष्टायाः प्रत्यक्षसामग्र्याः स
त्त्वदशायामनुमित्सासत्त्वेऽनुमित्यपलापापतेः न चानुमित्साकालीनान्यत्वमेव सामग्रीविशेषणं तथा सति पुमन्तरेऽनुमित्सादशायां तद्विधुरस्यापि पुंसः प्रत्यक्षसामग्रीस
त्त्वेऽप्यनुमित्यापत्तिः अतः पुरुषविशेषान्तर्भावेण सामग्र्यभावहेतुत्वं निर्वक्ति एकस्येत्यादिना तद्विरहिणः अनुमित्साविरहिणः तत्पुरुषीयेत्यादि अत्र तत्पुरुषीयत्वं तत्पुरुषा
वच्छिन्नत्वं तदनुमित्साविरहस्यैव विशेषणं तेन तत्पुरुषावच्छेदेनानुमित्साविरहकालीनो यस्तत्पुरुषीयप्रत्यक्षसामग्रीविशेषस्तद्विरहः पर्यवस्यति यथाश्रुते तत्पुरुषी
यत्वस्यानुमित्साविशेषणत्वे तत्पुरुषीयानुमित्सादशायामपि घटावच्छेदेन तदभावसत्त्वात्तदानीतनप्रत्यक्षसामग्र्या अपि तदीयानुमितिं प्रतिबंधकत्वापत्तेः पक्षतायाः
मिवात्राप्यनुमित्साव्यक्तयो विशेष्य निवेश्याः तेन वस्त्वन्तरस्यापि परामर्शदशायामनुमितित्वाप्रकारकेच्छासत्त्वेऽपि सन्निकृष्टस्य वन्ह्यादेर्नानुमितिर्न वा वन्हेरनुमित्सा
प्रत्यक्षेच्छयोः सत्त्वदशायामुभयसामग्रीसमवधानेऽनुमितिस्तत्रानुमित्साव्यक्तेरुत्तेजककोटावप्रवेशात्प्रत्यक्षबुभुत्साविरहविशिष्टाया एवानुमित्साया उत्तेजकत्वा
द्दोष इत्यपि वदंति सिद्धिसामग्रीमात्रस्याप्रतिबंधकत्वादुक्तविशेषेति तेन प्रत्यक्षात्मकसिद्धिसामग्रीलाभः यद्यपि सिद्ध्यात्मकप्रत्यक्षस्यापि सामग्रीमात्रं न प्रतिबन्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·प· केप्रसिद्धसाध्यकस्थलेसर्वत्रैवसाध्यवत्त्वोपनीतभानसामग्रीसंभवात् नापिलौकिकप्रत्यक्षसामग्रीतथावंशेसर्पत्वव्याप्यवत्तानिश्चयदशायांमंडूकवंशाजनादिव
१९ लात्सर्पत्वाद्यलौकिकप्रत्यक्षानुत्पत्तिप्रसंगात् तथासाक्षात्कारत्वनिरूपितसाध्यनिष्ठप्रकारताप्रत्यक्षसामग्रीप्रवेश्यताहृशीचप्रकारतालौकिकइंद्रियदोषविशेषज
न्येपिसाध्यस्यप्रत्यक्षेवर्ततएवउभयत्रैवसर्पसाक्षात्क रोमीत्यनुभवादित्यन्यत्रविस्तृतं नचैवंसाध्यस्यनिर्विकल्पसामग्र्याःप्रतिबंधकत्वंनस्यात् इष्टत्वात्तत्रतस्याःसु
19 श्वक्प्रतिबंधकत्वोपगमेपिक्षत्यभावाच्च अनन्यगतिकतयेति नचैवंतत्पक्षकसाध्यकानुमितिंप्रत्यनुमित्साविरहविशेषितेनतद्धर्मिकसाक्षात्कारत्वनिरूपिततत्प्रकारता
कत्वेनैवविरोधित्वं तथाचतदभावस्यकार्यसहभावेनहेतुत्वादेवनतद्वत्ताप्रत्यक्षोत्पत्तिकालेताहृशानुमित्यन्यथागतिरस्त्येवेतिवाच्यं यत्रपर्वतत्वसामानाधिकरण्ये
नवन्हिमत्ताप्रत्यक्षोत्पादःतत्रोत्तरकालंपर्वतत्वावच्छेदेनापिवन्ह्यनुमितेरनुत्पादप्रसंगात् नचपर्वतत्वावच्छेदेनवन्ह्यादिसाक्षा त्कारत्वेनैवविरोधित्वमिति
वाच्यं तथासतिपर्वतत्वसमानाधिकरण्येनसाध्यवत्ताप्रत्यक्षसामग्रीसत्वेप्यनुमित्यापत्तेः वस्तुतोयत्रानुमित्सानंतरंसाध्यतद्व्याप्यवत्त्वयोःप्रा त्यक्षिकपक्षध
र्मिकनिश्चयादनुमितिस्तत्र कार्योत्पत्तिकालेअनुमित्साविरहविशिष्टसाध्यवत्ताप्रत्यक्षाभावस्यासत्त्वात्तत्कार्यसहभावेनतदभावस्यहेतुत्वंदुर्घटमेवेति
ध्येयं अनुगतत्वादिति मणिमंत्रौषधीनामुत्तेजकत्वस्याभावादि तिभावः इहापि अनुमितिस्थलेपि दर्शितइति अनुमित्युत्पप्रत्यक्षादिभिन्नज्ञानजायतामित्यादिनाबि
धेच्छायाउत्तेजकत्वस्यप्रदर्शितत्वादितिभावः ननुयत्पक्षकयत्साध्यकानुमितिस्थलेसिद्धिदशायामेकविधैवानुमित्सातस्यास्ताद्रूप्येणहेतुतायामनुगमएवसिद्धिदशा
यद्यनुमित्सासत्वेऽनुमितिस्तदनुमित्साविरहकूटत्वावच्छिन्नाभावत्वेनैवानुगतरूपेणवासिद्ध्युत्तरानुमितिसामान्यहेतुत्वंवाच्यमतआह सिद्ध्युत्तरेतिसिद्धिसामान्या
व्यवहितोत्तरत्वमप्रसिद्धं तत्तत्सिद्ध्युत्तरानुमितित्वमननुगतं सिद्ध्युत्तरत्वमात्रंचातिप्रसक्तमितिभावः सिद्धिस्थितिकालीनामिति स्ववृत्तिप्रागभावप्रतियोगित्वकालिको
भयसम्बन्धेनसिद्धिविशिष्टामित्यर्थः प्रागभावासत्त्वमतेप्याह स्वेतरेति वृत्तिभेदप्रतियोगित्वकालिकोभयसंबंधेनसिद्धिविशिष्टामित्यर्थः तेनस्वत्वाननुगमेप्यदोषः
विनाशीति सिद्धिनाशकालोत्पन्नानुमितीनांसिद्धिस्थितिकालीनत्वाभावेनानुमित्सायास्तत्राप्रयोजकत्वादितिभावः ननुतदानीमपिकस्यचित्सिद्धिसत्वेनसिद्धिनाश
कालीनोत्पन्नानुमितेरपिस्वेतरसिद्धिकालोत्पत्तिकत्वमेवेत्यनुमित्सांविनातस्याःकथमुत्पादःस्यादतआह एकस्येति अनुमित्सादेति तदनुमितेरप्यन्यदीयसिद्ध्युत्तरं
रोत्पत्तिकत्वेनानुमित्साप्रयोज्यत्वादितिभावः अनेनेति तत्पुरुषीयस्वेतरसिद्धिकालीनतत्पुरुषीयानुमितिंप्रतितत्पुरुषीयानुमित्सायाइवतत्पुरुषानुमितिसामान्यंप्र सम
त्यपिविनश्यदवस्थिततदीयतत्तत्सिद्ध्यभावत्वरूपेणहेतुत्वस्यावश्यकतयापृथक्पुरुषीयानुमितिस्थलएवानतहेतुहेतुमद्भावप्रसंगइत्यर्थः तेनसिद्धिनाशदशायाम १९

CC-0. In Public Domain. Digitization by eGangotri

पितस्यानुमित्युत्पादस्यानुद्भवान्न्यूनत्वमित्यपास्तं ननु सिद्ध्यव्यवहितोत्तरानुमितित्वावच्छिन्नंप्रत्येव सिषाधयिषायाः कारणत्वं वाच्यं तदव्यवहितोत्तरत्वं च स्ववृत्तिप्रागभावप्रतियोगि
त्वसामानाधिकरण्योभयसंबंधेन सिद्धिविशिष्टायाः कृतेः सामानाधिकरण्यरूपग्रहस्यमतो नोक्तदोषावकाश इत्यत आह अपि चेति सामान्यसामग्री नइति सिद्ध्यभावस्थलीयानुमितौ कृप्तहे
तुताकपरामर्शाद्यात्मककारणस्तोमादित्यर्थः ननु विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वात्प्रकृते चानुमित्सापरामर्शमात्रादप्यनुमित्युदयात् तथा चोक्तनियमाभावा
त्सिद्ध्यात्मकविशेषसामग्रीविरहात्कुतोनुमित्यापत्तिरत आह नहीति ईदृशेति अनुमित्साघटितेत्यर्थः नास्तीति विनानुमित्सां परामर्शमात्रादप्यनुमित्युदयात् तथा चोक्तनियमाभावात्
सिद्ध्यभावस्यैव सिद्धिस्थलेपि विशेषसामग्रीं विनैव सामान्यसामग्रीमात्रादनुमितिः स्यादेवेति भावः अन्यत्र सिद्ध्युत्तरानुमितावनुमित्साया इव तदनुत्तरानुमितावपि सिद्धिसामान्याभावस्य हे
तुत्वं वाच्यं तथा च परामर्शादिसामान्यसामग्रीसत्वेपि सिद्धिदशायां निरुक्तविशेषसामग्रीविरहादेव नानुमितिरत आह तदिति सिद्ध्यनुत्तरानुमितौ सिद्ध्यभावरूपसामग्र्यंतरकल्पनेनेत्यर्थः अ
नंतगौरवमिति विशेषसामग्रीद्वयकल्पनामपेक्ष्यानुमितिसामान्ये एकस्यैव विशिष्टसिद्ध्यभावस्य हेतुत्वे लाघवादिति भावः न च सिद्ध्युत्तरवर्तितत्तदनुमितिव्यक्तिष्वप्यवश्यं तत्तत्परामर्शादिव्यक्ते
र्विशिष्टहेतुत्वमुपेयं अन्यथा परामर्शादेः सामान्यकारणस्याविशिष्टत्वात्तत्रैकानुमित्युत्पत्तिदशायां भाव्यनुमित्यंतरापत्तेः तथा च तत्तत्परामर्शाद्यात्मकविशेषसामग्रीविरहादेव सिद्धिदशा
यामनुमित्यापत्त्यसंभव इति वाच्यं यत्र क्रमेण सिद्धिपरामर्शसिद्धिनाशानुमितयस्तत्रत्यान्या एवानुमितिव्यक्तेः सिद्धिनाशोत्पाददशायामापादनीयत्वात्तत्तद्व्यक्तिहेतोः परामर्शस्य प्रागपि स
त्वात् न च तथाविधानुमितिव्यक्तिषु तत्तत्सिद्धिनाशक्षणस्य तत्क्षणोत्पन्नज्ञानादेर्वा विशिष्य हेतुत्वकल्पनात्तदभावादेव न तादृशानुमितिरिति वाच्यं क्षणादीनां विशिष्य हेतुतामन्यथासिद्धत्वात्
अन्यथा सर्वत्रैव तत्तत्क्षणसंबंधानां विशिष्य हेतुतयैव सामंजस्ये विशेषितः कारणांतरस्य क्वापि कल्पनं न स्यात् अनंततत्क्षणव्यक्तीनां तत्रोत्पन्नज्ञानादीनां वा विशेषितो हेतुत्वकल्पनामपेक्ष्य वि
शिष्टसिद्ध्यभावस्यैकस्यैवानुमितिसामान्यहेतुत्वकल्पनाया एव लाघवेनौचित्यादिति भावः नव्यास्तु तत्तदनुमित्साविरहविशिष्टसिद्ध्यभावत्वेन हेतुतायां तत्तदनुमित्साविरहाणां वि
शेष्यविशेषणभावेन गुरुत्वादनंतत्वाच्च तदपेक्षया यादृशयादृशेच्छासत्वे सिद्धिसत्वेनुमितिस्तादृशतादृशेच्छात्वेन सिद्ध्यनुत्तरानुमितिं प्रति तु सिद्धिसामान्याभावत्वेन कारणत्वकल्पनैव ल
२६ घीयसीति प्राहुस्तच्चिंत्यं सिद्धिस्थल इत्यर्थः सा अनुमितिः तत्कारणस्येत्यस्यानुमित्सात्मकेत्यादिः सा सिद्ध्युत्तरत्वावच्छिन्नानुमितिः प्रागल्भमतं निरस्यति कारणस्येत्यादिना ननु पक्षताविशिष्ट
स्यपरामर्शत्वेन परामर्शविशिष्टपक्षतात्वेपि विनिगमकाभावेन हेतुत्वापत्त्या द्वयोरेव लाघवात्स्वातंत्र्येण हेतुत्वमत उक्तं कारणेति तथा चानुमितिकारणस्य व्याप्तिधियः सव्यापारत्वनि
यमाद्व्यापारविधयैव परामर्शस्य हेतुत्वमावश्यकं पक्षतायास्तु व्यापारत्वासंभवात्तदनुरोधेनापि न हेतुत्वमित्येव स्फुटं विनिगमकमिति भावः न च स्वमते मनस एवानुमितिकारणता तत्स्व
योग एव जन्यमात्रे व्यापार इत्यनुमितौ पक्षताविशिष्टपरामर्शस्यैव परामर्शविशिष्टनिरुक्तसिद्ध्यभावे न पक्षताया अपि हेतुतायां विनिगमकाभाव एवेति वाच्यं परामर्शविशिष्टपक्षताया हे

गा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आ॰प तुत्वस्यतत्रहिपरामर्शेनसिद्धिविशेषणंनथासतिपरामर्शविशिष्टयानिरुक्तसिद्ध्यभावत्वेनहेतुत्वेपरामर्शशून्यस्यापिपुंसोनुमित्यापत्तेः तस्यापिपरामर्शविशिष्टसिद्धेरभावत्वात् नचपराम
२० र्शविशिष्टयोर्निरुक्तसिद्ध्यभावत्वेनहेतुत्वंमिथोवैशिष्ट्यापन्नयोःसिद्धिपरामर्शयोरभावाशेविशेषणीभूयावच्छेदकत्वाभावाद्व्यासज्यवृत्त्य वच्छेदकत्वानंगीकारात् अन्यथानि
रुक्तसिद्ध्यभावत्वपरामर्शयोरेवव्यासज्यवृत्त्यवच्छेदकत्वेनसामंजस्येतयोर्विशेष्यविशेषणभावेविनिगमनाविरहाद्गौरवनस्योन्मत्तप्रलपितत्वापत्तेः पक्षताविशिष्टपरामर्शस्यतु
वैशिष्ट्यापन्नस्यैवावच्छेदकतयातादृप्येणहेतुतायांबाधकाभावादितिध्येयंप्रतिबंधकांतरंबाधनिश्च यादि नन्वकारणतावच्छेदकविशिष्टसत्वस्यैवकार्योत्पत्तिनियामकत्वात्
तत्रैवान्वयव्यतिरेकावुपेक्षणीयावत आह अन्यथेति अन्वयादिसत्वेप्यहेतुत्वइत्यर्थः ध्वंसाकारणत्वाप्रसिद्ध्यातन्निमित्तकारणस्यतदवच्छेदकत्वासंभवादाह यथासंभवमि
तिसमवायिकारणादित्यादिनाःसमवायिकारणत्वस्योपग्रहः तथाचघटादिकार्यस्यप्रतिनियतदेशत्वरक्षायैतत्तत्कपालद्वयसंयोगादेर्घटहेतुत्वमावश्यकमितितत्रैवदंडत्वादिकमव
च्छेदकंस्यादित्यर्थः कारणत्वेबाधकसत्वात्कारणतावच्छेदकेवपक्षतेत्यभिप्रायेणसाध्यसंदेहःसिषाधयिषैववापक्षतेत्याशयेनाशंकते अथेतिकार्यकालवृत्तेरेवेति अन्यथापूर्वकालेम
ण्यभावसत्वान्मण्युत्पत्तिकालेपिदाहापत्तिरितिभावःयद्यपिकार्यसहवर्त्तित्वस्यकारणतावच्छेदकत्वेतदवच्छिन्नस्यचेत्प्रतिबंधकाभावस्यपूर्वसत्वमपेक्षितंतदासत्यपिमण्यभावेदाहादिका
र्यनस्यात् पूर्वकालेदाहाद्युपहितस्यतस्याभावात् कार्यसहवर्त्तित्वोपलक्षितस्यपूर्वसत्वापेक्षणेमण्याद्युत्पत्तिदशायामपिदाहादिकार्यप्रसंगःकदाचिद्दाहादिदाहादिसहवर्त्तित्वस्यमण्याद्य
भावस्यमण्याद्युत्पूर्वसत्वात् कार्यसहवर्त्तित्वस्यनकारणतावच्छेदकत्वंमण्याद्यभावत्वेनैवहेतुत्वात् प्रतिबंधकाद्यभावविशेषितस्तन्नस्वव्यवहितोत्तरक्षणत्वादिसंबंधेनैवसामग्र्याःका
र्योत्पत्तिव्याप्यत्वान्नप्रतिबंधकोत्पत्तिकालेकार्योत्पत्तिप्रसंगःसमवायिकारणस्येत्थमेवकार्यसहभावेनहेतुत्वंविवेचनीयमितिदिक् तत्तद्देशीयतत्तद्दाहादिकंप्रतितत्तद्दाहाद्युत्पत्तिकालाव
च्छेदेनतत्तद्देशवर्तिमण्याद्यभावत्वेनहेतुत्वंकारणतावच्छेदकस्यपूर्वसत्वानपेक्षणाच्च तत्तद्दाहोत्पत्तेरसत्वेपिनक्षतिरित्यनयैवदिशासमवायादिकारणस्यापिहेतुत्वंनिरूपणीयमितिभावः त
दसंभवादितिनिरुक्तसिद्ध्यभावस्यासंभवादित्यर्थः साअनुमितिःतथात्वेनकार्यकालवृत्तित्वेनप्राचांमतेनेदंस्वमतेतुमण्युत्पत्तिदशायांमणिसामग्र्याःप्रतिबंधकत्वादेवनदाहःसंयोगेनमण्य
भावस्यमण्युत्पत्तिदशायामपिसत्वात्तस्यकार्यसहभावेनहेतुत्वोपगमेप्यप्रतीकारादितिध्येयंनसर्वस्येतितथात्वेनहेतुत्वमित्यन्वयः नन्वप्रतिबंधकाभावस्यतादृप्येणहेतुताव्याप्यत्वाद्गौरवं
प्रामाणिकमतआह अन्यथेतिसद्भूतस्येति अन्यथाघटादेर्नाशोत्पत्तिदशायामन्यदीयकर्मणानत्रसंयोगाद्युत्पत्तौक्षणिककार्यस्वीकारापत्तिरितिभावःतथात्वेप्रसक्तोकार्यसहभावेहेतु
त्वप्रसक्तोविजयनितिप्राभाकरैःकारणमात्रस्यैवकार्यसहभावेनहेतुत्वास्वीकारात् अन्यथाकालसत्तोपिप्रतियोगिनः पूर्ववर्त्तिमात्रेणैवहेतुत्वसंभवात्तेषामप्यतिरिक्तध्वंसकल्पनापत्ते राम
रितिभावःएकपरामर्शादनुमितिद्वयोत्पादेपिप्रवाहादाहक्वचिदितितथाचयत्रपूर्वपूर्वानुमितिदशायांपरामर्शांतरस्यसामग्रीसंभवस्तत्रैवपरामर्शानुमि त्योःप्रवाहासंभवइतिभावः अ २०

CC-0. In Public Domain. Digitization by eGangotri

नुभविकत्वादिनिपक्षतानुमितिहेतुरित्यग्रेऽन्वयः ननूक्तस्थले क्रमिकोनानुमितिप्रवाहः किंत्वेकानुमितिनाशोत्तरमपरानुमित्युत्पत्त्यैवेत्यसङ्गत्यत आह वार्थेति अर्थान्तरेति तथा च निश्चिते वस्तुनि जि
ज्ञासाविरहाद् नाकांक्षिताभिधानेन पुरुषदोषतयैव तज्ज्ञापनं न तु प्रमाणदोषतयेति भावः अत्रेदमालोचनीयं समानविषयकप्रत्यक्षसामग्रीदशायामनुमित्यनुत्पादाद्वह्न्यादिप्रत्यक्षजनक
तत्तदसाधारणकारणव्यक्तीनामेव वह्न्याद्यनुमितिविरोधित्वं वाच्यं कालादिसाधारणसामग्र्यास्तथात्वे गौरवात् तच्च वह्निचक्षुःसंयोगादिव्यक्तीनामिव वह्न्याद्यात्मकविशेषणाद्यवगाहि
वह्निमत्ताप्रत्यक्षहेतूनां पर्वतो वह्निमानित्यादिसिद्धिव्यक्तीनामपि तादृशानुमितिविरोधित्वमावश्यकं विनिगमकाभावात् एवं च तत्रैव पर्वतो वह्निमानित्याकारकनिश्चयत्वेनैवानुगतरूपेण तत्त
त्सिद्धिव्यक्तीनां तादृशानुमितिविरोधित्वं कल्प्यते लाघवात् ननु तत्तत्सिद्धिव्यक्तित्वेन गौरवाद्वश्यं पक्षतानुमितिहेतुः न चैवमतिलाघवेन साध्यनिश्चयत्वमपेक्ष्य साध्यवत्ताज्ञानत्वेन
विरोधित्वमस्तु पक्षे साध्यसंदेहोत्तरं तत्र साध्यवत्तानुमितौ नुभविकतया निश्चयत्वप्रवेशस्य प्रामाणिकत्वेनुसिद्धिसत्त्वे प्रत्यक्षसामग्रीदशायामनुमित्यनुत्पत्तेरनुभवसिद्धतया प्रत्यक्षसाम
ग्र्यन्तरे तत्सिद्धिव्यक्तित्वेनैव गुर्वपि प्रतिबंधकत्वं प्रामाणिकमिति वाच्यं साध्यवत्तापक्षज्ञानत्वेन संशयसाधारणधर्मत्वेन प्रतिबंधकत्वे भ्रमत्वनिश्चयत्वस्योत्तेजकत्वापत्तिगौरवात्तद पे
क्ष्य भ्रमत्वज्ञानानास्कंदितसाध्यवत्तानिश्चयत्वेन प्रतिबंधकतायामेव विपरीतलाघवात् किंच सिद्धिकालीनेषु साध्यव्याप्यवत्तापरामर्शसहकृतव्याप्यवत्ताद्यंशे भ्रमत्वादिज्ञानदशा
यां न साध्यानुमितिस्तत्र तादृशानुमितिप्रतिविशेषतस्तत्तद्भ्रमत्वज्ञानत्वेनानंतप्रतिबंधकत्वं गौरवात् पक्षधर्मिकसाध्यवत्तानिश्चयत्वेनैवानुगतरूपेण तत्तत्सिद्धिव्यक्तीनां विरोधित्वं कल्प्यते ला
घवात् भ्रमत्वज्ञानानामनुगतरूपेण विरोधित्वसंभवस्य वक्ष्यमाणत्वात् तत्रप्रतिपादितत्वात् एवं च सत्यामनुमित्सायां सिद्धिसत्त्वेप्यनुमित्युत्पादस्य परेषामप्यानुभाविकत्वादनुमित्सायास्तत्रोत्तेजकत्व
मपीत्यवश्यं पक्षतानुमितिहेतुः न च सिद्ध्यात्मकपरामर्शसहस्थमेव यत्रान्देहोरक्तइत्यादिविशेषणतावच्छेदकप्रकारकं रक्तत्वांशे भ्रमत्वज्ञानास्कंदितरत्तंतदोत्तरकालं रक्तत्वादिविशिष्टवैशि
ष्ट्यस्य प्रत्यक्षादेर्वारणार्थं तत्तद्भ्रमत्वज्ञानव्यक्तीनां तादृशविशिष्टवैशिष्ट्यावगाहिज्ञानप्रतिबंधकल्पनायां तत्रापि गौरवमस्माकं तु सिद्धिर्विरोधित्वात्तत्र वह्न्यनुमितेरेवोत्पादे नान्यत्र कुत्र तेन भिन्न
विषयकानुमितिसामग्र्याः प्रतिबंधकत्वेनैव तत्र रक्तत्वविशिष्टवैशिष्ट्यप्रत्यक्षमिति वाच्यं यत्साध्यकसिद्धिपरामर्शदशायां न वस्त्वन्तरेपि कदापि भ्रमत्वाद्यासंजननत्रैवोक्तक्रमेण पक्षता या हेतुत
व्यवस्थापनादित्याहुः यत्तु पक्षताया अनुमित्यहेतुत्वे सिद्ध्यात्मकपरामर्शदशायां भिन्नविषयकप्रत्यक्षबुभुत्सासत्त्वेऽनुमितिनिवारणाय तत्तद्बुभुत्सायामनुविरोधित्वकल्पने गौरवं स्यात् ततः पक्षताहेतुरिति
तत्तु तुच्छं पक्षतायाः कारणत्वे तत्तदनुमित्साविरहकूटविशिष्टसिद्धित्वेन प्रतिबंधकतायाः एवं तत्तदनुमित्साविरहव्यक्तीनां विशेष्यविशेषणभावव्यत्यासेनानंतविरोधित्वकल्पनायां विपरीतगौरवात् अत एव
पक्षताया अनुमित्यहेतुत्वे स्थितस्थलएव भिन्नविषयकप्रत्यक्षादेरुत्पत्तयेतत्तद्बुभुत्साविरहविशिष्टानुमितिसामग्रीत्वेनैव तादृशप्रत्यक्षादेः प्रतिबंधकत्वं कल्प्यमिति तत्र बुभुत्साव्यक्तीनामनुगतेन क
त्वकल्पने गौरवं स्यादित्यपि प्रत्युक्तं भिन्नविषयकप्रत्यक्षादिकं तत्तद्बुभुत्साविरहविशिष्टपरामर्शत्वेन विरोधित्वमपेक्ष्य निरुक्तपक्षताविशिष्टपरामर्शत्वपर्यवसितेनानुमितिसामग्रीत्वेन विरोधित्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं. ४९५२

॥ वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्रायामङ्कितोयंशिलाक्षरैः॥१॥ श्रीकाशीजीमेंज्ञानवापीकेपूर्वफाटक

॥ इतिजागदीशीपक्षतासमाप्ता॥

परश्रीविश्वनाथजीकेपासमहाराजशिवलालदुबेजीकेमकानमेंकाशीसंस्कृतमुद्रायंत्रमेंछपी जिनकोलेनाहोयउन्होनेइस

कार्यकेसंपादकबाबूवाराणसीप्रसादपाकचौरीगलीमेंभाईप्रतापसिंहजीकेदुकानमेंमिलेगी॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं. ४५५०

॥ इतिगदाधरकृतासामान्यनिरुक्तिःसमाप्तिमगमत् ॥ राम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·सा संभवतीत्याक्षिप्तं मणिकृतातादृशप्रतिबंधकतायां च युक्तिर्नोक्तेति न्यूनतापरिहाराय तत्र युक्तिमाह स्थाणुत्वाभावस्येति। स्थाणुत्वप्रत्यक्षशाब्दयोरिति। समानधर्मितावच्छेदकस्य
१९ स्थाणुत्वप्रकारकस्य लौकिकसन्निकर्षायन्यप्रत्यक्षस्य शाब्दस्य चेत्यर्थः। एवं शाब्दबुद्धौ बाधतदभावव्याप्यवत्ताज्ञानयोः प्रतिबंधकत्वेन नृशिरः कपालमिति। नरशिरः कपाले शुचि
त्वानुमापके तेदृ भिकप्राण्यंगत्वपरामर्शेनस्वतः फलहुरावागमिका शौचबोधविरोधः स्यादित्यर्थः सचानुभवविरुद्धः तत्रप्राण्यंगत्वज्ञानदशायामपि शाब्दाशौचज्ञानस्या
नुभवसिद्धत्वादिति भावः। समाधत्तेतत्रेति। तादृशौचज्ञानप्राक्कालदृत्यर्थः। अनुकूलतर्काभावेन व्याप्तिनिश्चयस्य बलवत्तरागमविरोधेनानुमितेश्च नसदिति योजना।
एवं च वास्तवव्याप्यधर्मस्य येन केनापि रूपेण ज्ञानमेव न विरोधि अपि तु व्याप्यत्वेन रूपेण अत्र च प्रा ण्यंगत्वस्य ज्ञानेपि व्याप्तिग्राहकतर्कविरहेण व्यभिचारशंकया शौच
व्याप्यत्वेन तज्ज्ञानं संभवति कारणांतरविरहेण यत्र व्यभिचारशंकाविरहः तत्र कथंचित् व्याप्तिग्रहेपि गृहीतप्रामाण्यकागमतात्पर्यविषयविपरीतविषयकत्वेन तत्राप्रामा
ण्यं गृह्यते तथा च तादृशप्राण्यंगत्वज्ञानेन शौचानुमितिजनने शाब्दाशौचज्ञानप्रतिबंधे वा प्रभवतीति समुदायार्थः आगमे प्रामाण्यग्रहश्च विशिष्टपरिग्रहादिनैव भवति यावः
न्नतादृशपरामर्शेनाप्रामाण्यं गृह्यते तावन्न भवत्येवागमप्रवृत्तिरिति भावः यद्वेत्यादिग्रंथेन बाधादिज्ञानस्यानुमित्य तिरिक्तज्ञानाप्रतिबंधकत्वव्यवस्थाप्यबाधादेः
लिंगासाधारणदोषत्वमेवोपपादितं। तन्न संगच्छते बाधितार्थस्य शाब्दाभ्युपगमेऽनुमितेरप्यनपवादात् तत्राप्यप्रामाण्यग्राहकतया बाधादिग्रहस्य प्रवृत्त्यादिविरोधित्वोप
पत्तेरित्यत्र कल्पे ग्रन्थकृतो निर्भरमाह यद्वेत्यादीति। ननु आनुमानिकबाधादिदशायामपि लौकिकसन्निकर्षादितः प्रत्यक्षोत्पत्तिबाधनिश्चयसामान्यस्य प्रत्यक्षप्रतिबंध
कत्वं न संभवतीति अनुमित्यसाधारणप्रतिबंधकत्वं बाधनिश्चयत्वावच्छिन्नस्यास्तु अतो यद्विषयकनिश्चयत्वेन अनुमित्यसाधारणप्रतिबंधकत्वं तच्च उपस्थिताप्रयो
जकत्वाभिप्रायेण यद्वेत्यादिग्रन्थस्य बाधस्य तोपपादकत्वं सुसंगच्छत इत्यत आह प्रत्यक्षं प्रतीति समानेन्द्रियजन्यबाधनिश्चयसत्वे लौकिकप्रत्यक्षस्यापि अनुत्पत्तेरानुमानि
केति निश्चयविशेषणं शाब्दं प्रतीति तथा च तावतैव लिंगासाधारणदोषत्वव्याघात इति भावः। तत्रापि तत्प्रतिबंधकत्वमाशंकते। योग्यतेति अन्यथासिद्धत्वादिति बाधादिनिश्च
यदशायां योग्यताज्ञानरूपकारणविरहेणैव शाब्दज्ञानानुत्पादादिति भावः तदभावः बाधादिनिश्चयाभावः तत्र शाब्दबुद्धौ यद्यपि योग्यबाधसंशयद्वितीयक्षणे स्मरणादात्मका
योग्यतानिश्चये सति द्वितीयक्षणे शाब्दज्ञानवारणाय तदभावस्य शाब्दबोधहेतुत्वस्य आवश्यकत्वं तथापि बाधादिज्ञानस्य शाब्दाप्रतिबंधकत्वेपि निर्विवादोपनीतभान
विशेषप्रतिबंधकतयैव बाधादेर्लिंगासाधारणदोषत्वनिराकरणसंभवात् तत्रैव तन्निराकरोति एवमपीति उपनीतभानविशेषे दोषविशेषजन्योपनीतभानत्वेन बाधनिश्चया राम
द्यभावत्वेन दुर्वारत्वादिति बाधादिति निश्चयदशायामनुमितेरिव तादृशोपनीतभानानुत्पादस्य सर्वानुभवसिद्धत्वादिति भावः॥ ॥ इति श्रीगदाधरकृता सामान्यनिरुक्तिः॥ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग·सा· समाप्ता॥ कान्यकुब्जवंशावतंसन्यायशास्त्राध्यापककुंजलालवाजपेयिनांसाहाय्यमवलंब्यपंचलक्षण्यादिग्रंथाः——काशीनाथशास्त्रिणाशोधिताः॥ वाराणसीप्रसा
२० दस्यनियोगेनतुसत्वतः॥ काशीसंस्कृतमुद्रायामंकितायशिलाक्षरैः॥१॥ श्रीकाशीजीमेंज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासमहाराजशिवलालदुबेजीइन
केमकानमेंकाशीसंस्कृतमुद्रायंत्रमेंछपीजिनकोलेनाहोयउन्होनेइसकार्यकेसंपादकबाबूवाराणसीप्रसादयाकचौरीगलीमेंभाईप्रतापसिंहजीकेदुकानपरमिलेंगी॥ ॥॥
मितिचैत्रकृष्ण २गुरुवासरेसंवत्१९२०॥

राम
२०

CC-0. In Public Domain. Digitization by eGangotri

नं. ४९५०

॥ इतिगदाधरकृतासामान्यनिरुक्तिःसमाप्तिमगमत्॥ राम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·सा· श्रपरामर्शानुमेयविरोधिकोटेः पक्षे भावनिश्चयदशायां। नानुमितिप्रतिबंधः। न प्रकृतसाध्यानुमित्यनुत्पादः। अप्रामाण्यग्रहाभावस्येत्यनंतरं वैशिष्ट्य मित्यनुषज्यते॥ तद
१८ भावस्यविरोधिकोटिविरहनिश्चयाभावस्यतत्र विरोधि परामर्शास्यप्रतिबंधकतावच्छेदकगर्भेनिवेश्यतामिति। अत्र विपरीतकोटिव्याप्यवत्तापरामर्शदशायां तत्कोटि
विरहनिश्चयसत्वे तत्परामर्शेभ्रमत्वग्रहानंतरमेवानुमितिः स्वीक्रियते न तु अन्यथेति भ्रमत्वग्रहाभाववैशिष्ट्य वैशिष्ट्य निवेशेनैवोपपत्तौ तादृशबाधग्रहाभाववैशिष्ट्य
निवेशो व्यर्थ इत्यत्रिमैरसूचनायपदि चेत्युक्तं। अप्रामाण्यग्रहाभाववैशिष्ट्यस्यदृष्टांतविधया प्रतिबंधकतावच्छेदकत्वं चदर्शितं नन्वस्त्वनुमितिविरोधिपरामर्शमात्रप्र
तिबंधकं तथापि तद्घटितविरोधिसामग्रीकालीनज्ञानस्य फलानुत्पादनियतत्वात् तादृशसामग्रीकालीनत्वस्य निरुक्तप्रतिबधकतावच्छेदकत्वंदुरपवादमेव। एवं च तथा
विधविरोधिपरामर्शकालीनत्वमादायापि दशाविशेषे सत्प्रतिपक्षितस्य हेतोर्दुष्टत्वमुपपद्यत एवेत्यतो विरोधिपरामर्शादिकालीनत्वसमशीलबाधादिभ्रमकालीनत्वमादायसद्धे
तावतिप्रसंगमाह। यथा चेति तथाविधेति भ्रमप्रमासाधारणेत्यर्थः। अपीत्यनंतरानुमितिरित्यनुषज्यते तथा च तादृशबाधादिग्रहकालीनत्वमपि निरुक्तप्रतिबंधकतावच्छेद
कत्ववद्भवत्येवेति भावः। इति इत्यतः अतिप्रसंग इति। बाधादेरनित्यदोषतायाः केनाप्यनभ्युपगमेनेष्टापत्त्यनवकाशादिति भावः। विरोधिपरामर्शकालीनत्वमादाय सर्वत्र
सत्प्रतिपक्षितदुष्टत्वं नोपपादयितुं शक्यत इत्याह। न चेति नहीत्यर्थः। अतीतादेरिति। तथा चातीतादिसद्धेतौ विरोधिपरामर्शदशायामभवन्मतसिद्धसत्प्रतिपक्षितत्वं नोपपद्य
त इति भावः। सत्प्रतिपक्षिते सद्धेतौ विरोधिव्याप्यवत्पक्षाप्रसिद्धावपि प्रतिबंधकीभूतभ्रमविषयप्रसिद्धविरोधिव्याप्त्यादिरेव दोष इति मतं दूषयति। यद्यपीति। यद्विषयकत्वेने
तितृतीयार्थः स्वरूपसंबंधरूपावच्छेदकत्वं न तु अनतिरिक्तवृत्तित्वरूपं तथा सति विरोधिव्याप्त्यादेर्दोषत्वानुपपत्तेः। प्रतिबंधकतायां ज्ञाननिष्ठत्वविशेषणं कामिनीजिज्ञासादिनि
ष्ठप्रतिबंधकतावच्छेदकधर्मे अतिप्रसंगवारणाय। ननु विरोधिकोटिव्याप्यत्वस्य पर्वतो वन्हिमान्धूमात् पर्वतोनवन्हिमान् जलत्वादित्यादौ प्रतिबंधकीभूतज्ञानविषयसम
वायादिसंबंधावच्छिन्नपक्षधर्मतायाश्च प्रकृतहेतावभावात्कथं तस्य दुष्टत्वमत आह तद्धत्वमपीति। विरोधिव्याप्त्यादिमत्वमपीत्यर्थः तज्ज्ञानरूपेणेति। विषयकज्ञान
विषयत्वात्मकेनेत्यर्थः संबंधविशेषस्याविवक्षितत्वादिति भावः। तादृशसंबंधवतां प्रभूतहेतौ उपपादयति तु स्येति। विरोधिव्याप्त्यादिज्ञानस्येत्यर्थः। समूहालंबनत्वे ति।
न चैवं क्रमिकपरामर्शद्वयस्थले सत्प्रतिपक्षितत्वानुपपत्तिरिति वाच्यं। तत्रापि तादृशव्याप्त्यादिप्रकारकप्रत्यक्षहेतुविषयकेश्वरज्ञानादिकमादायतद्धत्वोपपत्तेः साध्याभाव
वत्पक्षविषयकत्वेन साध्याभावप्रकारेण पक्षावगाहित्वेन साध्याभाववत्पक्षज्ञानेति। साध्याभावप्रकारकपक्षज्ञानांशे प्रमात्वविषयकत्वेनेत्यर्थः। मतभेदेन विकल्पः। तस्यता राम
दृशज्ञानस्यासाध्यवत्यपि पक्षे साध्यवत्यपि सति। अतिव्याप्तेरिति पर्वतो वन्हिमान्धूमादित्यादौ भ्रमात्मकबाधादिज्ञाननिष्ठप्रतिबंधकतावच्छेदकविषयितानिरूपकवन्ह्यभा १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कालीनत्वादिकमिति। ६

जा॰सा॰ ज्ञानस्येति षष्ठ्यन्तार्थस्य यत्पदार्थेऽन्वयः। तथाच ज्ञानसंबंधित्वविशिष्टं यद्रूपावच्छिन्नं यत्किंचित्संबंधेनानुमितिप्रतिबंधकतावच्छेदकमित्यर्थः। अत्राप्यवच्छेदकत्वमनतिरिक्तवृत्ति
१७ त्वं उक्तयुक्तेः स्वतत्वदसुभयत्र तद्रूपावच्छिन्नपरं लक्षणार्थः व्युत्क्रमेण लक्षणयोरर्थः। नन्वेतावतैव कथं दर्शितसत्प्रतिपक्षादौ लक्षणसमन्वयः। तत्र प्रतिबंधकतावच्छेदकीभूत
विशिष्टविषयकत्वस्याप्रसिद्धेः कथं वा व्यभिचारादिकमादाय सव्यभिचारादावेव लक्षणगमनं व्यभिचारादिविषयकत्वस्यैव प्रतिबंधकतावच्छेदकतया व्यभिचारादेरतथा
17 त्वादित्यत आह। तच्चेति। तादृशप्रतिबंधकतावच्छेदकं चेत्यर्थः। भ्रमात्मकबाधनिश्चयमादाय आपादितायाः सद्धेतौ दुष्टतायाः असंभवं स्फुटीकर्तुमाह। बाधेचेति। बाधज्ञान
निष्ठप्रतिबंधकतायां चेत्यर्थः अवच्छेदक इति शेषः। पक्षस्य वास्तवसाध्याभाववत्त्वं निविशते न तु वैज्ञानिकमिति सूचयितुं। प्रमितेति। विषयस्यावच्छेदकत्वे युक्तिमाह। तद्विष
यकत्वेनेति। तथाच विषयविषयकत्वस्यैव विषयस्यापि विषयितयावच्छेदकत्वमक्षतमिति भावः। विरोधिसामग्री [illegible]। विरोधिको त्यनुमितिसामग्रीकालीनत्वं न पराम
र्शादेः प्रतिबंधकत्वमित्यभिमानः। तथाच तदादायैव सत्प्रतिपक्षिते साधारणे च सद्धेतौ दृशा विशेषे दुष्टत्वमिति भावः। ननु ज्ञाननिष्ठविरोधिसामग्रीकालीनत्वमादाय
सद्धेतौ दुष्टत्वं तस्य ज्ञाने एव सत्त्वादित्याशंकां परिहरति तद्वत्त्वं चेति। तद्विषयकहेतोरपीति तत्कालनिरूपिताधेयतात्मकस्य तत्कालीनत्वस्याधेयभेदेन भेदानभ्युपगम
दभ्युपगमे चाधेयतासंबंधेन तत्कालस्यावच्छेदकतया तमादायैव लक्षणसमन्वयादिति भावः॥ नाभेदेनेति। विवक्षितुं शक्यमिति शेषः साध्याभाववद्वृत्तित्वादिविशिष्टसा
धनरूपदोषस्याभेदसंबंधेन हेतौ सत्त्वान्न तेन संबंधेन तद्वत्त्वविवक्षायां अप्रसक्तिः बाधे तदभावादिति। वन्ह्यभाववद्ह्रदादिरूपबाधे धूमादिहेत्वभेदासत्त्वादित्यर्थः। तथा
च तत्राव्याप्तिरिति भावः। अत एव बाधितेऽव्याप्तेरेव। नाश्रयतया तद्वत्त्वविवक्षार्हमिति शेषः धूमादेर्वन्ह्यभाववद्ह्रदादिनाश्रयत्वादेकज्ञानविषयत्वादिरूपसंबंधस्य ...रूपदोषा
चाधारत्वानिर्वाहकत्वा दिति भावः। अव्याप्तिमुक्त्वातिव्याप्तिमप्याह वन्हिव्यभिचारीति॥ ननु साध्याभाववद्वृत्तित्वादिरूपविषय एव प्रतिबंधकतावच्छेद
को न तु तत्तद्विशिष्टद्रव्यत्वादि तदाश्रयश्च न धूमादिरित्याशंकां निराकरोति। साध्याभाववदिति। साध्याभाववद्वृत्तिहेतौ ज्ञानस्येति। तादृशहेतुविषयकज्ञानस्येत्यर्थः।
तथाच वन्ह्यभाववद्वृत्तित्वादिविशिष्टद्रव्यत्वादिकमपि विषयितयावच्छेदकमेवेति भावः। ननु धूमादेस्तादृशधर्मवत्त्वेऽपि वन्हौ साध्ये धूमो दुष्ट इत्यादिव्यवहारस्यना
पत्तिसंभवः उक्तयुक्त्या तद्धेतुकानुमितिविरोधिरूपवत्त्वस्यैव तत्र दुष्टताव्यवहारनियामकत्वात् अन्यथा तवाप्यप्रतीकारादित्यतो न्यत्रातिप्रसंगमाह। साधारण्यादि
विषयकत्वस्य चेति। ज्ञाननिष्ठस्य ज्ञानवृत्तित्वविशिष्टस्य। सत्त्वादीति सत्तावान् ज्ञानादित्यादौ ज्ञानहेतुकसत्ताद्यनुमितिप्रतिबंधकतावच्छेदकं ज्ञानांशे सत्त्वाभाववद्वृत्तित्वा राम
वगाहित्वमादाय सत्त्वे साध्ये ज्ञानं दुष्टमित्यादिव्यवहारापत्तेरित्यर्थः। येन केनापि संबंधेन तद्वत्त्वं विवक्षणीयमित्यपि दूषयति। यथा कथंचिदिति। अतिप्रसंजकत्वादिति १७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्तधर्ममादाय सत्त्वादिसाध्यके ज्ञाने धूमाद्यंशे यद्वह्न्यभाववद्वृत्तित्वाद्यवगाहित्वं एकज्ञानविषयत्वादिसम्बन्धेन तद्वत्त्वमादाय वह्न्यादिसाध्यके धूमादावपि दुष्टत्व-
व्यवहारापत्तेरित्यर्थः। सत्प्रतिपक्षादिस्थले विरोधिसामग्रीकालीनत्वेन प्रतिबन्धकतामादाय लक्षणसत्त्वमुपपादितं तत् दूषयति। विरोधिसामग्रीति। न स्वसाध्यानुमितिप्र-
तिबन्धक इति। न स्वजन्यानुमितिप्रतिबन्धक इत्यर्थः। कारणत्वप्रतिबन्धकत्वयोरेकत्रानभ्युपगमादिति हृदयं। विभिन्नरूपेण तदुभयस्यैकत्रोपगमे प्रतिबन्दीसूचनाय
ह मणीति न प्रतिबन्धक इत्यनुषज्यते तथा च विरोधिकोऽप्यनुमितिसामग्रीकालीनत्वेन परामर्शादीनामनुमितिप्रतिबन्धकत्वे मणिसमवहितत्वेन वह्न्यादीनामपि दा-
हप्रतिबन्धत्वापत्तिः। मणिसमवहितत्वापेक्षया लाघवान्मणित्वेनैव प्रतिबन्धकता कल्प्यत इति चेत् तर्हि विरोधिसामग्रीकालीनत्वापेक्षया लाघवात् तादृशसामग्रीत्वे-
न विरोधिपरामर्शत्वेनैव वा प्रतिबन्धकत्वं प्रकृते कल्पयितुमुचितमिति कथं विरोधिसामग्रीकालीनत्वमादाय लक्षणं संगमनीयं तस्य प्रतिबन्धकतानतिरिक्तवृत्तित्वमिति भा-
वः। कार्यानुत्पत्तिव्याप्यतावच्छेदकत्वरूपप्रतिबन्धकतावच्छेदकत्वमेव विवक्षितम्। ननु कारणीभूताभावप्रतियोगितावच्छेदकत्वरूपं तच्च विरोधिसामग्रीकालीन-
त्वेऽप्यक्षतमेवेत्याह। अथेत्यादिना। यद्धर्मेति यादृशधर्मविशिष्टनिश्चयाव्यवहितोत्तरक्षणत्वव्यापकोऽनुमित्यनुत्पादस्तादृशरूपमेवेत्यर्थः। निश्चयत्वनिवेशाद्बाधादिवि-
षयकसंशयसंस्काराद्यव्यवहितोत्तरक्षणे कदाचिदनुमित्युत्पादेऽपि न क्षतिः। अत्र एतल्लक्षणे प्रतिबन्धकतावच्छेदकमुक्तप्रतिबन्धकतावच्छेदकपदेन विवक्षितं। भवति
चेति विरोधिकोऽनुमितिसामग्र्याः प्रतिबन्धकत्वकथनं प्रतिबन्धकसमवहिताव्यवहितोत्तरक्षणे कार्यानुत्पादस्यावश्यकतया विरोधिसामग्रीकालीनत्वस्य निरुक्तप्रतिब-
न्धकतावच्छेदकताया आवश्यकत्वप्रदर्शनाय। तथा आवश्यमनुमित्यनुत्पादः। विरोधिसामग्र्याः प्रतिबन्धकत्वं यदुक्तं तदेवादौ दूषयति नैवेति नहीत्यर्थः॥ कालादीति।
घटितेत्यन्तं हेतुगर्भविशेषणं तथा च कारणसमुदायः सामग्री सा च क्वचिदपि न प्रतिबन्धिका कालादिसाधारणकारणानामपि तदन्तर्निविष्टत्वात्। तेषां च प्रतिबन्धकतावच्छेदक-
कोटिनिवेशस्य निष्फलत्वात् प्रतिबध्यकार्येऽपि तेषामनुगुणत्वादित्यर्थः। सत्प्रतिपक्षस्थले विरोधिकोट्यनुमितिसामग्र्यास्तत्कोट्यनुमितिप्रतिबन्धकत्वमत्यन्तासंभवदुक्ति-
कमेव तत्र फलानुत्पादे न सामग्र्या एवासत्त्वादित्याह। विशेषतस्त्वित्यादिना। अत्र सत्प्रतिपक्षस्थले सामग्री न प्रतिबन्धिकेत्यनुषज्यते। तत्सत्त्वे सामग्रीसत्त्वे कार्योत्पादस्य दुर्वा-
रत्वात्। सामग्र्याः कार्योत्पत्तिनियतत्वादिति भावः। ननु तर्हि तत्र परामर्शादिरूपानुमितिहेतुसत्त्वादनुमितिः कथं नेत्यत आह। किंत्विति। विरोधिपरामर्शः साध्याभावव्या-
प्यवत्तानिश्चयः। तथा अनुमितिप्रतिबन्धकः। ननु यत्र वह्न्यभावव्याप्यवत्तापरामर्शो वह्न्यभावाभाववान्नास्ति इति बाधनिश्चयश्च वर्तते तत्र वह्निव्याप्यवत्ताज्ञानेन वह्न्य-
नुमितिर्जन्यते इत्यनुभवसिद्धं विरोधिपरामर्शमात्रस्य प्रतिबन्धकत्वे च तन्नोपपद्यत इत्यत आह। यदि चेति॥ तत्सत्त्वेऽपि विरोधिपरामर्शसत्त्वेऽपि तत्साध्यवाधावतारे तादृ-

18

शपरामर्शानुमेयविरोधिकोटेः पक्षे भावनिश्चयदशायां। नानुमितिप्रतिबंधः। न प्रकृतसाध्यानुमित्यनुत्पादः। अप्रामाण्यग्रहाभावस्येत्यनंतरं वैशिष्ट्य मित्यनुषज्यते॥ तद्
भावस्य विरोधिकोटिविरहनिश्चयाभावस्य तत्र विरोधि परामर्शस्य प्रतिबंधकतावच्छेदकगर्भे निवेश्यतामिति। अत्र विपरीतकोटिव्याप्यवत्तापरामर्शदशायां तत्कोटि
विरहनिश्चयप्रसक्ते[illegible]त्परामर्शे भ्रमत्वग्रहानंतरमेवानुमितिः स्वीक्रियते न तु अन्यथेति भ्रमत्वग्रहाभाववैशिष्ट्य[illegible] निवेशनैवोपपत्तौ तादृशबाधग्रहाभाववैशिष्ट्य
निवेशो व्यर्थ इत्यरुचिर्भेरसूचनाय पदिचेत्युक्तं। अप्रामाण्यग्रहाभाववैशिष्ट्यस्य दृष्टांतविधया प्रतिबंधकतावच्छेदकत्वं च दर्शितं नन्वस्त्वनुमितिविरोधिपरामर्शमात्रे प्र
तिबंधकतयापि घटितविरोधिसामग्रीकालीनज्ञानस्य फलानुत्पाद नियतत्वात् तादृशसामग्रीकालीनत्वस्य निरुक्तप्रतिबधकतावच्छेदकत्वं दुरपवादमेव। एवं च तथा
विधविरोधिपरामर्शकालीनत्वमादायापि दृशाविशेषे सत्प्रतिपक्षितस्य हेतोर्दुष्टत्वमुपपद्यत एवेत्यतो विरोधिपरामर्शादिकालीनत्वसमशीलबाधादिभ्रमकालीनत्वमादाय सद्धे
तावतिप्रसंगमाह। यथा चेति तथाविधेति भ्रमप्रमासाधारणेत्यर्थः। अपीत्यनंतानुमितिरित्यनुषज्यते तथा च तादृशबाधादिग्रहकालीनत्वमपि निरुक्तप्रतिबंधकतावच्छेद
कत्ववद्भवत्येवेति भावः। इति इत्यतः अतिप्रसंग इति। बाधादेरनित्यदोषतायाः केनाप्यनभ्युपगमेनेष्टापत्त्यनवकाशादिति भावः। विरोधिपरामर्शकालीनत्वमादाय सर्वत्र
सत्प्रतिपक्षिते दुष्टत्वं नोपपादयितुं शक्यत इत्याह। न चेति नहीत्यर्थः। अतीतादेरिति। तथा चातीतादिसद्धेतौ विरोधिपरामर्शदशायाभवन्मते सिद्धसत्प्रतिपक्षितत्वं नोपपद्य
त इति भावः। सत्प्रतिपक्षिते सद्धेतौ विरोधिव्याप्यवत्पक्षाप्रसिद्धावपि प्रतिबंधकीभूतभ्रमविषयप्रसिद्धविरोधिव्याप्त्यादिरेव दोष इति मतं दूषयति। यद्यपीति। यद्विषयकत्वेने
तितृतीयार्थः स्वरूपसंबंधरूपावच्छेदकत्वं न तु अनतिरिक्तत्वरूपतथा सति विरोधिव्याप्यादेर्दोषत्वानुपपत्तेः। प्रतिबंधकतायां ज्ञाननिष्ठत्वविशेषणं कामिनीजिज्ञासादिनि
ष्ठप्रतिबंधकतावच्छेदकधर्मेऽतिप्रसंगवारणाय। ननु विरोधिकोटिव्याप्यत्वस्य पर्वतो वह्निमान्धूमात् पर्वतो न वह्निमान् जलत्वादित्यादौ प्रतिबंधकीभूतज्ञानविषयसम
वायादिसंबंधावच्छिन्नपक्षधर्मतायाश्च प्रकृतहेतावभावात्कथं तस्य दुष्टत्वमत आह तद्धेत्वमपीति। विरोधिव्याप्त्यादिमत्त्वमपीत्यर्थः तज्ज्ञानरूपेणेति। विषयकज्ञान
विषयत्वात्मकेनेत्यर्थः संबंधविशेषस्याविवक्षितत्वादिति भावः। तादृशसंबंधवत्तां प्रकृतहेतौ उपपादयतितुस्यति। विरोधिव्याप्त्यादिज्ञानस्येत्यर्थः। समूहालंबनत्वेति।
न चैवं क्रमिकपरामर्शद्वयस्थले सत्प्रतिपक्षितत्वानुपपत्तिरिति वाच्यं। तत्रापि तादृशव्याप्त्यादिप्रकारकप्र[illegible]हेतुविषयकेश्वरज्ञानादिकमादाय तद्धेतुत्वोपपत्तेः साध्याभाव
वत्पक्षविषयकत्वेन साध्याभावप्रकारेण पक्षावगाहित्वेन साध्याभाववत्पक्षज्ञानेति। साध्याभावप्रकारकपक्षज्ञानांशप्रमात्वविषयकत्वेनेत्यर्थः। मतभेदेन विकल्पः। तस्यता
दृशज्ञानस्यासाध्यवत्यपि पक्षे साध्यवत्यपि सति। अतिव्याप्तेरिति पर्वतो वह्निमान्धूमादित्यादौ भ्रमात्मकबाधादिज्ञाननिष्ठप्रतिबंधकतावच्छेदकविषयितानिरूपकवन्ह्यभा

जा॰सा॰ ल्पनापेक्षयातद्विशिष्टस्यैकस्यैव भेदस्य लाघवेन कल्पयितुं युक्तत्वादित्यभिप्रायः। एतच्च यथाश्रुताभिप्रायेणांतद्धर्मावच्छिन्ननिरूपितविषयितान्यतमविषयितानिरूपकतावच्छे
१६ दकधर्मवत्त्वस्य लक्षणत्वे त्वधिकविकाशतया विशेषणसार्थक्यमित्यवधेयं॥ अनुसाध्यादिभेदेन लक्षणभेदे ह्रदो वन्हिमानित्यादिस्थलीयलक्षणस्य पंचहेत्वाभासासाधारण्यासंभ
वात्ताद्दशलक्षणाक्रांतानां पंचविधत्वोक्त्यसंगतिरित्यत आह। पंचविधत्वेति [illegible] इति। पंचविधत्वोक्तिरित्यर्थः। [illegible] यत्र पंचानामेव हेत्वाभासानां संभवो गौरवं
घटत्वादित्यादौ तत्स्थलीयलक्षणाक्रांतस्य पंचविधत्वाभिप्रायेणेत्यर्थः। नन्वेवं लक्षणाननुगमादितरभेदानुमाने भागासिद्धिरित्यत आह। व्यभिचारादेरित्यादि साध्यादिभेदनियं
त्रितत्वात्। साध्यादिभेदनियंत्रितलक्ष्यतावच्छेदकत्वात्। तथा च लक्षणस्यैव लक्ष्यतावच्छेदकस्याप्यननुगमान्न भागासिद्धिरिति भावः। नन्वेवमनुगतोक्त्यसंभवात्। नायं प्रका
रः साधीयानित्यत आह। शब्दाभेदस्येति। इदं तु [illegible] तावदन्यान्यतमत्वमितरभेदानुमापकमेव न तु दोषपदप्रवृत्तिनिमित्तं तथा सति निर्वन्हित्वविशिष्टे वन्हेः साधने धू
मो दुष्ट इत्यादौ दुष्टपदस्य वन्ह्यभावविशिष्टनिर्वन्हित्वावच्छिन्नान्यतमवदर्थकतया निर्वन्हित्वविशिष्टे वन्हिसाधने इत्यादेरनन्वितार्थकत्वप्रसंगात्। अनुमितीत्यादि [illegible] सिद्धा
न्तस्य हेत्वन्वयि निर्वन्हित्वविशिष्टविशेष्यकवन्ह्यनुमित्यभावप्रयोजकत्वार्थकत्वासंभवात्किंत्वभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वमेव तथा उक्तस्थले
प्रकारताप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारता चोभयमेव साधनपदार्थः प्रकारतारूपतदर्थैकदेशव्याप्तिप्रकारतानिरूपकप्रकारतायां
च षष्ठ्यर्थं तद्वन्हिपदप्रतिपाद्यस्य वन्हिनिष्ठत्वस्य स्वरूपसंबंधेन साधनपदार्थप्रकारताद्वये सप्तम्यंतार्थस्य निर्वन्हित्वादिविशिष्टविशेष्यतायाश्च निरूपितत्वसंबंधेनान्वयः सा
धनपदोत्तरसप्तम्या निरूपकत्वं द्वित्वं चार्थः निरूपकत्वे निरुक्तसाधनपदार्थयोः पृथगन्वयः तदन्वितनिरूपकत्वे च द्वित्वान्वयः द्वित्वान्वयिताद्दशनिरूपकत्वयोर्दोषपदार्थघटका
भावेन्वयः तथा च निर्वन्हित्वविशिष्टविशेष्यतानिरूपितवन्हिनिष्ठप्रकारतानिरूपकत्वस्य ताद्दशविशेष्यतानिरूपिताया वन्हिप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपित
धूमत्वावच्छिन्नप्रकारतातन्निरूपकत्वस्य द्वयोरभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वानि त्येवान्वयबोधः प्रतिबंधकीभूतभ्रमविषयितानिरूपकाभावमादाय प
र्वते वन्हिसाधने धूमो दुष्ट इत्यादिप्रयोगवारणाय विषयितायां भ्रमान्यवृत्तित्वं निवेशितं दोषघटके केवलसाध्यादौ दोषव्यवहाराभावात्। अत्रायं दोष इत्यादौ स्वविषयकनि
श्चयाव्यवहितोत्तरानुमितिनिष्ठताद्दशोभयाभावाधिकरणतात्वव्यापकविरोधिविषयिताप्रयोज्यताकधर्म एव दोषपदार्थ इत्यादिकं। असाधारण्यस्य पक्षवृत्तित्वे सति साध्य
व्यापकीभूताभावप्रतियोगित्वात्मकस्य सत्प्रतिपक्षस्य च पक्षनिष्ठसाध्याभावव्याप्यवत्त्वरूपस्य बुद्धेर्विरोधिविषयकतया साध्यवत्ताज्ञानप्रतिबंधकत्वं निर्विवादमेव एवं च त राम॰
ज्ज्ञानदशायां हेतोरनुमितिजनकतया तद्धेतोः प्रतिबंधकत्वमावश्यकमित्येताद्दशयथाश्रुतार्थपरस्य दशाविशेष इत्यादिमूलस्यानुपपत्तिरन्यथासाधारण्यादिज्ञानप्रतिबंधक १६

CC-0. In Public Domain. Digitization by eGangotri

ताया अपि व्यवस्थापयितुमुचितत्वात् अतस्तादृशमूलमन्यथा व्याख्यातुमवतरणिकामाह । स्याद्वेतादिति इत्यत्रासाधारणेत्यस्थलीयासाधारण्यरूपदोषप्रकारकहेतु
विशेष्यकभ्रमविषये सर्वसाध्यवद्व्यावृत्तत्वात्मके अव्याप्तिरिति तद्विषयकत्वस्य निरुक्तानुमित्यप्रतिबंधकहेत्वविषयकज्ञानसाधारणतया तादृशप्रतिबंधकतातिरिक्तवृ
त्तित्वादिति भावः ननु केवलं सर्वसाध्यवद्व्यावृत्तत्वं न दोषः अपि तु साधनवृत्तित्वविशिष्टं तादृशविशिष्ट विषयकत्वं तु न प्रतिबंधकतातिरिक्तवृत्तीत्यत आह तथापीति तत्रेहे
तावसत्त्वात् अवृत्तेः साध्यवतिपक्षे हेतौ वृत्तेरिति शेषः तथा च तादृशविशिष्टस्याप्रसिद्ध्या तस्य दोषत्वासंभवेन प्रसिद्धस्य अविशिष्टसाध्य व द्व्यावृत्तत्वस्यैव तत्र दोषतायाः
आवश्यकत्वादिति भावः असमवेतद्रव्यत्वादाविति असमवेतद्रव्यत्वादावित्यर्थः असमवेतत्वस्य ध्वंससाधारणतया नित्यताव्याप्यत्वासंभवाद्विशेष्यांशनिवेशः अप्यनं
तरं अव्याप्तिरित्यनुषज्यते तद्विषयकत्वस्य पक्षाविषयकज्ञानसाधारणतया प्रतिबंधकतातिरिक्तवृत्त्येव आह पक्षस्येति तथा च पक्षघटितविशिष्टाप्रसिध्या पक्षाघटि
तस्यैव दोषत्वमावश्यकमिति भावः तयोस्तादृशस्थलीयदोषत्वेनाभिमतयोरुक्तधर्मयोः शब्दो नित्यः शब्दत्वादित्यादौ शब्दत्वादिविशेष्यकनित्यत्ववद्व्या वृत्तत्वादिज्ञानवि
षयेः व्याप्तेः शंकानास्पदत्वाद्लक्ष्यताभ्युपगमेन तत्परिहारस्य चात्यन्तासंभवदुक्तत्वात् हेतुपदस्य हेतुपरतया व्याचष्टे हेत्वोरिति सहेत्वोः साध्यवद्व्यावृत्तत्वसाधा
रण्यसाध्याभावव्याप्यवत्पक्षकत्वरूपसत्प्रतिपक्षत्वासंभवादसाधारणसत्प्रतिपक्षपदेः न्यथा व्याचष्टे असाधारणादिति तथा प्रकृते सत्प्रतिपक्षपदार्थः प्रकृतसहेत्वो
दुष्टतारूपाभासत्वयोगादाभासपदमन्यथा व्याचष्टे आभासत्वादिति तद्धेत्वित्यत्र तत्पदस्य हेतुपरत्वं न संभवति सत्प्रतिपक्षस्थले प्रतिबंधकज्ञानस्य हेतुविषयकत्वा
नियमात् हेतुविषयकथनस्याप्रयोजकत्वात् बुद्धिपदस्यापि बुद्धिसामान्ये परत्वं न संभवति हेत्वादिमात्रविषयकज्ञानस्याप्रतिबंधकत्वाद् अतस्तत्पदस्य हेतुपक्षोभयपरत
या बुद्धिपदस्य साध्यवद्व्यावृत्तत्वसाध्याभावव्याप्यवत्त्वावगाहिबुद्धिपरतया तद्बुद्धिपदं हेतुविषयकसाध्यवद्व्यावृत्तत्वबुद्धिपक्षविषयकसाध्याभावव्याप्यवत्ताबुद्धिः
परत्वेन व्याचष्टे तद्बुद्धेरिति तथा लक्ष्यतालाभाय एवहेत्वोरित्यनंतरं श्रुतएवकारोऽत्र योजनीयस्तदर्थं अंतर्भाव्य व्याचष्टे प्रतिबंधकत्वपरमायातीति परं केवलं अवधारणव्य
वच्छेद्यं स्पष्टयति नेत्विति तद्विषयस्य तादृशबुद्धिविषयस्य दोषत्वं दोषलक्षणलक्षत्वं असत्त्वात् लक्षताप्रयोजकरूपस्यासत्त्वात् प्रतिबंधकीभूतज्ञानप्रमात्वस्यैव तद्वि
षयस्य लक्ष्यताप्रयोजकत्वादिति भावः असत्त्वादिविशिष्टस्याप्रसिद्धत्वादिति नार्थः एकदेश एव व्याप्तेराशंकिततया विशिष्टाप्रसिद्धेस्तद्लक्ष्यतानिर्वाहकत्वविरहेणानु
पयोगादन्यथाप्रतिबंधकीभूतभ्रमविषयस्यापि दोषत्वे बाधभ्रमेण पक्षे साध्याभावभ्रमेण तस्य भ्रमविषयसाध्याभावादेः नन्वेवमुक्तस्थले प्राचां दशाविशेषे हेतोर्दुष्टताप्र
वादो नोपपद्यत इत्यत आह । निर्युक्तिकस्त्विति उपदर्शितस्थलेपि दशाविशेषे हेतोर्दुष्टतामंगीकुर्वन्तस्साधारण्याय लक्षणमन्यथा व्याचष्टे यत्त्वित्यतमनुपन्यस्यति । यत्त्विति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰सा॰ ल्पनापेक्षयातद्विशिष्टस्यैकस्यैवभेदस्यलाघवेनकल्पयितुंयुक्तत्वादित्यभिप्रायः। एतच्च यथाश्रुताभिप्रायेणतद्धर्मावच्छिन्ननिरूपितविषयितान्यतमविषयितानिरूपकतावच्छे
१६ दकधर्मवत्त्वस्यलक्षणत्वेत्वधिकविकाशःतयाविशेषणस्यार्थक्यमित्यवधेयं। ननुसाध्यादिभेदेनलक्षणभेदे ह्रदोवन्हिमानित्यादिस्थलीयलक्षणस्यपंचहेत्वाभासासाधारण्यासंभ
वात्ताद्दशलक्षणाक्रांतानांपंचविधत्वोक्त्यसंगतिरित्यतआह। पंचविधत्वेनेत्यादि। पंचविधत्वोक्तिरित्यर्थः। तत्र...स्थलेति यत्रपंचानामेवहेत्वाभासानांसंभवो गौरवः
घटत्वादित्यादौतत्स्थलीयलक्षणाक्रांतस्यपंचविधत्वाभिप्रायेणेत्यर्थः। नन्वेवंलक्षणाननुगमादितरभेदानुमानेभागासिद्धिरित्यतआह। व्यभिचारादेरित्यादि। साध्यादिभेदनियं
त्रितत्वात्। साध्यादिभेदनियंत्रितलक्ष्यतावच्छेदकत्वात्। तथाचलक्षणस्यैवलक्ष्यतावच्छेदकस्याप्यननुगमान्नभागासिद्धिरितिभावः। नन्वेवमनुगतोक्त्यसंभवात्। नायंप्रका
रःसाधीयानित्यतआह। शब्दभेदस्येति। इदंतुनिष्कर्षे...यावदन्यान्यतमत्वमितरभेदानुमापकमेवनतुदोषपदप्रवृत्तिनिमित्तंतथासतिनिर्वन्हित्वविशिष्टवन्हेःसाधनेधू
मोदुष्टइत्यादौदुष्टपदस्यवन्ह्यभावविशिष्टनिर्वन्हित्वावच्छिन्नान्यतमवदर्थकतयानिर्वन्हित्वविशिष्टवन्हिसाधनेइत्यादेरनन्वितार्थकत्वप्रसंगात्। अनुमितिप्र...सिद्धा
न्तस्यहेत्वन्त्वपिनिर्वन्हित्वविशिष्टविशेष्यकवन्ह्यनुमित्यभावप्रयोजकत्वार्थकत्वासंभवात्किंत्वभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वमेवतथाउक्तस्यलेच
प्रकारताप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारताचोभयमेवसाधनपदार्थःप्रकारतारूपतदर्थेःपरतदर्थैकदेशव्याप्तिप्रकारतानिरूपकप्रकारतायां
चषष्ठ्यंतवन्हिपदप्रतिपाद्यस्यवन्हिनिष्ठत्वस्यस्वरूपसंबंधेनसाधनपदार्थप्रकारताद्वयेसप्तम्यंतार्थस्यनिर्वन्हित्वादिविशिष्टविशेष्यतायाश्चनिरूपितत्वसंबंधेनान्वयःसा
धनपदोत्तरसप्तम्यानिरूपकत्वंद्वित्वंचार्थःनिरूपकत्वेनिरुक्तसाधनपदार्थयोःपृथगन्वयःतदन्वितनिरूपकत्वेचद्वित्वान्वयःद्वित्वान्वयिताद्दशनिरूपकत्वयोर्दोषपदार्थघटका
भावेन्वयःतथाचनिर्वन्हित्वविशिष्टविशेष्यतानिरूपितवन्हिनिष्ठप्रकारतानिरूपकत्वस्यताद्दशविशेष्यतानिरूपितायावन्हिप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपित
धूमत्वावच्छिन्नप्रकारतातन्निरूपकत्वस्यद्वयोरभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वानित्येवान्वयबोधःप्रतिबंधकीभूतभ्रमविषयितानिरूपकाभावमादायप
र्वतेवन्हिसाधनेधूमोदुष्टइत्यादिप्रयोगवारणायविषयितायांभ्रमान्यवृत्तित्वंनिवेशितंदोषघटककेवलसाध्यादौदोषव्यवहाराभावात्। अत्रायंदोषइत्यादौस्वविषयकनि
श्चयाव्यवहितोत्तरानुमितिनिष्ठताद्दशोभयाभावाधिकरणतात्वव्यापकविरोधिविषयिताप्रयोज्यताकधर्मएवदोषपदार्थइत्यादिक्। असाधारण्यस्यपक्षवृत्तित्वेसतिसाध्य
व्यापकीभूताभावप्रतियोगित्वात्मकस्यसत्प्रतिपक्षस्यचपक्षनिष्ठसाध्याभावव्याप्यवत्त्वरूपस्यबुद्धेर्विरोधिविषयकतयासाध्यवत्ताज्ञानप्रतिबंधकत्वंनिर्विवादमेवएवंचत राम
ज्ज्ञानदशायांहेतोरनुमितिस्यजनकतयातद्बुद्धेःप्रतिबंधकत्वमावश्यकमित्येताद्दशयथाश्रुतार्थपरस्यदशाविशेषइत्यादिमूलस्यानुक्तिरन्यथासाधारण्यादिज्ञानप्रतिबंधक १६

CC-0. In Public Domain. Digitization by eGangotri

ज्ञा·सा व्याप्तिताद्वस्थ्यमितितन्निर्वंनि। [illegible]वेति। तद्धि[illegible]विषयकेति। [illegible] निर्वन्हिः पर्वतो वन्हिमानित्यादौ नाहृशज्ञानविरोधिज्ञानाप्रसिद्ध्यावपितद्विषयविषयक
१५ स्यनिर्वन्हिः पर्वत इत्यादिज्ञानस्य प्रतिबंधके यद्वन्हिमान्पर्वत इत्यादिज्ञानं तद्विषयिताभावात् यैव वन्हिमत्पर्वतादिरूपं तस्य सौयाश्रयासिद्ध्यादौ लक्षणसमन्वय[illegible]घ
टवद्भूतलादिरूपोदासीनविषयकसमूहालंबनात्मकपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतद्व्याप्यहेतुप्रकारकज्ञानविषयविषयकघटवद्भूतलादिज्ञानप्रतिबंध
15 कज्ञाने विषयघटाभाववद्भूतलादावतिव्याप्ति[illegible]पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टसाध्यतन्निरूपितव्याप्तिविशिष्टहेतुतावच्छेदकाव
च्छिन्नप्रकारकग्रहत्वव्यापकविषयिताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयिताकधर्मवत्त्वनिवेशान्न दोषः घटवद्भूतला
दिविषयितायास्तादृशग्रहत्वाव्यापकत्वात्[illegible]पि तत्पर्वतांशे वन्हिमत्त्वाग्रहनवगाहिनो निर्वन्हिः पर्वत इत्यादिज्ञानस्य यावन्हिप्रकारकत्वाद्यनिरूपितानिर्वन्हित्वा
दिप्रकारतानिरूपितपर्वतादिविषयितासेवानाहार्यत्वविशिष्टतया वन्हिमत्पर्वत इत्यादिज्ञानप्रतिबध्यतावच्छेदिकातस्याश्च निर्वन्हिपर्वतो वन्हिमानित्याद्याकारकाः
हार्यज्ञानसाधारण्येमानाभावः आहार्यज्ञानसामग्र्यास्तादृशविषयिताप्रयोजकत्वासिद्धेर्विपरीत[illegible]ज्ञानाभावघटितायास्तादृशविषयिताप्रयोजकानाहार्यज्ञानसा
मग्र्याश्चाहार्यज्ञानाजनकत्वात्। तादृशग्रहव्यापिकावन्हिमत्त्वादिप्रकारतानिरूपिततादृशपर्वतादिविषयतासा च न प्रतिबध्यतावच्छेदिकेति निर्वन्हिप्रकारतानिरू
पितपर्वतादिविषयितात्वेन निर्वन्हिः पर्वत इत्यादिज्ञानीयविषयितातथाविधग्रहत्वव्यापिके[illegible]विषयितात्वादिना घटवद्भूतलादिविषयितानामर्पितद्व्यापकनयादा
म सीनपदार्थचारणाशक्य[illegible]द्रूपावच्छिन्ने यद्रूपावच्छिन्नप्रकारतात्वावच्छिन्नेतादृशग्रहत्वव्यापकतद्रूपावच्छिन्नविशेष्यक.तद्रूपावच्छिन्नप्रकारकग्रहत्वाव
च्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकस्वावच्छिन्ननिरूपितविषयताकधर्मत्वस्य विवक्षणीयत्वे सर्वसामंजस्या[illegible]दिक्॥ [illegible] स्वरससूचनाय केचि
[illegible]स चोक्तयुक्त्या निर्वन्हिर्वन्हिमानित्यादिस्थलो यदोषासंग्रहेण[illegible]धर्मितावच्छेदकत्वप्रत्यासत्त्या वन्हिप्रकारकज्ञाने प्रतिबन्ध्यभावज्ञानस्य प्रतिबंधकत्वामते निर्वन्हि
र्वन्हिमानित्येतादृशसमानविषयकानाहार्यवन्हिमानित्याकारकज्ञानप्रतिबंधकतामादाय लक्षणसमन्वयः संभवती[illegible]तादृशमतानुसारेण पर्वतो वन्हिमानित्या
दौ वन्ह्यभाववद्ध्रदादेर्दोषताप्रसंगात्[illegible]। सर्वत्र यद्रूपावच्छिन्नार्थकैता[illegible]मिति यत्र यादृशपक्षसाध्यहेतुस्थले यादृशदोषज्ञानस्य प्रतिबध्यज्ञानप्र
सिद्धिर्यथा निर्वन्हिः पर्वतो वन्हिमान्धूमादित्यादौ वन्हिविशिष्टपर्वतादिरूपाश्रयासिद्धिधूमाभावविशिष्टस्वरूपासिद्ध्यादीनां ज्ञानस्य तत्र तादृशदोषाणां ग्राह्याभाव
तद्व्याप्यरूपघटकभेदेन विशेषणविशेष्यभावभेदेन च विभिन्नानामननुगमेन विशिष्टपक्षविशिष्टसाधनवैशिष्ट्यग्रहविरोधित्वरूपासिद्धित्वादिनैव तावदन्यान्यत्वघटक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेदे प्रतियोगितया निवेशो न तु वह्निविशिष्टपर्वतत्वनिर्धूमत्वविशिष्टनिर्वह्नित्वादिना प्रयोजनविरहात्। यत्स्थलीयस्य यादृशदोषविषयकज्ञानस्य प्रतिबध्यज्ञानमप्रसि
द्धं यथा निर्वह्निर्वह्निमानित्यादिस्थलीयस्य बाधादेर्ज्ञानस्य तत्र दोषाणामगत्या वन्ह्यभावविशिष्टनिर्वह्नित्ववन्ह्यभावव्याप्यविशिष्टनिर्वह्नित्वनिर्वह्निनिष्ठवन्ह्यभावव्या
प्यत्वतन्निष्ठवन्ह्यभावव्याप्यत्वादिननुगतरूपेणैव निवेशः। अत्र विशिष्टभिन्नभिन्नत्वस्य शुद्धविशेष्यसाधारणतया सर्वमाकाशवदित्यादावकाशाभावविशिष्टसत्वादि
रूपबाधादिभिन्नत्वस्याप्रसिद्धतया च तत्तद्विशिष्टनिरूपितविषयितान्यतमविषयितानिरूपकतावच्छेदकधर्मवत्त्वमेवाभिमतम्। अयं च प्रकारो यादृशपक्षसाध्य
हेतुकस्थले उक्तसमूहालंबनानुमितेरप्रसिद्धिस्तत्रैवादरणीयः। यत्र तु तत्प्रसिद्धिस्तत्र लाघवाद्यथाश्रुतमूललभ्यलक्षणमेवसाधीयः। शब्दाभेदस्याकिं चित्कर तया
स्वयमेव वक्ष्यमाणत्वादि ... यत्राचाश्रयासिद्ध्याद्येकविध एव दोषः प्रतिबध्यज्ञानं च प्रसिद्धं महानसत्ववान्पर्वतो वह्निमान्धूमादित्यादौ तत्र विशिष्टपक्षग्र
हविरोधित्वादिरूपाश्रयासिद्धित्वादेरेवदोषसामान्यत्वलक्षणत्वमुचितं न तु महानसत्वाद्यभावविशिष्टपर्वतत्वावच्छिन्नतादृशाभावव्याप्यविशिष्टपर्वतत्वाद्यवच्छि
न्नादिभिन्नभिन्नत्वस्य निरुक्तसमूहालंबनानुमितिविरोधित्वस्य च गौरवादित्याशयेनाह ... इति। एकविध एव यत्र दोषस्तद्विषयकज्ञानप्रतिबध्यज्ञा
नं च प्रसिद्धं तादृशस्थले इत्यर्थः। तेन ग्राह्याभाववत्त्वव्याप्यभेदेन विशेषणविशेष्यभावभेदेन च सर्वदोषाणां नानात्वसंभवादेकमात्रदोषस्थलस्याप्रसिद्धत्वेपि पर्वतान्यः
पर्वतो वह्निमान्धूमादित्यादावेकमात्रदोषस्थले च ग्राह्याभाववत्त्वव्याप्यरूपघटकादिभेदेन विभिन्नाश्रयासिद्ध्यादीनामनुगमकरूपाभावेन तावदन्यान्यत्वस्य लक्षणत्वा
वश्यकत्वे च न क्षतिः। तत्त्वं तादृशात्वं निरुक्ताश्रयासिद्धित्वादिकमिति ... यत्र परामर्शविरोधिनो व्यभिचारविरोधासिद्धयस्त्रयो दोषा न तु बाधप्रतिरो
धौ पर्वतो वह्निमान् ह्रदत्वादित्यादौ तत्र परामर्शविरोधित्वमेव सामान्यलक्षणं यत्र बाधप्रतिरोधासिद्धयो दोषा न तु व्यभिचारविरोधौ ह्रदो वह्निमान्धूमात्काञ्चनमयह्र
दो वह्निमान्धूमाद्ध्रदः काञ्चनमयवह्निमान्धूमाद्धूलो वह्निमान्काञ्चनमयधूमादित्यादौ तत्र विशिष्टपक्षे विशिष्टसाध्यसाधनयोर्वैशिष्ट्यावगाहिज्ञानं तद्विरोधित्वमेव तथा एवं
यत्र व्यभिचारासिद्धी एव दोषौ काञ्चनमयः पर्वतो धूमवान्वह्नेरित्यादौ तत्र विशिष्टपक्षविषयकव्याप्तिविशिष्टसाधनग्रहविरोधित्वादिकं तथेत्यपि ... तद्धर्मावच्छिन्नभि
न्नत्वरूपलक्षणघटकतत्तद्धर्माणां भागासिद्धतया हेत्वाभाससामान्येतरभेदाननुमापकत्वेपि व्यभिचाराघारकतया तदितरांशस्य वैयर्थ्य मित्यत आह ... सा चान्योन्याभावा
तिरिक्त एवेति योजना स च तत्तद्धर्मावच्छिन्नभेदकूटावच्छिन्नप्रतियोगिताकस्वातिरिक्तः तत्तद्धर्मातिरिक्तः तथा च धर्मिभेदान्नैव व्यर्थं तत्तद्धर्मावच्छिन्नभेदमात्रावच्छिन्न
प्रतियोगिताकान्योन्याभावस्य प्रतियोगितावच्छेदकीभूतभेदप्रतियोगितावच्छेदकतत्तद्धर्मस्वरूपत्वेपि तादृशभेदकूटावच्छिन्नप्रतियोगिताकभेदत्वस्य नानाधर्मगुरुकं ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा॰सा॰ ल्पनापेक्षयातद्विशिष्टस्यैकस्यैव भेदस्य लाघवेन कल्पयितुंयुक्तत्वादित्यभिप्रायः। एतच्च यथाश्रुताभिप्रायेण तद्धर्मावच्छिन्ननिरूपितविषयितान्यतमविषयितानिरूपकतावच्छे
१६ दकधर्मवत्त्वस्य लक्षणत्वे त्वधिकविकाशनया विशेषणसार्थक्यमित्यवधेयं ॥ अनुसाध्यादिभेदेन लक्षणभेदे ह्रदो वन्हिमानित्यादिस्थलीयलक्षणस्य पंचहेत्वाभासासाधारण्यसंभ
वात्तादृशलक्षणाक्रांतानां पंचविधत्वोक्त्यसंगतिरित्यत आह। यदि पक्षे दोषविशेषवति। पंचविधत्वोक्तिरित्यर्थः। तत्र स्थलेति यत्र पंचानामेव हेत्वाभासानासंभवो गौरवः
घटत्वादित्यादौ तत्स्थलीयलक्षणाक्रांतस्य पंचविधत्वाभिप्रायेणेत्यर्थः। नन्वेवं लक्षणाननुगमादितरभेदानुमाने भागासिद्धिरित्यत आह। व्यभिचारादेरित्यादि साध्यादिभेदनियं
त्रितत्वात्। साध्यादिभेदनियंत्रितलक्ष्यतावच्छेदकत्वात्। तथा च लक्षणस्यैव लक्ष्यतावच्छेदकस्याप्यननुगमान्न भागासिद्धिरिति भावः। नन्वेवमनुगतोक्त्यसंभवात्। नायत्रक्व
रः साधीयानित्यत आह। शब्दार्थेरस्येति। इदंतु निष्कर्षे। यावदन्यान्यतमत्वमितरभेदानुमापकमेव न तु दोषपदप्रवृत्तिनिमित्तं तथा सति निर्वन्हित्वविशिष्टवन्हेः साधने धू
मो दुष्ट इत्यादौ दुष्टपदस्य वन्ह्यभावविशिष्टनिर्वन्हित्वावच्छिन्नान्यतमवदर्थकतया निर्वन्हित्वविशिष्टवन्हिसाधने इत्यादेरनन्विताार्थकत्वप्रसंगात्। अनुमितिप्रतिबंधकसिद्धा
न्तस्य हेत्वन्वयि निर्वन्हित्वविशिष्टविशेष्यकवन्ह्यनुमित्यभावप्रयोजकत्वार्थकत्वासंभवात्किंत्वभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वमेव तथा उक्तस्थलेत्व
प्रकारताप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारता चोभयमेव साधनपदार्थः प्रकारतारूपतदर्थैः परतदर्थैकदेशव्याप्तिप्रकारतानिरूपकप्रकारतायां
चषष्ठ्यंतवन्हिपदप्रतिपाद्यस्य वान्हिनिष्ठत्वस्य स्वरूपसंबंधेन साधनपदार्थप्रकारताद्वयेसप्तम्यंतार्थस्य निर्वन्हित्वादिविशिष्टविशेष्यताया श्च निरूपितत्वसंबंधेनान्वयः सा
धनपदोत्तरसप्तम्या निरूपकत्वं द्वित्वं चार्थः निरूपकत्वे निरुक्तसाधनपदार्थयोः पृथगन्वयः तदन्वितनिरूपकत्वे च द्वित्वान्वयः द्वित्वान्वयिताहृशनिरूपकत्वयो दोषपदार्थघटका
भावेन्वयः तथा च निर्वन्हित्वविशिष्टविशेष्यतानिरूपितवन्हिनिष्ठप्रकारतानिरूपकत्वस्य तादृशविशेष्यतानिरूपितायावन्हिप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपित
धूमत्वावच्छिन्नप्रकारतातन्निरूपकत्वस्य द्वयोरभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वानित्येवान्वयबोधः प्रतिबंधकीभूतभ्रमविषयितानिरूपकाभावमादाय प
र्वंतेवन्हिसाधने धूमो दुष्ट इत्यादिप्रयोगवारणाय विषयितायां भ्रमान्यवृत्तित्वं निवेशितं दोषघटके केवलसाध्यादौ दोषव्यवहाराभावात्। अत्रायं दोष इत्यादौ स्वविषयकनि
श्चयाव्यवहितोत्तरानुमितिनिष्ठत्वादृशोभयाभावाधिकरणतात्वव्यापकविरोधिविषयिताप्रयोज्यताकधर्म एव दोषपदार्थ इत्यादि। असाधारण्यस्य पक्षवृत्तित्वे सति साध्य
व्यापकीभूताभावप्रतियोगित्वात्मकस्य सत्प्रतिपक्षस्य च पक्षनिष्ठसाध्याभावव्याप्यवत्त्वरूपस्य बुद्धेर्विरोधिविषयकतया साध्यवत्ताज्ञानप्रतिबंधकत्वं निर्विवादमेव एवं च त राम
ज्ज्ञानदशायां हेतोरनुमितिस्यजनकतया तद्बुद्धेः प्रतिबंधकत्वमावश्यकमित्येतादृशयथाश्रुतार्थपरस्य दृशा विशेषइत्यादिमूलस्यानुपपत्तिरन्यथासाधारण्यादिज्ञानप्रतिबंधक १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्य
१ इतरात्प्रतिबंधात्वस्य चायमर्थः पर्वतत्त्वेन – प्रकारताविशिष्टविशेष्यताशालिज्ञानान्यज्ञानत्वं, प्रकारतावैशिष्ट्यं च स्वनिरूपितत्व स्वविशिष्टप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वरूप उभय संबंधेन । स्ववैशिष्ट्यं च । स्वविशिष्टप्रतियोगित्वसंबन्धावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यतावच्छिन्नत्व । स्वावच्छिन्नविशेष्यतानिरूपितप्रकारतावत्त्वैतदन्यतर स्वनिरूपितविशेष्यत्वस्वावच्छिन्नत्व एतदुभयसंबंधेनेति ।

जा·सा· प्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वरूपविरोधित्वस्य विषयितायां निवेशे तु शेषवैयर्थ्यमुक्तरीत्या निर्वन्हिमानित्यादिस्थलीयदोषैः व्याप्तिश्चानुपक्षतावच्छेदकवि वन्हि·
१४ शिष्टे निरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिविषयते व विरोधिविषयितापदार्थः तथा च यन्निरूपिततादृशविषयिताशालिनिश्चयोत्तरानुमितित्वव्यापकउभयाभा
वस्तत्त्वमितिसमुदितार्थः निश्चयत्वं च विशेषणविशेष्यतावच्छेदकभावानापन्नविरुद्धकोटिद्वयप्रकारकैकधर्मिविशेष्यकज्ञानान्यज्ञानत्वं विशेषणविशेष्य तावच्छेदक
४५ भावानापन्नत्वनिवेशान्निर्वन्हिः पर्वतो वन्हिमानित्यादौ पक्षतावच्छेदकविशिष्टसाध्यादिवैशिष्ट्यग्रहस्य कुत्रविरोधिद्वयप्रकारकत्वनियमेपि न तादृशवैशिष्ट्यावगाहिनिः
श्चयाप्रसिद्धिः यदीयविषयितातादृशनिश्चयावृत्तितत्त्वमित्येतावति कृते ह्रदो वन्हिव्याप्यधूमवानित्यादौ ह्रदादिनिष्ठवन्ह्यभावादिमत्त्वेऽतिव्याप्तिः वन्ह्यादिव्याप्यवत्तानिश्च
यस्यापि वन्ह्यादिनिश्चयवत्कार्यसहभावेन वन्ह्यभावादिग्रहविरोधित्वाद्वन्ह्यभावादिमत्त्वविषयितायास्तादृशनिश्चयावृत्तित्वादिति न शेषवैयर्थ्यमिति तदर्थं वन्हिव्याप्य
वान्वन्हिव्याप्यव्याप्यवांश्च ह्रदो वन्ह्यभाववानित्येतादृशाहार्यज्ञानोपगमे न वन्ह्यभावादिमत्त्वविषयिता या वन्हिव्याप्यादिमत्त्वनिश्चयवृत्तिनपोक्तातिव्याप्त्यानवकाशे न शेष
सार्थक्यानुपपत्तेः वन्हिमान्वन्हिव्याप्यवांश्च ह्रदो वन्ह्यभाववानित्येतादृशाहार्यसाध्यादिवैशिष्ट्यनिश्चये ह्रदो वन्हिमानित्यादिस्थलीयबाधादिविषयितासत्त्वेनासंभव
प्रसंगाच्च वन्ह्यादिरूपधर्मितावच्छेदकानवच्छिन्नवन्ह्यभावादिविशेषितह्रदादिनिरूपितविषयितायाः साध्यादिनिश्चयावृत्तित्वेपि घटादिनिरूपिताया अपि दोषविषयि
त्वावच्छिन्नायाविषयितायाः साध्यादिनिश्चयावृत्तितया घटादावुदासीनेऽतिव्याप्तेर्वारणाय यादृशविशिष्टविषयितासामान्यं तादृशनिश्चयावृत्तितादृशविशिष्टनिरूपि
तविषयिताया एव विरोधिविषयितेत्यनेन विवक्षणीयतया अप्रतीकारात् सामान्यवृत्तियदीयविषयितासामान्यं तादृशनिश्चयावृत्तितदीयविषयितायाविवक्षणे न निर्वाहेपि
विरोधियद्विषयिताशालिनिश्चयोत्तरानुमितिसामान्ये द्वयोर्व्यतिरेकइत्यनभिधाय यद्विषयकनिश्चयस्येत्यादिवक्ताभिधानस्य ग्रंथकाररीतिविरुद्धत्वात् एतेन विषयिता
या उभयाभावप्रयोजकत्वं तादृशोभयाभावप्रतियोगितावच्छेदकं यद्रूपविशिष्टेयेन संबंधेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वघटितं तद्रूपावच्छिन्नविशेष्यकतत्संसर्गकत
द्रूपावच्छिन्नप्रकारकत्वविशेषितेनानुमितित्वेनानाहार्यलौकिकसन्निकर्षाद्यजन्यज्ञानत्वेन वा अवच्छिन्नान्तनिरूपितप्रतिबंधकतावच्छेदकत्वं एवं च यादृशविशिष्टवि
षयितानिरुक्ततथाविधोभयाभावप्रयोजकताश्रयस्तादृशत्वमेव लक्षणं विषयित्वादौ विरोधित्वादिकथनं तु स्वरूपाख्यानमात्रमिति प्रलपितमप्यनादेयम् निर्वन्हिर्वन्हिमानि
त्यादिस्थलीयदोषस्योक्तयुक्त्या दुःसंग्रहत्वात् "अत एव चेत्" केचिदित्युग्रिमकल्पद्वयात्रापिकल्पेदीधीतिकृतोननिर्भरं निर्वन्हिर्वन्हिमानित्यादिस्थलीयदोषासंग्रहेणास्वरस्याग्रि राम·
मकल्पे केचिदित्यनेनैवात्रापिकल्पेवदंती त्यनेन सूचितत्वात् निर्भरस्तु केचिदित्यादिकल्पस्य एवं अत एवात्र प्रकर्षबोधनाय प्राहुरित्युक्तमिति परे तु घटाभावादिधर्मिताव १४

CC-0. In Public Domain. Digitization by eGangotri

रित्यादिस्थलीयदोषे नितरामव्याप्तिः वन्हिमन्निष्ठवन्हिमत्त्वादेरेव तत्र दोषत्वसंभवात्तद्विषयकज्ञानस्य च कञ्चिदपि प्रतिबंधकत्वायोगात् यत्र निर्वन्हिः पर्वतो वन्हिमानि
त्यादौ पर्वतत्वादिसामानाधिकरण्येन वन्ह्यभावादिमत्त्वस्य पक्षतावच्छेदकघटकता तत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यादिमत्त्वं न दोषः विशिष्टपक्षग्रहाद्यविरोधित्वे
नाश्रयासिद्ध्यादिरूपतानुपपत्तेरुक्तरीत्यैतल्लक्षणानाक्रान्तत्वात् पर्वतत्वावच्छेदेन वन्ह्यादिमत्त्वमप्रसिद्धं वन्हिशून्यपर्वतादेरपि सत्वात् पर्वतत्वादिसामानाधिक
रण्येन निर्वन्हिपर्वतत्वावच्छेदेन वा वन्ह्यभावादिमत्त्वरूपबाधादिः तज्ज्ञानस्य पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वव्यापकविषयिताघटितधर्मावच्छिन्ना
प्रतिबंधकतया तत्र लक्षणगमनायोगात् पर्वतत्वावच्छेदेन वन्ह्यभावादिमत्त्वमप्रसिद्धत्वादिति तत्र न कोपि दोषः प्रयुक्तत्वव्यापकत्वं तद्विषयकनिश्चय
निष्ठविरोधिविषयितापा उभयाभावव्याप्यत्वं स्वाश्रयतादृशनिश्चयाव्यवहितोत्तरानुमितित्वसंबंधेन तादृशसंबंधलाभाय वत्तदुत्तरमनुमितावि विरोधि
विषयकयद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तादृशोभयाभाव इति पर्य्यवसि निर्वन्हिर्वन्हिमानित्यादिस्थलीयबाधादेर्विषयितायाः स्वरूप
संबंधरूपोभयाभावप्रयोजकत्वासंभवेपि निरुक्तोभयाभावप्रतियोगितावच्छेदककोटौ यद्रूपावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारकत्वं निविष्टं तद्रूपावच्छिन्नवि
७८ शेष्यकतद्रूपावच्छिन्नाभावव्याप्यान्यतरप्रकारकस्यैव विरोधिविषयकत्वार्थकतया तत्र लक्षणे सुसमन्वयमेव तादृशप्रयोजकत्वस्यानिवेशात् तत्र वस्तुमात्रेऽति
व्याप्तिर्दुर्वारैव तादृशोभयाभावस्य समूहालंबनरूपघटादिविषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकताया असत्त्वात् विरोधिविषयितानतिरिक्तवृत्ति
यद्विषयिताशालिनिश्चयस्य निश्चयातेन विवक्षितत्वात् घटादिविषयितायास्तत्र निरुक्तविरोधिविषयितानतिरिक्तवृत्तित्वविरहात् विरोधिविषयितानतिरि
क्तवृत्तिर्यदीयविषयिता तत्त्वमित्येतावतैव सामंजस्ये शेषवैयर्थ्यं यत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यादेः साध्यता तत्र पर्वतत्वादिसामानाधिकरण्ये
न वन्ह्याद्यभावादिमत्त्वस्य विषयिताया निरुक्तविरोधिविषयितानतिरिक्तवृत्तित्वात्तत्रातिव्याप्तेर्वारकतया शेषसार्थक्यात् तदुपादाने तादृशवन्ह्यभावादिमत्त्वविष
यकनिश्चयानन्तरं पर्वतत्वादिसामानाधिकरण्येन वन्ह्याद्यनुमित्युत्पत्त्या तादृशानुमि-तौ तथाविधोभयसत्त्वेनातिव्याप्त्यनवकाशा निर्वन्हिः पर्वतो व
न्हिमानित्यादौ यत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यभावादेः पक्षतावच्छेदकघटकता तत्र पर्वतत्वसमानाधिकरण्येन वन्हिमत्त्वस्य विशिष्टपक्षग्रहाविरोधित्वे
नाश्रयासिद्ध्यानात्मकस्य हेत्वाभासांतरताभयेनासंभवद्दोषभावस्य निरुक्तविरोधिविषयितानतिरिक्तविषयिताकतयाऽतिव्याप्तेः तादृशोभयाभावप्रतियोगिताव
च्छेदकगर्भे यद्रूपविशिष्टे येन संबंधेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविशते तद्रूपावच्छिन्नविशेष्यकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

13

मिचारादिविषयिता याबाधादिविषयितान्तःपातिविषयितामात्रवृत्तिरूपेणैवोपदर्शितसाध्यवत्ताग्रहप्रतिबंधकतावच्छेदकतयातेनैवरूपेणतादृशसाध्यवगाहित्वविरहव
त्ताप्रयोजकत्वात् तादृशस्यचरूपस्यबाधादिविषयितानन्तःपाति व्यभिचारादिविषयितासाधारणव्यभिचारादिरूपविशिष्टविषयितात्वाव्यापकत्वात् तद्व्यापकरू
पावच्छिन्नाप्रयोज्यत्वस्योक्तबाधादिविषयिताप्रयोज्योक्तसाध्यावगाहित्वाभाववत्तायामसत्त्वात् मेयत्वविशिष्टव्यभिचारादिविषयितायां येनरूपेणव्याप्त्यादिग्र
हःप्रतिबंधकतावच्छेदकतातद्रूपेणनिरुक्तविषयितात्वव्यापकेनमेयत्वविशिष्टव्यभिचारादिविषयितान्तः पातिव्यभिचारादिविषयितायांमेयत्वविशिष्टव्यभिचा
रादिविषयिताप्रयोज्यव्याप्त्याद्यवगाहित्वाभाव वत्तायां नियमतःप्रयोजकत्वान्नातिप्रसंगावकाशः बाधसत्प्रतिपक्षादिविषयकज्ञानस्यनानाविधबाधादिविषयक
ज्ञानस्यचानन्तरंजातायांघटानुमितौबाधादिविषयिताप्रयोज्यायांःभावाधिकरणतातस्यांविशिष्टान्तरविषयिताप्रयोज्यत्वेपिस्वपूर्ववर्त्तिज्ञानीयविरोधिविषयिता
याएवस्वनिष्ठप्रतिबध्यतावच्छेदकाभावाधिकरणताप्रयोजकत्वात् एकैकबाधादिमात्रविषयकज्ञानानन्तरजाततज्ज्ञानेयातत्तद्बाधादिविषयिताप्रयोज्यतस्यांविशि ता·
ष्टान्तरविषयित्वाप्रयोज्यतयाबाधादौलक्षणसमन्वयः व्यभिचारादिघटितबाधादिविषयिताप्रयोज्यायादीधीतिकारोक्तोभयाभावाधिकरणतायाव्याप्त्याद्यवगा
हिताविरहप्रयोज्यत्वेनयत्किंचिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नतादृशबाधादिविषयतान्तःपातिव्यभिचारादिविषयताप्रयोज्यत्वनियमान्तत्तत्सं
ग्राह्यतादृशोभयाभावप्रयोजकाभावाधिकरणतापर्यन्तनिवेशः तथासतिदर्शितोभयाभावाधिकरणतायाउक्तरूपावच्छिन्नव्यभिचारादिविषयित्वप्रयोज्यत्वनियमेपि
तादृशोभयाभावाधिकरणताप्रयोजकसाध्यादिमत्तावगाहित्वाभावाधिकरणतायाउक्तरूपावच्छिन्नव्यभिचारादिविषयित्वाप्रयोज्यत्वेनतादृशबाधादेःसंग्रहः नाद
शोभयाभावघटितलक्षणेपिकेवलनिर्वन्हित्वादिपक्षतावच्छेदकवन्ह्यादिसाध्यकस्थलीयनिर्वन्हिनिष्ठवन्ह्यभावरूपबाधादिदोषेऽव्याप्तिः तादृशबाधादिज्ञानस्याप्रतिबं
क धकतयातद्दोषविषयितायाःप्रतिबंधकतानवच्छेदकतयातथाविधोभयाभावाप्रयोजकत्वात् तस्यदोषत्वानुगमेचतादृशहेतौदुष्टत्वव्यवहारानुपपत्तेः तन्नेष्टापत्तोचनिर्वन्हिः प
पर्वतोवन्हिमानित्यादावपितत्संभवेनैतादृशप्रयासवैफल्यात् तन्नाभाववान्वन्हिमानित्यनाहार्यज्ञानस्यप्रसिद्ध्यातत्प्रतिबंधकीभूतस्याभाववन्निर्वन्हिरित्यादि
ज्ञानस्यविषयएवदोष अभाववत्वसामानाधिकरण्येननिर्वन्हित्वग्रहस्यतादृशवन्हिमत्वग्रहाविरोधित्वात् अभाववत्वावच्छेदेनवन्ह्यादिमत्ताग्रहविरोधि
त्वेपितादृशवन्ह्यादिमत्ताद्यवगाहित्वस्यवन्ह्यभावादिमत्वरूपपक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्यत्वाव्यापकतयातदवच्छिन्नप्रतिबंधकतावच्छेदकविषयितायां रा·म·
स्तथाविधोभयाभावाप्रयोजकत्वात्तद्विषयस्यदोषत्वानुपपत्तेः अभाववत्वावच्छेदेननिर्वन्हित्वग्रहस्यभ्रमरूपतयातद्विषयविशिष्टस्यैवाप्रसिद्धेः एवंवन्हिमान्निर्वन्हि १३

ग्रह·।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायतामित्याकारकेच्छाजन्यप्रत्यक्षएवेत्यर्थः। विरोधिविषयितानिवेशप्रयोजनमाह। एवंचेति। विरोधिविषयिताप्रयुक्तत्वनिवेशनेचेत्यर्थः। नक्षतिः ननिर्वह्निः पर्वतोवह्निमानि॰
त्यादौघटादेःऽतिव्याप्तिः। तस्यघटादिनिश्चयस्यविरोध्यविषयकत्वात् स्वानंतरानुमितिसामान्यनिष्ठतादृशोभयाभावप्रयोजकविरोधिविषयिताकत्वविरहात् वह्निमत्पर्वतत्वादि
विषयकसमूहालंबनात्मकघटादिनिश्चयानन्तरतादृशज्ञाननिष्ठतादृशोभयाभाववत्त्वस्य तज्ज्ञानीयविरोधिविषयिताप्रयुक्तत्वेपिघटादिनिश्चयाव्यवहितोत्तरानुमितिसा
मान्यान्तर्गतसमूहालंबनात्मकघटादिनिश्चयाव्यवहितोत्तरानुमितौविरोधिविषयिताप्रयुक्तोभयाभाववत्त्वविरहान्नातिव्याप्तिरितिभावः। प्रयोज्यप्रयोजकभावश्चायम॰
नुभवसिद्धः स्वरूपसंबंधविशेषः। विरोधिपदप्रयोजनमाह। एवमितीति। अनुमितावपीति। नक्षतिः तस्यविरोध्यविषयकत्वादित्यनुषज्यते। नक्षतिः नसाध्यवत्पक्षेऽतिव्याप्तिः विरो
धिविषयितापदेनतादृशोभयाभावप्रतियोगितावच्छेदककोटौयद्रूपावच्छिन्नांशेयद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वंनिविष्टंतद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्ना
भावतद्व्याप्यान्यतरविषयितायाः साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयितावहिर्भूतविषयितावाविवक्षितत्वादितिभावः। नचसिष
धयिषाधीनायांसाध्यनिश्चयोत्तरसमूहालंबनानुमितौतादृशोभयाभावसत्त्वात्तत्रहि विषयेऽतिप्रसंगएवनास्ति एवंपक्षेसाध्यनिश्चयोत्तरंतदतिरिक्तविषयकसाध्यविधेय
कानुमितेरनुत्पादेपिपक्षांशेसाध्यांशेवाऽधिकावगाहिन्या अनुमितेस्साध्यधर्मितावच्छेदकान्यविधेयकानुमितेस्साध्यावच्छिन्नपक्षविधेयकानुमितेश्चोत्पत्त्यातत्रोभयाभा
वासत्त्वादपिनातिप्रसंगप्रसक्तिरितिवाच्यं यत्रविषयविशेषेसिषाधयिषाबलात्सिद्ध्युत्तरतादृशानुमितिःप्रकृतसाध्यसिद्ध्यप्रतिबध्यसाध्यादिविषयकानुमितिश्चकदापिनजा
तातत्रैवातिव्याप्तेःसंभवात् द्वितीयकल्पेविषयितामात्रनिवेश्यनतुविरोधिविषयितापर्यंतमित्याशयेनाह। मानसत्वादीनेति। साध्यनिश्चयस्येत्यादि। मेयत्वविशिष्टव्यभिचारा
दिवारणाययथाश्रुतविशिष्टान्तराघटितत्वनिवेशे उपदर्शितव्यभिचारादिघटितबाधाद्यव्याप्याविशिष्टान्तरविषयिताप्रयोज्यस्वविषयिताप्रयोज्यतादृशोभयाभावप्रयोज
काभावाधिकरणताकत्वरूपंतादृशविशे षणेनिवेश्यमेयत्वविशिष्टव्यभिचारादिविषयिताप्रयोज्यायाउक्तोभयाभावप्रयोजकव्याप्याद्यवगाहित्वाभाववत्तायाःसुदृव्यभि॰
न. चारादिविषयिताप्रयोज्यत्वनियमेनमेयत्वविशिष्टव्यभिचारादौविशिष्टान्तरविषयिताप्रयोज्यस्वविषयिताप्रयोज्यनिरुक्तोभयाभावप्रयोजकाभावाधिकरणताकत्वमितिनातिप्रसं
गः। उपदर्शितव्यभिचारघटितबाधादिविषयिताप्रयोज्यायाः पक्षेसाध्यावगाहित्वाभावाधिकरणतायास्तद्घटकव्यभिचारादिविषयिताप्रयोज्यत्वेनतत्संग्रहः। नचविशिष्टपक्षेवि
शिष्टसाध्यवत्ताग्रहप्रतिबंधकतावच्छेदिकायास्तादृशवि षयितातः पातिव्यभिचारादिविषयितायाअपितादृशबाधादिविषयिताप्रयोज्यायांविशिष्टपक्षेविशिष्टसाध्यवैशिष्ट्या
वगाहित्वाद्यभावाधिकरणतायांप्रयोजकतयातादृशबाधादेरसंग्रहइतिवाच्यं यत्किंचिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशेनतत्संग्रहसंभवात्। व्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰सा॰ मादायलक्षणसमन्वयसंभवात्" पक्षतावच्छेदकेत्यादिदलद्वयनिवेशव्यावृत्तिः पूर्वरीत्याबोध्याविरोधिविषयिताप्रयुक्तत्वनिवेशप्रयोजनं च स्वयमेव वक्ष्यति" यत्र विषयविशेषस
१२ मूहालंबनज्ञानं न जातं तत्र पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वविशिष्टसाध्यव्याप्तिविशिष्टवैशिष्ट्यावगाहित्वाभावरूपविशिष्टाभावाप्रसिद्ध्याः व्याप्तिरतो विशिष्टा
भावमुपेक्ष्योभयाभावनिवेश" तादृशोभयाभावप्रयोजकविरोधिविषयितावत्त्वं यद्रूपविशिष्टविषयकत्वव्यापकं तद्रूपावच्छिन्नत्वं दोषत्वमिरास्येवसम्यक्केप्ययासन्निवेशेन वै
यर्थ्यं" ननु कांचनमयः पर्वतो वन्हिमान्धूमादित्यादौ पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्ध्या विशिष्टपक्षे विशिष्टसाध्यादिवैशिष्ट्यावगाहित्वाप्रसिद्धेरित्यत आह" पक्षतावच्छेदके
12 त्यादि" आदिपदात्साध्यतावच्छेदकवैशिष्ट्यादिपरिग्रहः" वै[illegible]ति" तत्प्रकारेण ज्ञायमानत्वरूप[illegible]: तथा च पर्वतादेः कांचनमयत्वादिवैशिष्ट्यस्य वास्तविकस्याविरहेपि
तेन रूपेण ज्ञायमानत्वमादाय लक्षणसमन्वय" [illegible]ह्रदो न वन्हिमानित्यादिनिश्चयानंतरं जायमाने ह्रदो द्रव्यं जलमयं वन्हिमद्वन्हिव्याप्यधूमवच्चेत्याद्याकारकसमूहालंबने ह्रद
त्वादिना ज्ञायमाने द्रव्यत्वादिवैशिष्ट्यावगाहित्वसत्त्वादसंभव[illegible] पक्षतावच्छेदकावच्छिन्नायापक्षनिष्ठविशेष्यतातन्निरूपितायासाध्यतावच्छेदकावच्छिन्नाप्रकारता
या च साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितव्याप्यत्वप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नहेतुप्रकारतातत्प्रतियोगित्वयोरवगाहितां तद्रूपेन विवक्षणात्
विशिष्टविषयाप्रसिद्धावपि पर्वताद्यंशे कांचनमयत्वावगाहिभ्रमविषयितायाव्यधिकरणकांचनमयत्वाद्यवच्छिन्नायाः प्रसिद्ध्या लक्षणसमन्वयात्' व्याप्तिप्रकारतास्थाने च निर
रूप्यनिरूपकभावापन्नव्याप्तिघटकतत्तत्पदार्थप्रकारतानिवेशनीया तेन धूमवान्वन्हेरित्यादौ वन्हिव्यापकधूमसामानाधिकरण्यादिरूपव्याप्तेरप्रसिद्धावपि न क्षति" नन्वन्वयव्याप्ति
पदेनान्वयव्याप्तिश्चेदुच्यते तदा व्यतिरेकव्याप्तिज्ञानविरोधिनि साध्यनिष्ठाभावाप्रतियोगित्वादिरूपानुपसंहारित्वे व्याप्तितादृशज्ञानस्यान्वयव्याप्तिज्ञानाविरोधित्वात्' व्यतिरेकव्या
प्तिविवक्षणे च हेतुनिष्ठसाध्याभाववद्वृत्तित्वस्य साध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादावव्याप्तित्वज्ञानस्य ग्राह्याभावाद्यनवगाहितया व्यतिरे
कव्याप्तिज्ञानविरोधित्वे मानाभावादत आह" व्याप्तिश्चेति" अन्वयत: "अन्वयनिरूपिता प्रकृतहेतुनिष्ठा प्रकृतसाध्यनिरूपितेति [illegible]'सा चासंतान्योन्याभावभेदेन भिन्ना' अव्यभिचरि
तसामानाधिकरण्यव्यापकसामानाधिकरण्यरूपा नानाविधैव ग्राह्या' अतोऽत्यन्ताभावादिगर्भव्याप्तिज्ञानेऽन्योन्याभावादिगर्भव्यभिचारज्ञानस्य व्यापकताज्ञाने साध्याभाववद्वृत्ति
हेत्वादिज्ञानस्य च ग्राह्याभावानवगाहितया विरोधित्वेपि न क्षतिः" व्यतिरेकत:" व्यतिरेकनिरूपिता साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा" [illegible]" व्याप्तिपदेन विवक्षणीया
तथा च तद्व्याप्तिप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताप्रतियोगित्वकूटाभावस्य निवेशनीय[illegible]" ननु निर्वन्हिः पर्वतो वन्हिमानित्यादौ पक्षतावच्छेदकविशिष्टे राम
साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमेवाप्रसिद्धमिति कथं लक्षणसमन्वय इत्यत आह" तादृशावगाहित्वाप्रसिद्धेरिति" आहार्यज्ञानस्येति" निर्वन्हित्वविशिष्टवन्हिमत्त्वसं १२

न्त्यभावत्वादिरूपविशिष्टेऽतिव्याप्तिरिति यद्विषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यस्य विरोधिविषयिताप्रयुक्तो भयाभाववत्त्वं निवेशितं [illegible] यादृशविषयितासामान्यप्रयु-
क्तस्तादृशोभयाभावस्तत्त्वमित्येव सम्यक् ह्रदत्वादिविषयितासामान्यान्तर्गतायां ह्रदइत्यादिज्ञानीयविषयितायामुभयाभावप्रयोजकत्वासत्त्वादतिव्याप्तेरनवकाशादिति वाच्यं
पाषाणमयो न वह्निमानित्यादिज्ञानविशिष्टस्य पर्वतः पाषाणमय इत्यादिज्ञानस्य पर्वतो वह्निमानित्यादिज्ञानप्रतिबंधकतायां ज्ञानभेदेन विषयिताभेदस्याभावात् पाषाणम-
यत्वविशिष्टपर्वतादिविषयितासामान्यस्यैवोभयाभावप्रयोजकत्वात् पाषाणमयत्वविशिष्टपर्वतादावतिव्याप्तेर्दुर्वारत्वात् [illegible] ह्रदो वन्ह्यभाववानित्यादिह्रदादिविषयकनिश्चययोः
नरोत्पन्नघटाद्यनुमितौ विरोधिविषयिताप्रयुक्तोभयाभावसत्त्वात्केवलह्रदादावतिव्याप्तिरतः सामान्यपदं पूरितं तथा सति ह्रदादिनिश्चयानन्तरोत्पन्नानुमितिसामान्य-
न्तर्गतायां ह्रद इत्यादिनिश्चयानन्तरजातह्रदो वन्हिमान्वन्हिव्याप्यधूमवांश्चेत्याद्यनुमितौ विरोधिविषयिताप्रयुक्ततादृशोभयाभावासत्त्वान्नातिव्याप्तिः केवलह्रदत्वादि-
नावन्ह्यभावविशिष्टह्रदादिविषयकनिश्चयानन्तरमुक्तसमूहालंबनानुमित्युत्पत्त्या तादृशविशिष्टस्यापि दोषत्वानुपपत्तिरतो यत्पदं यद्धर्मावच्छिन्नपरतयोपवर्णितं वन्ह्यभा-
वविशिष्टह्रदादिविषयकस्य ह्रदो वन्हिमान्वेति ज्ञानस्यानन्तरं तादृशसमूहालंबनानुमित्युत्पत्त्या तद्दोषतादवस्थ्यमतो [illegible] अनाहार्याप्रामाण्यज्ञानानास्कंदितसंशया-
न्यज्ञानपरं तेनाहार्याप्रामाण्यज्ञानास्कंदितस्यापि दोषविषयकनिश्चयस्यानन्तरं तादृशानुमित्युत्पत्तावपि न क्षतिः दोषविषयकनिश्चयनाशे सति तदनुमितेरुत्पत्त्या तद्दोषाप-
त्तिरतोऽव्यवधाननिवेशः [illegible]वं दोषविषयकलौकिकनिश्चयाव्यवहितपूर्वमनुमित्युत्पत्त्यापि तद्दोषाः तं [illegible]ति" तत्सामानाधिकरण्यमप्यनुमितौ निवेश्यमतएकात्म्यबाधनिश्च-
यानन्तरमन्यस्यानुमित्युत्पत्तावपि न क्षतिः बाधादिनिश्चयानन्तरं पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नसाध्यादिप्रकारकस्याहार्यलौकिकस्य च प्रत्यक्षस्यो-
त्पत्त्या तादृशज्ञानसामान्यमुपेक्ष्यानुमितिसामान्यनिवेशः यत्साध्यकयत्पक्षकयद्धेतुकयादृशदोषविषयकनिश्चयानन्तरं कस्याप्यनुमितिर्न जाता तत्र तादृशानुमितेरप्र-
सिद्ध्याऽव्याप्तिरतोऽनुमितिस्थलेऽनाहार्यं दोषविशेषाजन्यज्ञानं निवेश्यं कल्पांतर [illegible] तथा च तादृशानुमित्यप्रसिद्धिर्यत्र तत्र तथाविधमानसोपनीतभानादिक-
मादायैव लक्षणं संगमनीयमिति भावः बाधादिनिश्चयानन्तरमाहार्यसाध्यादिप्रकारकप्रत्यक्षोत्पत्त्याऽसंभवोऽव्याप्तिर्वेत्यतो [illegible] शंखो न पीत इत्यादिनिश्चयानन्तरं शंखा-
दौ पीतत्वादिप्रकारकस्य दोषविशेषजन्यचाक्षुषादेरुत्पत्त्या शंखः पीतः शंखत्वादित्यादिस्थलीयबाधादावव्याप्तिरतो [illegible] पदं दोषविशेषाजन्यज्ञानपरं तेन नाहं गौर इत्या-
दिनिश्चयानन्तरं मिथ्याज्ञानजन्यवासनारूपदोषविशेषजन्यस्यात्मविशेष्यकगौरत्वादिप्रकारकमानसस्योत्पत्तावपि अहं गौर आत्मत्वादित्यादिस्थलीयबाधादौ नाव्याप्तिः ए-
[illegible] यादृशपक्षसाध्यहेतुकस्थले यद्दोषविषयकनिश्चयानन्तरं विरोधिसामग्र्यादिवशेन मानसज्ञानं कदापि न जातं तत्राव्याप्तिः [illegible] तत्राप्यनुमितिशाब्दबोधादिक

CC-0. In Public Domain. Digitization by eGangotri

५

नुत्पत्त्या घटाद्यनुमितयएव तादृशनिश्चयाव्यवहितोत्तरानुमितिसामान्यान्तर्गतास्तासु ह्रदत्वादिविशिष्टे वह्नित्वादिविशिष्टवैशिष्ट्यावगाहित्वं वह्नित्वाद्यवच्छिन्ननिरू
पितव्याप्तिविशिष्टधूमत्वावच्छिन्नवैशिष्ट्यावगाहित्वं च तदुभयाभाववत्वमक्षतमेव तत्र तादृशनिश्चयीयविरोधिविषयिताप्रयुक्तत्वमपि स्वनिष्ठप्रतिबंधकतावच्छेदकध
र्मस्य स्वानन्तरोत्पन्ननिष्ठप्रतिबध्यतावच्छेदकधर्माभावप्रयोजकत्वात् ह्रदत्वविशिष्टविशेष्यकत्वावच्छिन्नवह्नित्वविशिष्टप्रकारिताघटितधर्मावच्छिन्नप्रतिबध्यता
निरूपितप्रतिबंधकतावच्छेदकीभूता याह्रदत्वावच्छिन्नविशेष्यकत्वावच्छिन्नवह्नित्वावच्छिन्नाभावीयप्रकारिता यास्तादृशवह्नित्वावच्छिन्नप्रकारकत्वघटितोभ
याभावे तथात्वात् न च तादृशविशिष्टप्रकारकत्वमात्रं न विपरीतनिश्चयप्रतिबध्यतावच्छेदकमपि तु तद्विशेषितानाहार्यज्ञानत्वं तत्कथं तत्प्रकारकत्वाभावस्य तथावि
धविरोधिविषयिताप्रयुक्तत्वमिति वाच्यं विशिष्टाभावप्रयोजकस्य विशेष्यवन्निष्ठविशेषणाभावप्रयोजकत्वात् अनाहार्यज्ञानत्वाश्रयानुमित्यादिनिष्ठतादृशविशिष्टप्रका
रकत्वाभावस्य विरोधिविषयिताप्रयुक्तत्वाक्षतेरिति ह्रदो वह्निमान् धूमादित्यादौ वन्ह्यभावादिविशिष्टह्रदत्वावच्छिन्ने लक्षणसमन्वयः निर्वह्निः पर्वतो वह्निमानित्यादौ ता
दृशानुमितेरप्रसिद्धावपि वह्निमत्पर्वतादिरूपाश्रयासिद्ध्यादिविषयकनिश्चयानन्तरप्रसिद्धघटाद्यनुमितिषु अन्यत्र प्रसिद्धतावच्छेदकविशिष्टविषयकत्वावच्छिन्नसाध्यता
वच्छेदकविशिष्टप्रकारकत्वघटितोभयाभाववत्त्वमक्षतमेवेति लक्षणसमन्वयः न च नाहार्यज्ञानमात्रप्रसिद्धस्य निर्वह्निपर्वतत्वावच्छिन्नविशेष्यकवह्निप्रकारकज्ञानत्वस्य
विरोधिविषयकज्ञानप्रतिबध्यतानवच्छेदकतया तादृशधर्मावच्छिन्ने वन्ह्यादिप्रकारकत्वस्याभावे विरोधिविषयताप्रयुक्तत्वमप्रामाणिकमिति वाच्यं तादृशज्ञानत्वस्य
प्रतिबध्यतानवच्छेदकत्वेपि तद्व्यापकस्य पर्वतत्वावच्छिन्ने वन्हित्वावच्छिन्नाभावप्रकारकत्वस्यैव वह्निविशिष्टपर्वतविषयकज्ञानप्रतिबध्यतावच्छेदकतया व्याप
काभावप्रयोजकस्य तु तरां व्याप्याभावप्रयोजकतया तादृशविशिष्टविशेष्यकत्वावच्छिन्नवन्ह्यादिप्रकारकत्वाभावस्य तादृशदोषविषयताप्रयुक्तत्वस्यावश्यकत्वात् न
च विरोधिज्ञानासत्वेपि निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानस्याहार्यस्यानुत्पत्त्या इच्छाघटिततादृशाहार्यज्ञानसामग्र्यभावस्यैव निर्वह्नित्वविशिष्टे वह्निवैशिष्ट्यावगा
हित्वाभावप्रयोजकत्वं न तु विरोधिविषयित्वस्य क्वचिद्व्यभिचरितत्वादिति वाच्यं अभावाधिकरणतायामेव विषयिताप्रयुक्तत्वस्य निवेश्यतया अधिकरणतानां चाभावाभेदेप्यधि
करणभेदेन भिन्नतया विरोधिज्ञानानन्तरोत्पन्नज्ञाने तादृशवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विनिगमनाविरहेण पूर्वज्ञानीयविरोधिविषयिताया अपि प्रयोजक
त्वात् यद्विषयिताप्रयुक्ततादृशोभयाभावस्त्वमित्येतावन्मात्रे कृते ह्रदो वन्ह्यभाववानित्यादिज्ञानीयवन्ह्यभावविशिष्टह्रदविषयितायाः स्वतदन्तःपातिवन्ह्यभावत्वविशि
ष्टविषयिताया अपि प्रतिबंधकतावच्छेदककोटौ प्रविष्टतया प्रतिबध्यतावच्छेदकस्य ह्रदत्वादिविशिष्टे वन्ह्यादिवैशिष्ट्यावगाहित्वस्य विरहप्रयोजकतया बाधाद्येकदेशव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वन्हिव्यभिचारइत्यनेनान्वयः' अत्रातिव्याप्तिस्तादृशसमुदायदलस्यैवानिवेशेबोध्या' प्रकृतहेतुकत्वं निवेश्येप्येतद्दोषस्यशक्यवारणतयाहेतुतावच्छेदकनिवेशाय आह"
केवलधूमस्येति' वन्हिशून्यान्तरधूमव्यक्तिव्यावर्तकविशेषणानवच्छिन्नस्यार्थः" साध्यतावच्छेदकानिवेशे पूर्वसाध्यवत्ताज्ञानविरोधिन्यतिव्याप्तिं दर्शितादृदानीं व्यक्तिज्ञान
विरोधिन्यतिव्याप्तिं दर्शयति विशिष्टधूमस्य वा पर्वतीयवन्हिव्यभिचारइति दोषलक्षणइवदुष्टलक्षणेपि पक्षतावच्छेदकादिनिवेशस्य आवश्यकतां दर्शयति" नचात्तत्संबंधेने
ति' तत्र पर्वतत्वावच्छिन्नेवन्हित्वावच्छिन्नवन्हिसाधने तत्र विशिष्टधूमत्वावच्छिन्नस्य पक्षादौ पक्षतावच्छेदकादेर्यादृशसंबंधेनविशेषणत्वंयत्राभिमतंतत्रतत्संबंधेनतदव
च्छिन्नत्वं निवेश्यमितिसूचयितुं तत्तत्संबंधेनेत्युक्तं पक्षतावच्छेदकादिनिवेशेपक्षनिवेशस्याप्रयोजकत्वादिति। वाच्यमिति। तद्रूपावच्छिन्नपक्षसाध्यहेतुकदोषलक्षणेनिवे
शनीयं तथा चेति निर्वन्हिः पर्वतोवन्हिमानित्यत्र च पक्षतावच्छेदकनिर्वन्हित्वविशिष्टपर्वतेवन्हिवैशिष्ट्यावगाहित्वमनुमितेर्नसंभवति स्वविरोधिधर्मधर्मितावच्छेदकस्वप्र
कारकानाहार्यज्ञानस्यानभ्युपगमात् पर्वतः पर्वतावृत्तिवन्हिमानित्यत्र पर्वतावृत्तित्वरूपसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वानुमितेर्नसंभवति स्वस्मिन्स्वावृत्तित्वाव ९९
च्छिन्नप्रकारकानाहार्यज्ञानस्याननुभाविकत्वादिति पर्वतोवन्हिमान्वन्हिव्यभिचारिणइत्यत्र वन्हिव्यभिचारित्वरूपहेतुतावच्छेदकावच्छिन्नेवन्हिव्याप्यत्ववैशिष्ट्या
वगाहित्वमनुमितौ न संभवति पूर्वोक्तयुक्तेः पर्वतोवन्हिमान्पर्वतावृत्तेरित्यत्र पर्वते पर्वतावृत्तित्वरूपहेतुतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वं नानुमितेः संभवति
उक्तयुक्तेरिति यथाविवक्षितानुमित्यप्रसिद्धिप्रयोजकभेदेननानास्थलेऽव्याप्तिकथनेन न कोपि हेत्वाभासः स्यादिति तथा चापार्थकत्वरूपनिग्रहस्थानसत्वे न तथाप्रयोक्तु
र्निग्रहोपपत्तावपि निर्वन्हिपर्वतेवन्हेः साधने धूमो दुष्ट इत्यादिव्यवहारोदुरुपपाद इति भावः तादृशानुमितेः तथाविवक्षितानुमितेरप्रसिद्धत्वादिति आहार्यपरोक्षज्ञा
नानुगमादिति भावः यद्विषयकनिश्चयस्येति' यद्रूपावच्छिन्नविषयकनिश्चयस्यार्थः' तदुत्तरपदस्योत्तरकालीनार्थकतया तदुत्तरमिति धात्वर्थस्याप्यनुमितिरूपक्रियावि
शेषणमतो द्वितीया अग्रिमकल्पे च तादृशज्ञानरूपक्रियाविशेषणमतो ज्ञानपदमपि सार्थकं तत्पदं च तादृशनिश्चयपरामर्शकं उत्तरपदं चाव्यवहितोत्तरकालार्थकं कालाध्व
नोरत्यंतसंयोग इत्यनेन द्वितीयाधिकरणे उत्तरपदस्योत्तरकालपरत्वादिति अनुमुके" व्यापकत्वात्मकस्यात्यंतसंयोगस्य प्रकृतेऽविवक्षितत्वात्' अनुमितौ' अनुमितिसामा
न्ये द्वयोर्व्यतिरेक इति संबंधः' तत्वं तद्रूपावच्छिन्नत्वं अत्र च तज्ज्ञानानन्तरज्ञाननिष्ठतादृशोभयाभावे तज्ज्ञानीयायाएव विरोधिविषयितायाः प्रयोजकत्वाद्विरोधिविषयितायां ता
दृशनिश्चयीयत्वकथनं स्वरूपकीर्तनमात्रं न तु लक्षणघटकं तथा च यद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यस्यविरोधिविषयिताप्रयुक्तोभयाभावव
त्वं तादृशरूपावच्छिन्नत्वं दोषत्वमिति समुदितार्थः' वन्ह्यभावविशिष्टह्रदत्वावच्छिन्नविषयकनिश्चयानंतरं ह्रदो वन्हिमान्वन्हिव्याप्यधूमवांश्चेत्याकारकानुमितेः कदाप्य

जा॰सा॰ नादिविशेषणकसाध्याभाववद्वृत्तित्वादिविशेष्यकज्ञानस्य व्याप्त्यादिज्ञान
१० प्रतिबंधकत्वेपि साध्याभाववद्वृत्तित्वादेराधेयतासंबंधेन साधनीयत्वादिकं न दोषः साधनादेः साध्याभाववद्वृत्तित्वादिधर्मिताविरहात् अन्याप्यवच्छेदकत्वं पूर्ववत् न स्वरू
पसंबंधविशेषः पक्षतावच्छेदकावच्छिन्ननिष्ठकेवलाभावत्वावच्छिन्नादावतिप्रसंगात् तदवच्छिन्नधर्मिकतदवच्छिन्नवत्ताज्ञानत्वस्यापि प्रतिबंधकतावच्छेदककोटौ प्र
10 विष्टत्वात् अवच्छेदकतापर्याप्तिविवक्षणे च ह्रदत्वावच्छिन्ननिष्ठवन्ह्यभावत्वावच्छिन्नवत्त्वेऽव्याप्तिः वन्हित्वादिनाघटाद्यवगाहिनोपि ह्रदो नवन्हिमानित्यादिनिश्चय
स्य ह्रदो वन्हिमानित्याद्यनुमितिप्रतिबंधकतया ह्रदत्वावच्छिन्नविशेष्यकवास्तववन्ह्यभावत्वावच्छिन्नप्रकारकनिश्चयत्वेन न प्रतिबंधकता अपितु ह्रदविशेष्यकवन्हित्वा
वच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिश्चयत्वेनैव अवच्छेद पर्याप्त्यधिकरणं ह्रदत्वावच्छिन्नधर्मिकवन्ह्यभावत्वावच्छिन्नप्रका
रकनिश्चयत्वमिति यद्रूपपदेन वन्ह्यभावत्वाद्युपादाने न संभवतीति पर्वतो वन्ह्यभाववानित्यादौ पर्वतत्वावच्छिन्ननिष्ठवन्हित्वावच्छिन्नवत्त्वस्य बाधादेः संग्रहभयेन यद्रूपा
वच्छिन्ने धर्मिणि यद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपावच्छिन्नप्रकारताकनिश्चयत्वेन प्रतिबंधकता तद्रूपविशिष्टे तद्रूपावच्छिन्नविशेषिततद्रूपावच्छिन्नवत्त्वं दोष इति वि
वक्षायां असंभव अत्र साधननिष्ठसाध्याभाववद्वृत्तित्वादेरपि साध्याभाववद्वृत्तिसाधनादेरपि दोषत्वक्षतिविरहात् एतावानायासोऽनर्थक इत्यस्वरसः कश्चिदित्यनेन सूचि
तः यथाव्याख्याने यथाश्रुतार्थे निर्वन्हिः पर्वतो वन्हिमानित्यादौ प्रकृतपक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितेरप्रसिध्या व्या
प्तिदर्शयिष्यते तत्र विशेष्यपक्षतावच्छेदकाद्यप्रवेशे नाप्रसिद्धिः तत्तन्निवेशप्रयोजनमाह पर्वतादेः काञ्चनमयत्वविरहदशायां दौ सर्वत्र न दोष इति संबध्यते न चाप्र पक्ष
तावच्छेदकाप्रवेशे पूर्वोक्तयुक्त्यासंभववारणाय यत्किंचिद्धर्मावच्छिन्नपक्षसाध्यकानुमितिसामान्यप्रतिबंधकत्वमेव निवेश्यमिति पर्वतो वन्हिमानित्यादौ पर्वतनिष्ठकाञ्चन
मयत्वाभावादावतिप्रसंगस्तस्यापि काञ्चनमयत्वादिसद्धितपर्वतत्वादिरूपयत्किंचिद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिसामान्यप्रतिबंधकज्ञानविषयत्वादिति भावः आ
दिपदं वस्त्वंतरसंग्रहकं प्रकृतानुमित्यविषयपदार्थाभावेऽतिव्याप्तिं सूचयित्वा तद्विषयसाध्याद्यभावे तां सूचयति ह्रदस्येति ह्रदनिष्ठवन्हिशून्यत्वं धूमशून्यत्वं चेत्यर्थः ह्रदनिष्ठ
साध्याभावेऽतिव्याप्तिसूचनं च प्रकृतपक्षतावच्छेदकावच्छिन्नप्रकृतपक्षकत्वरूपसमुदायदलस्यैवानिवेशे बोध्यं । महानसीयेति महानसीयवन्ह्यभावो महानसीयधूमाभा राम
वश्चेत्यर्थः। अत्रातिव्याप्तिसूचनं प्रकृतसाध्यतावच्छेदकप्रकृतहेतुतावच्छेदकयोरप्रवेशे बोध्यं ह्रदमुपलक्षणं साध्यहेतोरनिवेशेपि जलत्वाभावादावतिव्याप्तिर्बोध्या प्र १०
कृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वानिवेशे पक्षधर्मताज्ञानप्रतिबंधकतामादायातिव्याप्तिं सूचयित्वा व्याप्तिज्ञानप्रतिबंधकतामादायातिव्याप्तिं सूचयति । यत्वस्येति ॥

CC-0. In Public Domain. Digitization by eGangotri

आदिपदात्साध्यतावच्छेदकादिपरिग्रहः पर्वतादिधर्मिककांचनमयत्वादिविशिष्टबुद्धौ पर्वतः कांचनमयत्वाभाववानित्यादिधर्मिविशेष्यकनिश्चयस्येव पर्वते कांचनमयत्व-
न्नास्तीत्यादिधर्मिविशेषणकनिश्चयस्यापि विरोधित्वमानुभाविकम् तस्य तद्विषयस्यापि दोषत्वमाह पक्षनिष्ठत्वेति आधेयतासंबंधेन पक्षविशिष्टद्वयम् वाकारः समुच्चये
साधनवद्वृत्तिसाध्याभाववद्वृत्ति साधनधर्मिकसाध्याभाववद्वृत्तित्वप्रकारकज्ञानं साधनधर्मिकव्याप्तिज्ञाने प्रतिबंधकं साधनवति साध्याभाववद् इति ज्ञानेपि साधने साध्याभा-
ववद्वृत्तित्वं तुल्यवित्तिवेद्यतयानियतो भासत इत्यभिप्रायेण साधनवन्निष्ठसाध्याभाववद्वृत्तितादृशज्ञानस्यासमानविशेष्यकस्य मणिमंत्रादिन्यायेन स्वातंत्र्येण प्रतिबंधकत्व-
मिति प्राचीनमताभिप्रायेण दोषइति ननु पक्षतावच्छेदकाभाववत्पक्षकत्वादिरिति शेषः तथा चालक्ष्यत्वान्न तत्राव्याप्तिरिति भावः ननु पक्षतावच्छेदकाभाववत्पक्षादी-
नां हेत्ववृत्तित्वात्कथं हेतौ दुष्टताव्यवहार इत्यत आह येनकेनापीति एकज्ञानविषयत्वादिनेत्यादिस्तद्वान् तदवच्छिन्नो दुष्टो दुष्टपदप्रतिपाद्यः तथा च हेतोस्तादृशदोषा-
नधिकरणत्वे न क्षतिः दुष्ट इत्यादौ सामान्यतः संबंधिन एव निष्ठार्थत्वात् एवं च एकज्ञानविषयत्वादिना वन्ह्यभाववद्ध्रदादिरूपदोषस्य धूमादौ सत्वेन पर्वतादौ च वन्ह्यादि-
साधने तस्य दुष्टत्वव्यवहारापत्तिर्विषयतायास्तद्रूपावच्छिन्नपक्षसाध्यहेतुवाचकपदसमभिव्याहारस्थले दुष्टपदस्य तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधक-
तावच्छेदकस्वावच्छिन्ननिरूपितविषयताकधर्मावच्छिन्नसंबंधिबोधकत्वव्युत्पत्त्यापूर्वव्यवहारेणापि पूर्वं ह्रदे वन्हिना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारोऽनिरुक्त-
दोषमात्रस्य दुष्टताव्यवहारविषयतावच्छेदकत्वे दुर्वार इति प्रकृतहेतुतावच्छेदकविशिष्टसंबंधो निष्ठार्थतावच्छेदको वाच्यः एतदभिप्रायेणैव प्रकृतहेतुरित्युक्तं इदं व-
न्हिसाधने धूमो दुष्ट इत्यत्र ह्रदत्वावच्छिन्नपक्षकवन्हित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयिताकधर्मावच्छि-
न्नसंबंधी धूम इत्यन्वयबोधः तत्र प्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयकधर्मविशिष्ट एव दुष्टधात्वर्थः साधनपदं लक्षणया धूमत्वावच्छिन्नहेतुकानुमितिपरं तत्र ह्रद इति सप्तम्यन्ता-
र्थह्रदत्वावच्छिन्नपक्षकत्वं वन्हेरिति षष्ठ्यर्थस्य वन्हित्वावच्छिन्नसाध्यकत्वस्य चान्वयः तादृशानुमित्यन्वितसप्तम्यर्थनिरूपितत्वस्य दुष्टधात्वर्थैकदेशप्रतिबंधकत्वे
न्वयः एवं च पर्वते वन्हेः साधने धूमो दुष्ट इत्यत्र पर्वतत्वावच्छिन्नपक्षकवन्हित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंधकतावच्छेदकस्वावच्छिन्ननि-
रूपितविषयताकधर्मविशिष्टसंबंधी धूम इत्येव प्रतीयते तादृशधर्मश्चाप्रसिद्ध एवेति न तथा व्यवहारः पक्षविशेष्यादिकमनन्तर्भाव्य धूमो दुष्ट इत्यादिव्यवहारस्तु इष्यत एवे-
ति दिक् साधनात् इष्टसाध्याभाववद्वृत्तित्वादेरेव व्यभिचारतया प्रसिद्धेर्न तु तद्विशिष्टसाधनादेरतो न तस्य दोषत्वमिति कश्चित्तदाह व्याचष्टे परिलक्षणमन्यथैवान्यथातिप्रसंगात्
तादृशव्याख्यामुपन्यस्यति यादृशेति यद्रूपावच्छिन्नार्थकं ज्ञानं ज्ञानत्वावच्छिन्नस्यार्थकं तस्य धर्मिणः तद्रूपावच्छिन्नस्य तेन संबंधेनेति शेषः तादृशधर्मवत्त्वं साध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ - नविशेषणीयमतयोऽन्नबाधाव्याप्तेरपरिहार्यत्वात् तु॰ १

गो॰सा॰ या अघटकत्वात् प्रतिबंधकतायांविशिष्टांतरविषयकत्वानवच्छिन्नत्वविशेषणदानस्यासंभवेनयत्पदार्थस्यतादृशपदार्थांतराघटितत्वमेवयत्पदार्थेविशेषणंदेयं अन
१ न्नैवं स्वसजातीयविशिष्टान्तराघटितत्वमेवयत्पदार्थेविशेषणंदेयं साजात्यं च हेत्वाभासविभाजकरूपेण तच्च रूपं बाधत्वव्यभिचारत्वादि तेन रूपेण व्यभिचारत्वादेर्न
बाधादिसाजात्यमितिव्यभिचारघटितबाधादौनाव्याप्तिः नचैवं यद्विषयकनिश्चयस्य विरोधिविषयिताप्रयुक्तोभयाभावस्तत्त्वमित्यत्रविरोधिविषयिताप्रयुक्तत्वदलस्य
वैयर्थ्यं घटादेस्तादृशधर्मेण सजातीयत्वाप्रसिद्धेर्वानातिप्रसंगादिति वाच्यं स्वसजातीयविशिष्टान्तराघटितं यद्यत्त्वं तद्विषयकप्रतीतिविषयत्वस्य विवक्षणेन अनुयो
गिनिस्वत्वानन्तर्भावेण पदार्थान्तरेऽतिप्रसंगवारकतया तद्दलसार्थक्यात् नच व्यभिचारविशिष्टमेयत्वादेर्हेत्वाभासत्वविरहाद्धेत्वाभासविभाजकरूपेणसजातीयाप्रसि
द्ध्यातस्यस्वपदेनोपादातुमशक्यत्वात् मेयत्वविशिष्टव्यभिचारत्वादिकमेव स्वपदेनोपादेयम् तस्य शुद्धव्यभिचाराद्यभिन्नतया व्यभिचारत्वादिरूपहेत्वाभासविभाजक
रूपेण तत्सजातीयप्रसिद्धेरिति तद्विषयकप्रतीतिविषयत्वस्य व्यभिचारविशिष्टमेयत्वादौ सत्वात्तत्रातिप्रसंग इति वाच्यं विशिष्टान्तराघटितत्वेनापटितस्य साध्यसा
धनग्रहाविरोधिज्ञाननिष्ठविषयितासंबंधेनव्याप्तिग्रहप्रतिबंधकतानतिरिक्तवृत्तित्वादिरूपस्य व्यभिचारादिविभाजकस्यात्रनिवेशात् तादृशरूपस्य व्यभिचारविशिष्टमे
यत्वादिसाधारणत्वादित्याहुस्तन्न व्यभिचारघटितबाधादावपि विशिष्टान्तराघटितत्वाघटितव्यभिचारत्वादिसत्वेन तद्घटकव्यभिचारादेर्व्यभिचारत्वादिना तत्सजातीय
त्वात् तत्र ग्रहानुपपत्तेः नच स्ववृत्तियावद्धेत्वाभासविभाजकरूपेणसाजात्यं विवक्षणीयं तथाच बाधादिघटकव्यभिचारादेर्बाधत्वाद्यसत्त्वान्नतत्रतादृशबाधादिसजा
तीयत्वमतस्तत्संग्रहसंभव इति वाच्यं एवं सति बाधविशिष्टव्यभिचारादौ स्ववृत्तिबाधत्वव्यभिचारत्वादियावद्धर्मैः सजातीयविशिष्टान्तरस्य व्यभिचारविशिष्टबाधादेः प्र
सिद्धावपि तद्घटितत्वासंभवेनातिव्याप्तेस्तस्याद्व्यभिचारादिघटितबाधादेः संग्रहप्रकारोऽग्रेदर्शनीय एव वा[illegible]रणीयः "मेयत्वविशिष्टव्यभिचारादौ" तादृशव्यभिचारत्वा
द्यवच्छिन्ने नातिप्रसंगः 'नदोषत्वप्रसंगः' अत्र मेयत्वविशिष्टव्यभिचारोदोषइत्यादिव्यवहाराभावान्नेष्टापत्तिः संभवति नच विशिष्टव्यभिचारादेः शुद्धव्यभिचारत्वादि
नादोषत्वस्यापत्ततया उक्तविशेषणदानेपि तादृशव्यवहारापत्तिर्दुर्वारैवेति तत्रेष्टापत्तौ च व्यर्थविशेषणमिति वाच्यं दोषपदस्य निरुक्तविशेषणावच्छिन्नानुमितिप्रति
बंधकतावच्छेदकत्वावच्छिन्ननिरूपिताकत्वेनान्वयितावच्छेदकधर्मबोधकतायाव्युत्पन्नतया प्रकृते प्रमेयत्वादिविशिष्टव्यभिचारत्वादिरूपस्यान्वयितावच्छे
दकस्योक्तविशेषणविरहेणानतिप्रसंगादिति हृदयं नन्वाश्रयासिद्ध्यादिस्थले पक्षतावच्छेदकाभाववत् पक्षत्वादिकमेव दोषः तस्यैव हेतुनिष्ठतया हेतौ दुष्टत्वव्यवहारनि
र्वाहकत्वात् तादृशधर्मस्य च तादृशाभाववत् पक्षादिरूपतादृशविशिष्टान्तराघटिततयाऽव्याप्तिरित्यत आह । एवं चेति तादृशविशेषणदानेनचेत्यर्थः पक्षतावच्छेदकादिति । राम १

आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याऽनवच्छेदकत्वेन बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्नविषयितापा एव तथाविधसामान्यावच्छेदकत्वं तस्यास्तादृशविशिष्टनिरूपितत्वस्यावश्यकत्वात् प्रथमकल्पे
स्वपदेन चरमकल्पे च यत्पदेन तस्योपादानसंभवात् अथ वन्ह्यभावादिधर्मितावच्छेदकवन्ह्यादिप्रकारकबुद्धेरिव धूमव्यभिचारविशिष्टवन्ह्यादिधर्मितावच्छेदके धूमव्याप्य
तया वन्ह्यादिप्रकारकग्रहस्यानाहार्यस्यासंभवेन तादृशपक्षतावच्छेदकावच्छिन्नपक्षकसमूहालंबनानुमितेरप्रसिद्ध्या तादृशप्रतिबंधकताघटितयथाश्रुतलक्षणस्य
तद्रूपावच्छिन्नपक्षकवन्ह्यादिहेतुकदोषाव्याप्तिः स्वयमेव वक्ष्यते इति तदुद्धारणाय यासौ कृथ्यति चेत् भवतु तावदेवं तथापि विशेषगुणावच्छिन्नो घटो गुणसामान्याभा
वद्द्रव्यत्वादौ दर्शितसमूहालंबनानुमितिप्रसिद्ध्या विशेषगुणवद्घटादिरूपाश्रयासिद्धेर्गुणवद्घटादिरूपबाधघटितायाः संग्रह आवश्यकः यदि च तत्र घटत्वावच्छे
देन गुणवत्त्वमेव बाध आश्रयासिद्धिस्तु घटत्वसामानाधिकरण्येन घटत्वावच्छेदेन वा विशेषगुणवत्त्वं वस्तु च गुणत्वरूपसामान्यधर्मावच्छिन्ने घटत्वव्यापकता
घटितोक्तबाधस्य न प्रवेशः विशेषवत्त्वेन घटत्वव्यापकतायास्तत्र प्रवेशेऽपि सामान्यरूपेण व्यापकतायास्तदन्तर्भावादिति न तादृशासिद्ध्यसंग्रह इत्युच्यते तदा
विशेषगुणाभाववान् द्वितीयक्षणावच्छिन्नो घटो गुणसामान्याभाववानित्यादौ द्वितीयादिक्षणावच्छिन्ने घटे विशेषगुणवत्त्वरूपाश्रयासिद्धौ तदवच्छिन्ने घटे गुणवत्त्वरूपबा
धप्रवेशावश्यकत्वाद्यथाश्रुतलक्षणे च तत्संग्रहस्यावश्यकतया उक्तविशेषणदानानुपपत्तिः वस्तुतस्तु अत्र वन्हीत्यादिनिष्कृष्टकल्पेऽपि प्रमेयत्वविशिष्टव्यभिचारादि
वारणाय विशिष्टान्तराघटितत्वस्य निवेशनीयतया तन्मते दर्शितबाधसंग्रहो दोष[illegible]न स्वावच्छिन्ननिरूपितविषयित्वावच्छिन्नयत्किंचित्प्रतिबंधकतावच्छेदकविष
यिताकविशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्त्वं समुदितलक्षणार्थः मेयत्वविशिष्टव्यभिचारत्वादिकं नैतादृशं स्वतदवच्छिन्नविषयक
त्वावच्छिन्नप्रतिबंधकतावच्छेदकविषयताकशुद्धव्यभिचारादिविषयितात्वस्य तदवच्छिन्ननिरूपितत्वाव्याप्यत्वात् उक्तस्थले विशेषगुणविशिष्टघटादिरूपाश्रया
सिद्ध्यादिविषयकत्वावच्छिन्नविशिष्टपक्षग्रहादिनिरूपितयत्किंचित्प्रतिबंधकतावच्छेदकविषयिताकविशिष्टनिरूपितविषयितात्वस्य तादृशाश्रयासिद्ध्यादिनिरूपित
त्वव्याप्यत्वात्तत्र लक्षणसमन्वयः प्रतिबंधकतायां यावत्त्वानिवेशान्नोक्तरीत्या बाधविशिष्टव्यभिचारादावतिप्रसंगः स्वावच्छिन्नानिरूपितविशिष्टविषयितानवच्छिन्नप्रति
बंधकतावच्छेदकस्वावच्छिन्नविषयिताको यो धर्मस्तद्वत्त्वं समुदितलक्षणार्थः प्रमेयत्वविशिष्टव्यभिचारत्वादिकं नैतादृशं स्वं तदवच्छिन्नानिरूपितशुद्धव्यभिचारत्वाद्य
या वच्छिन्नविषयित्वावच्छिन्नायामेव प्रतिबंधकतायां तदवच्छिन्नविषयिताऽनवच्छेदकत्वात् उक्तस्थले चाश्रयासिद्धिविषयिकत्वस्य तदनिरूपितबाधविषयितानवच्छि
न्नाया विशिष्टपक्षग्रहप्रतिबंधकतातदवच्छेदकत्वाल्लक्षणसमन्वय इति परास्तं यद्विषयकनिश्चयस्य विरोधिविषयिताप्रयुक्त इत्यादिनिष्कृष्टकल्पेऽनुमितिप्रतिबंधकता

जा·सा· तद्विषयकत्वनिवेश एवोचितः एवं च निष्कृष्टवक्ष्यमाणकल्पे यद्विषयकनिश्चयस्येत्यत्र निश्चय एव तन्निवेश्यं लाघवादित्यवधेयम् ॥ अथ धूमव्यभिचारिवह्निमान्धूमवान्वह्ने
८ रित्यादौ बाधादेर्व्यभिचारादिघटिततया तत्राव्याप्तिः न च यद्रूपावच्छिन्नविषयकत्वं स्वावच्छिन्नविषयतावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकं तादृशरूपान्तराघटि क २
तत्वस्य विवक्षितत्वान्न दोषः व्यभिचारस्योक्तबाधविषयकत्वान्यूनवृत्तिव्याप्तिज्ञानप्रतिबंधकतावच्छेदकविषयताकत्वेपि तादृशप्रतिबंधकतासामान्यान्तर्गततानुमिति
४ प्रतिबंधकतावच्छेदकविषयताकत्वविरहात्तद्घटितत्वस्याकिंचित्करत्वादिति वाच्यं व्यभिचारत्वादिरूपस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छे
दकविषयतानिरूपकतावच्छेदकस्य तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाप्रसिद्ध्यासंभवात् मेयत्वविशिष्टव्यभिचारत्वादेरेव तथाविधविषयतानिरूपकतावच्छे
दकत्वात्तस्य व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावात् न च स्वावच्छिन्नविषयत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविषयतानिरूपकता
वच्छेदकः कश्चित्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य एवंभूतं यद्धर्मत्वं मेयत्वविशिष्टव्यभिचारत्वादितदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य वि
वक्षणीयतया न दोष इति वाच्यं तथा सति धूमव्यभिचारिवह्निमान् धूमवान्वह्नेरित्यादौ बाधत्वाद्यवच्छिन्नघटकतावच्छेदकस्य धूमव्यभिचारिवह्निमत्वादेः स्वावच्छिन्नावि
षयकप्रतीतिविषयतावच्छेदकीभूतस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविषयतानिरूपकतावच्छेदकव्यभिचारत्वकत्वादव्याप्तेर्दुर्वारत्वात् न
च स्वावच्छिन्नविषयितावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतयत्किंचिद्विषयत्वं यादृशयादृशधर्मावच्छिन्नानिरूपितं तादृशतादृशधर्मावच्छिन्नाविषयकप्रतीति
विषयतावच्छेदकं यत्स्वं तद्रूपावच्छिन्नत्वमेव समुदितलक्षणार्थः मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतायाः शु
द्धव्यभिचारत्वाद्यवच्छिन्ननिरूपितविषयितायां मेयत्वविशिष्टव्यभिचारत्वाद्यवच्छिन्नानिरूपितत्वेन स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य स्वस्मिन्नस
त्वेन मेयत्वविशिष्टव्यभिचारत्वादेः स्वपदेनोपादातुमशक्यत्वात् व्यभिचारत्वादिविशिष्टानिरूपितत्वासंभवात् व्यभिचारत्वादिविशिष्टविषयकत्वावच्छिन्नप्रतिबंधक
तासामान्यावच्छेदिकायाः कस्या अपि विषयताया व्यभिचारत्वादिविशिष्टानिरूपितत्वासंभवात् तादृशविषयतायां यादृशधर्मविशिष्टानिरूपितत्वं घटत्वमेयत्व विशिष्टव्य
भिचारत्वादेरेव तादृशत्वात् तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकतया व्यभिचारत्वादेः स्वपदेनोपादातुं शक्यत्वाच्च न कश्चिद्दोषः अथवा यद्धर्मावच्छिन्नविष
यत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतविषयितात्वं यद्धर्मावच्छिन्ननिरूपितत्वव्याप्यं तद्धर्मवत्त्वमेव समुदितार्थ इति वाच्यं बाधविशिष्टव्यभिचारत्वाद्यवच्छि राम·
न्नेति प्रसंगात् तादृशधर्मावच्छिन्नविषयकत्वावच्छिन्नबाधज्ञानप्रतिबंधकतायां केवलव्यभिचारविषयिता यास्ति तादृशव्यभिचारज्ञानप्रतिबंधकतायां च केवलबाधविषयिता ८

CC-0. In Public Domain. Digitization by eGangotri

ष्टद्वयाघटितत्वस्यैव निवेशनीयत्वात् नच पक्षवृत्तित्वविशेषितप्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यादिरूपं वाच्यं पक्षवृत्तित्वाद्यघटितविशिष्टविष-
यिताया अप्रतिबंधकज्ञानसाधारणतया प्रतिबंधकतानवच्छेदकत्वात् तादृशस्य चासाधारण्यादेः पक्षवृत्तित्वविशिष्टप्रकृतहेतुसाध्यव्यापकीभूताभावप्रतियोगित्वविशिष्ट
प्रकृतहेतुरूपनिरुक्तविशिष्टद्वयघटिततया निरुक्तविशिष्टद्वयाघटितत्वनिवेशोपि न संभवतीति वाच्यं पक्षवृत्तित्वाद्यघटितविशिष्टस्यैवासाधारणरूपताया विरोधोपि फल
तः प्रतिरोध एव तदन्यत्वेन वा विरोधि विशेषणीयमिति पंक्तिव्याख्यानावसरे संपादनीयत्वात् नन्वतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेपि व्यभिचारादिघटितपदार्थांतरे
ऽतिव्याप्तिः तद्विषयकत्वस्यापि प्रतिबंधकतानतिरिक्तवृत्तित्वादत आह विशेषणीयं चेति तादृशलक्षणमिति शेषः तादृशविशिष्टेति अनुमितिप्रतिबंधकताया यद्रूपाव
च्छिन्नविषयकत्वमवच्छेदकं तद्रूपावच्छिन्ने स्वार्थः व्यभिचारत्वाद्यवच्छिन्नस्य व्यभिचारत्वादिरूपतादृशरूपावच्छिन्नघटितत्वात्संभव इत्यतोंतरेति स्वावच्छिन्नाविषय
कप्रतीतिविषयतावच्छेदकावच्छिन्नार्थकमतः शुद्धव्यभिचारादेर्मेयत्वविशिष्टव्यभिचाराभिन्नत्वेपि न क्षतिः तदघटितत्वं च तदविषयकप्रतीतिविषयकत्वं च एवं च
नुमितिप्रतिबंधकताया यादृशरूपावच्छिन्नविषयकत्वमवच्छेदकतादृशं यत्स्वावच्छिन्नाविषयकप्रतीतिविषय तावच्छेदकं तद्रूपावच्छिन्नाविषयकप्रतीतिविषयता
वच्छेदकं यत्स्वं तदवच्छिन्नत्वं समुदितार्थः यद्रूपावच्छिन्ने लक्षणं गमनीयं तदेव स्वार्थः भवति हि व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूताये वा
धात्वादयस्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं व्यभिचारत्वादीति तदवच्छिन्ने लक्षणसमन्वयः प्रमेयत्वविशिष्टव्यभिचारत्वादेः स्वावच्छिन्नाविषयकप्र-
तीतिविषयतावच्छेदकव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयकतावच्छेदकत्वाभावान्न तदवच्छिन्नेऽतिव्याप्तिः प्रमेयत्वविशिष्टव्यभिचारादेरपि मेयत्वादिना
व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयत्वान्न दोषः स्यादतस्तादृशरूपाश्रयधर्मिणां तदवच्छिन्नाविषयकप्रतीतिविषयत्वेनानिवेश्य स्वमेव तादृशविषयता-
वच्छेदकत्वेन विशेषितं मेयत्वविशिष्टव्यभिचारत्वाश्रयाविषयकत्वस्य व्यभिचारत्वाद्यवच्छिन्नविषयकप्रतीतेर्दुर्घटत्वान्न दोषोऽतः स्वाश्रयाविषयकत्वमुपेक्ष्य स्वाव
च्छिन्नाविषयकत्वनिवेशः स्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वस्य तादृशधर्मविशेषणत्वे व्यभिचारत्वादेरपि प्रमेयत्वादिना व्यभिचारत्वाद्यवच्छिन्नाविषय
कप्रतीतिविषये व्यभिचारादौ वर्तमानत्वादसंभव इत्यतस्तादृशविषयतावच्छेदकत्वेन धर्मो विशेषितः प्रमेयं गगनवद्वाच्यत्वादित्यादौ व्यभिचारत्वाद्यवच्छिन्नावि
षयकप्रतीतिविषयतावच्छेदकं गगनाभाववत्मेयत्वादि तदाश्रयाविषयकप्रतीत्यप्रसिद्ध्या व्यभिचारादौ तादृशप्रतीतिविषयकत्वस्य दुरुपपादतयाऽव्याप्तिरतस्तदव
च्छिन्नाविषयकत्वनिवेशः अत्र विशिष्टांतराविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोषतावच्छेदकधर्मे विशेषणत्वापेक्षया ज्ञानस्येत्यत्र ज्ञानपदार्थे तादृशविशिष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰सा॰ वच्छेदकविषयिताकपाषाणमयत्वादिविशिष्टपक्षाद्यावत्तिव्याप्तेः अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशमते तादृशविशिष्टविषयितायाः पाषाणमयत्वाद्यवच्छेदेनवन्ह्यभा
७ ववत्तानिश्चयाविशिष्टज्ञानसाधारणतयाअनुमितिप्रतिबंधकतातिरिक्तवृत्तित्वेनातिप्रसंगानवकाशात् नचानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेपिजलाद्यवच्छेदेनवन्ह्य
भाववत्ताघटितस्यवन्ह्यभाववज्जलादिमद्वृत्तिजलादिविशिष्टस्यह्रदादिरूपपक्षस्यजलवान्वन्ह्यभाववानित्यादिज्ञानसहितस्यजलवांश्चह्रद इत्यादिज्ञानस्यतादृशज्ञान
४ विशिष्टतादृशज्ञानत्वेनैवप्रतिबंधकतयातादृशप्रतिबंधकताशून्यज्ञानाविषयस्यसत्प्रतिपक्षाद्यनात्मकस्यवारणायज्ञानवैशिष्ट्यानवच्छिन्नत्वस्यप्रतिबंधकतायाम
वश्यंनिवेशनीयतयामन्मतेपितन्नातिप्रसंगइतिवाच्यं ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्यप्रतिबंधकताविशेषणत्वेप्रतिहेतुव्यापकसाध्याभावसमानाधिकरणतद्धेतुमत्पक्ष
रूपसत्प्रतिपक्षाः व्याप्तिः साध्याभावांशेतद्व्यापकताग्रहविशिष्टतद्धेतुज्ञानत्वेनस्वतंत्रसाध्याभावधर्मिकतद्व्यापकताग्रहविशिष्ट तद्धेतुज्ञानसाधारण्यानुरोधेनाव
श्यकत्वप्रतिबंधकतयैवोपपत्तेः तादृशविशिष्टज्ञानस्यज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतान्तरे मानाभावादुक्तविशिष्टेऽतिप्रसंगस्तुविवक्षणीयविशिष्टान्तराघटि
तत्वविशेषणेनैववारणीयः नचज्ञानद्वयसाधारण्यप्रतिबंधकतायाः प्रत्येकज्ञानविषयविशिष्टविषयकत्वंनानतिरिक्तवृत्तित्वरूपावच्छेदकत्ववत् तथाचदर्शितविशिष्ट
घटकस्यप्रत्येकज्ञानविषयस्यननिरुक्तविशिष्टात्मकतेतिनिरुक्तविशिष्टान्तराघटितत्वमुक्तविशिष्टस्यास्त्वतमेवेतिवाच्यंवक्ष्यमाणविशिष्टान्तराघटितत्वस्यैवयादृश
विशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वंप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयाघटितत्वेपिविवक्षणीयतयाउक्तविशिष्टवारणसंभवात् न
चैवमुक्तसत्प्रतिपक्षाव्याप्तिस्तस्यप्रतिहेतुव्यापकताविशिष्टसाध्याभावप्रतिहेतुविशिष्टपक्षात्मकनिरुक्तविशिष्टद्वयघटितत्वादितिवाच्यं सत्प्रतिपक्षघटकतादृशविशिष्टद्वयवि
षयताभिन्ननिरुक्तविशिष्टद्वयविषयिताशून्यप्रतीतिविषयत्वस्यविशिष्टद्वयाघटितार्थकत्वात् यत्रसत्पक्षाप्रसिद्धिस्तत्रभिन्नांतमनुपादेयमेवसाध्यादिभेदेनलक्षणभेदात् प्र
मात्मकज्ञानीयविषयितासाधारणरूपेणैववाप्रतिहेतुव्यापकताविशिष्टसाध्याभावादिविषयितोपादेया नचदर्शितेविशिष्टस्यसत्प्रतिपक्षरूपतानस्वीक्रियते अपितुहेतुताव
च्छेदकाघटितसाध्याभावाभाववद्वृत्तिमत्पक्षात्मकविशिष्टस्यैवव्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्पक्षस्यैवोक्तरीत्यासंग्रहेहेतुधर्म्मव्यापकसाध्याभावका
लीनतद्रूपविशिष्टपक्षादिव्यावृत्तिरप्यशक्यास्यादित्यविशेषेणव्यापकताघटितविशिष्टमात्रस्यालक्ष्यतायाएवयुक्तत्वात् तथाचोक्तप्रयासमुपेक्ष्यज्ञानवैशिष्ट्यानवच्छिन्नप्रति
बंधकतानिवेशनमेवोचितमितिवाच्यमेवमपिप्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वघटितस्यमतभेदेनासाधारण्यविरोधरूपस्यविषयितायाः पक्षधर्मिकप्रकृत राम
हेतुमत्ताज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतायामेवावच्छेदकत्वात् प्रतिबंधकतायांज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशासंभवात् दर्शितातिप्रसंगवारणायचनिरुक्तविशि ७

CC-0. In Public Domain. Digitization by eGangotri

त्वंच नोक्तज्ञानस्येतिन दोषइत्यपि न सत् । तथा सति ह्रदो जलाभाववानित्यादिस्थलीयबाधादेर्दुःसंग्रहत्वात् जातित्वादिना ह्रदत्वादिरूपधर्मितावच्छेदकावगाहिनो जाति
मान् जातिमानित्यादिज्ञानस्य जातित्वाद्यवच्छिन्नह्रदत्वादिनिष्ठधर्मितावच्छेदकतारूपविषयताया निरुक्तविषयताभिन्नत्वविरहेण तादृशज्ञानस्यानुमित्यप्रतिबंधकस्य
शून्यत्वान्तेनावारणात् मैवं यद्रूपावच्छिन्नविषयतात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयताशून्यत्वस्य ज्ञानवि
शेषणतया सामंजस्यात् अप्रतिबंधकज्ञानविषयतावच्छेदकजातित्वादिविशेषितह्रदत्वादिघटितनत्तद्रूपावच्छिन्नाविषयतात्वावच्छिन्नाभावस्य दोषात्मकविशिष्टविष
यतासमानाधिकरणत्वात् तज्ज्ञानव्यावृत्तिरिति निष्कर्षः विशिष्टस्य विशिष्टविषयत्वस्य सत्वेपि वन्ह्यभावत्वादिनाघटाद्यवगाहिनि भ्रमे सत्वेपि तथाविशिष्टविषयकं
त्वेन प्रतिबंधकता — न संभवतीति भावः भ्रमाप्रतिबंधेपि तादृशभ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेपि नक्षतिः नोक्तयुक्त्या पर्याप्तिनिवेशोऽसंभवः तदनिवेशे पूर्वातिप्रसंगो वा
ननु विशिष्टदोषघटकीभूततदेकदेशविषयतायाः स्वरूपसंबंधरूपावच्छेदकत्वसत्वेपि विशिष्टविषयितासामान्यस्य तादृशावच्छेदकत्वस्य विवक्षयाऽतिप्रसंगवारणसंभ
वात् तदेव कथं न विवक्षितमिति नच सामान्यपदस्य व्यापकत्वार्थकतया प्रतिबंधकतावच्छेदकतायां विशिष्टविषयतात्वव्यापकत्वं प्रवेश्यं तदपेक्षया प्रतिबंधकतायां विशिष्टवि
षयताव्यापकत्वनिवेशनमेवोचितमिति वाच्यं यतो वन्ह्यभावविशिष्टह्रदादिनिरूपितविषयिताया अनुमित्यप्रतिबंधकसंशयाहार्याप्रामाण्यज्ञानानास्कंदितज्ञानसाधारणतया
नुमितिप्रतिबंधकतायास्तद्व्यापकत्वमित्यनाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकत्वं प्रतिबंधकतायां भवता विवक्षणीयं त
दपेक्षया लाघवेन स्वरूपसंबंधरूपावच्छेदकतायां बाधादिदोषविशिष्टविषयितात्वव्यापकत्वमेव विवक्षितुमुचितं तथा सति निश्चयत्वाद्यनिवेशात् समानाकारज्ञानेषु विषयि
ताभेदस्याप्रामाणिकतया संशयादिज्ञानीयविषयता अपि निश्चयत्वादिविशिष्टीयतया प्रतिबंधकतावच्छेदकतया प्रतिबंधकतावच्छेदकतायां बाधादिरूपदोषनिरूपितविष
यितात्वव्यापकताया अक्षतत्वात् नच वन्ह्यभाववान् ह्रदो वह्निमानित्याहार्यज्ञानीयवन्ह्यभावविशिष्टह्रदादिविषयिताना नाहार्यज्ञानसाधारणी तादृशाहार्यज्ञानसमानाका
रकानाहार्यज्ञानाप्रसिद्धेः ह्रदो वन्ह्यभाववानित्याद्यनाहार्यज्ञानीयवन्ह्यभावविशिष्टह्रदादिविषयिताया वन्ह्यादिप्रकारतानिरूपिततादृशाहार्यज्ञानीयविशिष्टह्रदादिवि
षयिताभिन्नत्वात् तथा चानाहार्यज्ञानवृत्तित्वविशिष्टविषयिताया एव प्रतिबंधकतावच्छेदकतया न दर्शिताहार्यज्ञानीयविषयितासाधारणविशिष्टविषयितात्वव्यापकत्वमि
ति वाच्यं एवं सत्यनाहार्यज्ञानीयविशिष्टविषयितात्वव्यापकता एव विवक्षणीयत्वात्तावतापि संशयान्यत्वाप्रामाण्यज्ञानानास्कंदितत्वयोरप्रवेशेन लाघवानपायात् मैवं
स्वरूपसंबंधरूपावच्छेदकत्वप्रवेशे पाषाणमयत्वाद्यवच्छेदेन वन्ह्यभाववत्तानिश्चयविशिष्टस्य पाषाणमयत्वविशिष्टपक्षादेर्ज्ञानस्य वन्ह्याद्यनुमितिप्रतिबंधकतया तद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰ सा॰ ६ दिविषयकज्ञाने वन्ह्यभाववविशिष्टह्रदत्वावच्छिन्नविलक्षणविषयतानिरूपकत्वस्यासत्वेनोक्तासंभवानवकाशात् तथा च केवलवन्ह्यभावत्वाद्यवच्छिन्नविषयकत्वस्य प्र
तिबंधकतातिरिक्तवृत्तित्वान्नातिप्रसंग इत्यर्थः ननु स्वरूपसंबंधरूपावच्छेदकत्वनिवेशे यथेवातिप्रसंगो दुर्वारः अप्रमाण्यज्ञानाभावादिविशिष्टयद्रूपावच्छिन्नविषयक
निश्चयत्वं प्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणमित्येतादृशविवक्षया तादृशातिप्रसंगवारणे पुनरसंभवः वन्ह्यभावत्वादिना घटाद्यवगाहिनो वन्ह्यभाववान् ह्रद
6 इत्यादिज्ञानस्यापि प्रतिबंधकतया तत्साधारण्यानुरोधेन वन्हित्वाद्यवच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वाद्यवच्छिन्नविशेष्यताकनिश्चय
त्वेनैव प्रतिबंधक तायां वक्तव्यतया वन्ह्यभाववविशिष्टह्रदत्वावच्छिन्नविषयतायाः तादृशप्रकारतानिरूपितह्रदत्वावच्छिन्नविषयतात्वेनावच्छे
दकत्वेपि अप्रमाण्यज्ञानाभावादिविशिष्टवन्ह्यभाववविशिष्टह्रदत्वावच्छिन्नविषयताकनिश्चयत्वस्यावच्छेदकतापर्याप्त्यनधिकरणत्वादतः तृतीयायां अनतिरिक्तवृत्ति
त्वरूपावच्छेदकत्वं स्फुटयति अवच्छेदकत्वं चेति इह लक्षणे घटकत्वसमन्वयश्च नच विशिष्टविषयकत्वस्याप्रतिबंधकसंशयादौ सत्वात् पुनरसंभव इति वाच्यं ज्ञानस्य
यत्र ज्ञानपदमनाहार्याप्रमाण्यज्ञानानास्कंदितनिश्चयपरं चकार्थ आधेयत्वं तस्य यद्विषयकत्वेऽन्वयः एवं च तादृशनिश्चयवृत्तित्वविशिष्टयादृशविशिष्टविषयकत्वमनुमिति
प्रतिबंधकतानतिरिक्तवृत्ति तादृशत्वस्य विवक्षणीयतया संभवानवकाशात् अनतिरिक्तवृत्तित्वं च स्वव्यापकत्वं स्वं नतु तच्छून्यावृत्तित्वं विशिष्टस्य विशेष्यीभूतविशिष्ट
विषयकत्वानतिरिक्ततया तस्यातिप्रशक्तत्वे विशिष्टेतस्मिन्ननतिप्रशक्तत्वस्य दुर्घटकत्वात् यत्तु प्रतिबंधकताशून्यतादृशनिश्चयावृत्तित्वमेवानतिरिक्तवृत्तित्वमतो नोक्त
रीत्याऽसंभव इति तन्न तथा सति मूलोपात्तस्य ज्ञानस्यैतस्य वैयर्थ्यप्रसंगात् ह्रदत्वाद्यवच्छिन्नविषयकयत्किंचित् ज्ञानीयविषयतानिरूपकत्वस्य प्रतिबंधकता
शून्यतादृशनिश्चयावृत्तित्वेन मुद्ह्रदत्वाद्यवच्छिन्नेऽतिप्रसंगाच्च अस्मन्मतेऽनुमितिप्रतिबंधकतायास्तादृशनिश्चयवृत्तित्वविशिष्टह्रदत्वाद्यवच्छिन्नविषयकत्वाद्यव
च्छिन्नव्यापकताविरहेणातिप्रसंगानवकाशात् अथैवमपि जातित्वादिना ह्रदत्वादिविषयकस्य जातिमान्वन्ह्यभाववा नित्यादिज्ञानस्यापि वन्ह्यभाववविशिष्टह्रदत्वावच्छि
न्नविषयकतया तस्य ह्रदो वन्हिमानित्याद्यनुमित्यविरोधितयाऽसंभवः जलवान्वन्हिमानित्यादिस्थलीयदोषासंग्रहेणाविशेषितधर्मावच्छिन्नपक्षादिस्थलीयस्यापि किंचिद्वि
शिष्टत्वघटितदोषासंग्रहेण च पक्षतावच्छेदकाद्यंशेऽन्याप्रकारकत्वनिवेशस्याशक्यत्वात् तादृशविशिष्टाघटकपदार्थाविषयकत्वस्य ज्ञानविशेषणत्वे सर्वमाकाशवदित्यादि
स्थलीयबाधादौ तद्घटकाऽप्रसिद्ध्याऽव्याप्तिः यद्यद्रूपावच्छिन्नस्य यस्य यस्य यादृशविशिष्टघटकता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयताभिन्नकिंचिदवच्छिन्नविषयताशू राम
न्यत्वं ज्ञाने निवेश्यं जातित्वाद्यवच्छिन्नस्य ह्रदत्वादेर्नैव वन्ह्यभाववद्ह्रदत्वावच्छिन्नात्मकदोषघटकतेति जातित्वाद्यवच्छिन्नह्रदत्वादिविषयतातादृशविषयताभिन्नैवेतच्छून्य ६

CC-0. In Public Domain. Digitization by eGangotri

क्वचिद्धेतावित्ति. उत्पत्तिकालीनो घटो गन्धवानिति पृथिवीत्वादित्यनुमाने उत्पत्तिकालीनो घटो गन्धाभाववानिति वा भ्रमान्न प्रतिबन्धकत्वेन य

व्यत्वमेवविवक्षणीयं ह्रदो वह्निमान् धूमादित्यादौ तादृशांशरूपं ह्रदविशिष्टवन्ह्यभावत्वादिकं ह्रदे वह्निर्नास्त्यादिज्ञाननिरूपिततद्रूपावच्छिन्नविषयतासामान्यस्यैव ह्रदत्वा
वच्छिन्नविषयतानिरूपितवन्ह्यभावत्वाद्यवच्छिन्नविषयतात्वेन दोषनिष्ठानुमितिप्रतिबंधकतायामवच्छेदकत्वात् सद्धेतुस्थले च न केवलवन्ह्यभावत्वादिकं तथा
तदवच्छिन्नविषयतासामान्यान्तर्गतधर्म्मविषयकज्ञाननिरूपिततादृशविषयतानामनुमितिप्रतिबंधकतानवच्छेदकत्वात् पर्वतविशिष्टवन्ह्यभावत्वादिविशिष्टं च न कि
चिदुक्तप्रसिद्धमिति नातिप्रसंगः तृतीयमपि लक्षणमनयैव रीत्या परिस्करणीयमितीदं बोध्यं पक्षस्य दुष्टहेतुलक्षणत्वे ज्ञायमानदोषप्रतिबंधकतामतानाश्रयणेपि यद्रूपावच्छि
न्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकप्रमाविषयतद्धेतुतावच्छेदकवत्त्वं तद्रूपावच्छिन्नपक्षसाध्यस्थले तेनैव रूपेण दुष्टत्वमित्यर्थकतामुपगम्य यथार्थपदसार्थक्यं
मुपपादयितुं शक्यते, ननु द्वितीयतृतीयलक्षणयोर्दोषेष्वतिव्याप्तिरव्याप्तिश्च क्वचिद्धेतौ पत्यदेन दोषस्यैवोपादेयतया तत्त्वस्य तन्मात्रवृत्तित्वादत आह तत्त्वमित्यस्येति
प्रथममात्रस्य दुष्टहेतुलक्षणत्वेनोपपत्तौ चरमयोर्दोषलक्षणत्वमेवोचितं तत्त्वमित्यस्य यथाश्रुतार्थकत्वादनुरोधादतस्तथैवाहाद्यस्यैवेति ईदृशव्याख्यायानिर्दोषत्वा
त्साह इत्युक्तं लिंगज्ञानस्येति लिंगांशनिवेशस्य निष्प्रयोजनकतया तस्याविवक्षितत्वमाह। लिंगमिति यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽवच्छेदकत्वं तच्चेदमनतिरि
क्तवृत्तित्वरूपमिदानीं निवेश्यते तदासंभवः विशिष्टस्यानतिरिक्ततया वन्ह्यभावविशिष्टह्रदादिदोषविषयकत्वस्य शुद्धह्रदत्वावच्छिन्नविषयकज्ञानेपि सत्त्वेनानुमिति
प्रतिबंधकतातिरिक्तवृत्तित्वादतः स्वरूपसंबंधरूपमेव तद्वाच्यं तथा च पर्वतो वन्हिमानित्याद्यनुमितिप्रतिबंधकभ्रमविषयवन्ह्यभावादावतिव्याप्तिस्तद्विषयकत्वस्या
पि प्रतिबंधकतावच्छेदकत्वात् असंभवभयेन चावच्छेदकतापर्य्याप्तिनिवेशनासंभवात् अतो यद्विषयकत्वेनेति पदं व्याचष्टे यादृशविशिष्टविषयकत्वेनेति या
दृशविशिष्टविषयकत्वेन यद्रूपावच्छिन्नविषयताकत्वेन एवं च तत्त्वमित्यस्य तद्रूपावच्छिन्नत्वमर्थः। व्याख्याप्रयोजनं प्रकाशयति तेनेति यत्प्रकारकत्वेन प्रतिबंधकत्वमि
त्युक्तौ पक्षविशेषणकभ्रममादाय वन्ह्यभावादौ नातिप्रसंगसंभवः। पर्वतादावतिप्रसंगसंभवेपि यत्संबंधावच्छिन्नयन्निष्ठप्रकारकत्वेनानुमितिप्रतिबंधकत्वं तेन संबंधेन त
द्वत्त्वस्य दुष्टताव्यवहारनियामकत्वोपगमे पर्वतविशेषणकवन्ह्यभावज्ञानस्य विशेषणताविशेषसंबंधावच्छिन्नाधेयतासंसर्गावच्छिन्नपर्वतादिनिष्ठप्रकारताकत्वेन प्र
तिबंधकत्वात् तेन संबंधेन पर्वतादिमत्तायाः पर्वतमहानसान्यतरत्वादिरूपसद्धेतौ सत्त्वेपि प्रसिद्धधूमादिरूपहेतावसत्त्वात् तत्र दुष्टताव्यवहारापत्तेरयोगादिति तदनुरोधे
न पक्षविशेष्यकेत्युक्तं भ्रमपदं निश्चयसामान्यपरं तेन सद्धेत्वादौ सादिपदयात्वसाध्यशून्यपक्षकदुष्टहेतौ अनुमितिप्रतिबंधकप्रमाविषये साध्याभावादावेव सत्त्वेपि ना
संगतिः नातिप्रसंग इति उक्तव्याख्यानेऽनतिरिक्तवृत्तित्वरूपमेवावच्छेदकत्वं विवक्षणीयं विशेषणीभूतवन्ह्यभावाद्यविषयके शुद्धह्रदत्वादिना वन्ह्यभावविशिष्टह्रदा

६ ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गा·सा· त्वमर्थंव्याख्यास्यति तच्च ज्ञायमानदोषस्य प्रतिबंधकतामतएवसंगच्छते॥ तस्तन्मतमवालंब्यैवाह तत्रेति तेषुलक्षणेषुमध्ये इत्यर्थः। इतीयलक्षणस्य सर्वमतएवज्ञायमान
५ दोषप्रतिबंधकतामताभिप्रायकत्वमाह यथेति तत्वेनोपन्यासः तदर्थश्चेति दोषानाद्यलक्षणसंगमनीयमितिदर्शयितुं व्यभिचारादयइति ननु तेन रूपेण लक्षणघटकत्वमि
त्यवधेयमेवच यथार्थपदादानेदुष्टत्वभ्रममादायप्रकृतहेतुभिन्नेऽतिप्रसंगइति यथार्थपदसार्थक्यं यद्यपिपर्वतत्वावच्छिन्नेवन्हित्वावच्छिन्नसाधनेधूमत्वाद्यवच्छिन्नोदु
ष्टइत्यादेः सद्धेतौदुष्टत्वव्यवहारस्यनापत्तिस्तत्रतत्तत्साध्यपक्षहेतुकानुमितिप्रतिबंधकदोषप्रकारकज्ञानविषयत्वस्यैवप्रत्येतव्यत्वात्तादृशानुमितिप्रतिबंधकबाधव्यभिचारा
5 देश्चाप्रसिद्धत्वात् ह्रदादौवन्ह्यादिसाधनमादायसर्वत्रैवदुष्टत्वव्यवहारइष्टस्तथापिधूमसाधनेवन्हित्वेनायंदुष्टइत्यादौवन्हित्वाद्यवच्छिन्नहेतुकधूमत्वावच्छिन्नसाध्यकानु
मितिप्रतिबंधकदोषप्रकारकज्ञानविषयत्वंप्रत्ययात् वक्ष्यमाणसंबंधावच्छिन्नतादृशानुमितिप्रतिबंधकधूमाभाववद्वृत्तित्वविशिष्टवन्ह्यादिरूपप्रसिद्धदोषप्रकारताशालिभ्रम
मादायरासभादितात्पर्येणापितथाव्यवहारः स्यात् न च तत्रविशेष्येतृतीयान्तार्थवन्हित्ववैशिष्ट्यलाभात् रासभाद्यशेतद्बाधेनायमतिप्रसंगइतिवाच्यं तथासतिदोषपदार्थ न
घटकानुमितौवन्हित्वावच्छिन्नहेतुकत्वालाभात्तल्लाभानुरोधेनहेतुप्रकारकज्ञानजन्यानुमितिप्रतिबंधकरूपदोषपदार्थघटकहेतौवन्हित्ववैशिष्ट्यरूपस्यतृतीयान्तार्थस्यत
त्प्रकारतायां[illegible]वच्छिन्नत्वार्थतृतीयान्तलभ्यवन्हित्वाद्यवच्छिन्नत्वस्यान्वयइत्यस्यैवोपगंतव्यत्वात् न च विशेष्येवन्हित्वादिधर्मबोधसमभिव्याहारस्थलेदोषार्थकधातोरे वैशिष्ट्य/
ववन्हित्वावच्छिन्नहेतुकानुमितिप्रतिबंधकोऽर्थः अथवाऽनुमित्यर्थकसाधनशब्दस्यैववन्हित्वावच्छिन्नहेतुकानुमितिरूपविशेषेलाक्षणिकत्वं धात्वर्थेऽनुमित्यन्तर्भावेसाध
नपदार्थानन्वयप्रसंगात् तथाचविशेष्यएवतृतीयान्तार्थवैशिष्ट्यान्वयोपगमान्नोक्तातिप्रसंगइतिवाच्यमेवमपिवन्हिनाधूमसाधनेरासभोदुष्टइत्यादिभ्रममादायातिप्रस
ङ्गादिति यथार्थपदसार्थक्यमथवादूतरभेदानुमापकमेवेदंलक्षणंतथाचपर्वतपक्षकधूमसाध्यकवन्हिहेतुकदुष्टलक्षणस्यतथाविधानुमितिविरोधिव्यभिचारादिभ्रममादाय
सद्धेतौइतरभेदव्यभिचारात् यथार्थपदंज्ञानंचात्रस्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसंबंधावगाहित्यर्थं तेनप्रकृतहेतुभिन्नस्यसंबंधान्तरेणदोषप्रमाविषयत्वेपिना
तिप्रसंगः अग्रेपीदृशसंबंधेनैवतद्वत्त्ववाच्यं अथज्ञायमानपक्षनिष्ठसाध्याभाववत्त्वादिनाबाधादिदोषाणांप्रतिबंधकतानसंभवतिसाध्याभाववत्त्वादिनापदार्थान्तरस्यैवयत्र
ज्ञानंतत्रदोषाणामज्ञायमानतयाअविरोधित्वेनानुमित्यापत्तेः किंतुज्ञानीयपक्षतावच्छेदकाद्यवच्छिन्नविषयतानिरूपितसाध्याभाववत्त्वाद्यवच्छिन्नविषयतावत्त्वेनतादृश
विषयतयाज्ञानविशिष्टत्वेनवातत्त्वरूपंतादृशभ्रमविषयपदार्थान्तरसाधारणमेवेतितेषामेवतादृशभ्रमदशायांविरोधित्वानोक्तापत्तिः एवंचसद्धेतूनामपिप्रतिबंधकताव राम·
च्छेदकनिरुक्तविषयताश्रयवन्ह्यभावादिप्रमाविशेष्यत्वादितिव्याप्तिरितिचेन्न यद्रूपावच्छिन्नविषयतासामान्यंप्रतिबंधकतावच्छेदकंतद्रूपविशिष्टप्रकारकप्रमाविशे ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ = विशेषणताविशिष्टान्यप्रकारताशालिज्ञानत्वं सर्वांशे प्रमात्वं वैशिष्ट्यं च · स्वनिरूपितत्व · स्वाधिकरणनिरूपितत्वाभेतावच्छेदकसंबंधेन प्रतितावच्चे स्वहितत्व
स्वावच्छेदकसंबंधावच्छिन्नत्व · स्वानवच्छेदकानवच्छिन्नत्व · तादृश संबंधेन · सवर्णसंबंधेन · हित

तत्वसंबंधेन प्रकृत्यर्थस्यान्वयः मत्वर्थीयार्थः स्वरूपसंबंधवान् तस्याभेदेन प्रथमान्तार्थेऽन्वयः द्वितीये तत्पदार्थपरवाक्यस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्थोन्वित
प्रथमार्थनिरूपितत्वस्यान्वयः षष्ठीप्रकृतेस्तद्धर्मपरतया षष्ठ्यंतार्थस्य साध्यतावच्छेदकनिष्ठत्वस्य तादृशान्वयबललभ्ये हेतुसमानाधिकरणाभावप्रतियोगितावच्छेद
कत्वे तस्य च तद्धितार्थसंबंधिन एकदेशे घटकत्वरूपसंबंधे संबंधिनश्चाभेदेन प्रथमान्तार्थेऽन्वयः एवं चोक्तवाक्यात्तत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्र
तियोगितावच्छेदकत्वस्यापि लाभात्तत्र तदवगाहिभ्रमस्य दर्शितकारतासंभवादित्यपि वदंति भ्रमादिति पंचम्यर्थः प्रयुक्तत्वं तस्य प्रतिबंधपदार्थेऽनुत्पादेऽन्वयः यथा
र्थेति यथार्थपदेन स्वव्यधिकरणप्रकारावच्छिन्नायाया विषयतातत्तद्निरूपकत्वरूपस्य सर्वांशे प्रमात्वस्य विवक्षणीयतया दर्शितभ्रमाणां किंचिदंशे प्रमात्वेपि न तन्मात्रा ना(
यदोष इति भावः अन्यथा यथार्थपदेन सद्धेतुस्थलेऽनुमितिविरोधिभ्रमविषयसाध्याभाववाद्यावतिप्रसंगवारणेपि असद्धेतुस्थले तादृशप्रमाविषयदोषघटकसाध्यादेः प्रत्ये
कं दोषत्वापत्तिर्दुर्वारैवेति तदर्थप्रकारांतरानुसरणे च तत एव पूर्वदोषस्यापि वारणसंभवे यथार्थपदं व्यर्थमिति दोषस्य दुरुद्धरतया तस्यैव यथार्थपदाघटितलक्षणान्तरानु
सरणे बीजत्वमाहुः नन्विति एकदेशस्यापि विशिष्टघटकतया हेत्वाभासपदार्थत्वस्येष्टत्वादाह प्रत्येकमिति प्रत्येकपदार्थपर्याप्तसाध्यतावच्छेदकाद्यवच्छिन्नस्येत्यर्थः हे
त्वाभासत्वापत्तिः हेत्वाभासपदार्थत्वापत्तिः यद्रूपावच्छिन्नज्ञानस्यानुमित्यविरोधित्वं तद्रूपावच्छिन्ने हेत्वाभासव्यवहारस्य तद्रूपावच्छिन्नमात्रज्ञानाद्धेतौ दुष्टत्वव्यव
चा हारस्यानुदयेनेष्टापत्तिर्न संभवतीति भावः यादृशविशिष्टविषयकत्वं तादृशानुमितिविरोधितानतिरिक्तवृत्ति तत्वमिति विवक्षया साध्यादौ नातिव्याप्तिरित्याशयेनाशंक
ते अथेति विशिष्टविषयकं साध्याभाववद्वृत्तित्वविशिष्टसाधनादिविषयकमेव तद्घटकं च तादृशविशिष्टघटकप्रत्येकपदार्थविषयकत्वं च न विशिष्टं न तादृशविशिष्टनि
रूपितं तथा च प्रत्येकपदार्थविषयकत्वस्य प्रतिबंधकताया अतिरिक्तवृत्तित्वान्नातिव्याप्तिरिति भावः अयमिति यथार्थपदानुपादानेपि सद्धेतुस्थलेऽतिव्याप्तिवा
रणसंभवात् ननु तत्र भ्रमविषयप्रत्येकपदार्थस्योक्तरीत्यावारणेऽपि तद्विषयविशिष्टेतिव्याप्तिरत आह। भ्रमविषयेति अप्रसिद्धत्वादिति तथा च नातिव्याप्तिरिति भावः
केचित्त्विति नन्वस्य दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः तेषामप्यनुमितिविरोधियथार्थज्ञानविषयत्वात् न च ह्रदादिपक्षकवन्ह्यादिसाधकस्थले वन्ह्यभाववद्ध्रदादि
रूपदोषाणामपि दुष्टहेतुत्वमिष्टमेवेति वाच्यं तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकस्थले तेन रूपेण दुष्टस्य लक्षणं यदि तद्रूपावच्छिन्नपक्षसा
ध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रं तदा ह्रदत्वावच्छिन्नपक्षकवन्हित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंधकप्रमाविषयवन्ह्यभाववद्ध्रदा
दीनां धूमत्वादिना दुष्टत्वाभावादतिव्याप्तिरित्याशंकापरिजिहीर्षुस्तादृशाभावप्रतियोगिनां ज्ञानमिति षष्ठीसमासमादत्ते तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषये

यथार्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰सा॰ भावव्यतिरेकेणानुमितिव्यतिरेकस्यासिद्धत्वादितिभावः व्याप्तिज्ञानादेर्व्यभिचारज्ञानाभावेनान्यथासिद्धत्वशंकाप्रागेवनिराकृतानस्माभिर्व्यभिचारादाव्याप्तिः प्रत्यासद्दे अनाप्त्या॰
२५४ तुविशेषेताहृशानुमितेरप्रसिद्धिस्तत्रदोषेष्वव्याप्तेर्वक्ष्यमाणतयाएतादृशयथाश्रुतव्याख्यायामनिर्भरस्तच्चनायवदंतीत्युक्तंपर्वतोवन्हिमान्धूमादित्यादिसद्धेतुस्थलेवाधा
दिभ्रमविषयेऽतिव्याप्तिवारणाययथार्थपदंसार्थकमिति पर्वतोनिर्वन्हिरिति अत्रेति पदस्यनितयस्थलेसंबंधाद्भ्रमत्वपलाभः प्रत्येकभ्रममादायातिप्रसंगसंभवाच्चाहृशस
४ मूहालंबनभ्रमपर्यन्तानुधावनेवैफल्यादितिध्येयं प्रथमभ्रमोनुमितौविरोधीअंशेचतज्जनकज्ञानेतथात्वयोरपिप्रथमेन्यत्रप्रसिद्धस्यसाध्याभाववद्वृत्तित्वस्यधूमादंशे
भ्रमत्वंअंत्येचप्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिद्ध्यानतद्भ्रमत्वंकिंत्वभावांशेअनुयोगिताविशेषसंबंधेनसाध्यस्यभ्रमत्वमित्येताहृशविशेषमादृत्यद्वितीयव्युत्पादनायानेकवि
धभ्रमकथनं इदंत्ववधेयं अभिधेयत्वप्रमेयत्वव्यभिचारीत्यत्रस्वरूपसंबंधावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनप्रमेयत्वभ्रमोवाच्यः प्रतियोगितांशेसा
ध्यतावच्छेदकधर्मावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयोःसाध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतयातदंशेतदुभयावगाहि व्यभिचारज्ञानस्यैवव्याप्तिज्ञा
नविरोधित्वात् एवंचमेयादौप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वप्रसिद्धावपिस्वरूपसंबंधावच्छिन्नताहृशप्रतियोगिकत्वाप्रसिद्ध्याताहृशभ्रमानुपपत्तिःप्रतियोगितांशे
संबंधविशेषाद्यवच्छिन्नत्वस्यभ्रमद्वयेपिनयुक्ततस्यसंबंधघटकतयातत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्तिः नच तेन संबंधेनप्रतियोगिताप्रकारकएवात्रभ्रमोविवक्षितः रूपेण।८
नतुतदवच्छिन्नप्रतियोगिताकत्वसंसर्गकइतिवाच्यंलाघवात् प्रतियोगितासंसर्गकज्ञानस्यैवानुमितिहेतुतयातत्प्रकारकज्ञानस्याकिंचित्करत्वादित्याहुः स्वावच्छिन्न व्यभिचार।८
साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यतावच्छेदकवत्त्वमेवाभावस्यसाध्याभाववद्वृत्तित्वघटकंलाघवात् एवंचताहृशसंबंधेनाभावांशेसा
ध्यतावच्छेदकप्रकारकव्यभिचारज्ञानस्यव्याप्तिग्रहविरोधितयाघटत्वादेःप्रसिद्धेनताहृशसंबंधेन मेयत्वत्वादेरभावांशेभ्रमात्मकएवतथाविधग्रहोविवक्षितइतिकिंचि
न्नानुपपन्नं अन्येतुप्रथमेसाध्याभाववद्वृत्तित्वज्ञानविरोधीहेतौसाध्याभाववद्वृत्तित्वरूपव्यभिचारस्यभ्रमः द्वितीयेचतदप्रसिद्ध्याव्यापकसामानाधिकरण्यग्रहविरो
धीसाध्यतावच्छेदकेहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यभ्रमोभिहितः असमानप्रकारकज्ञानस्याविरोधितयाद्विविधव्यभिचारसंग्रहायद्विविधव्या
प्तिविषयकसमूहालंबनज्ञानस्यैवलक्षणेप्रवेश्यत्वात् नचहेतुःसाध्यस्यव्यभिचारीत्यतःसाध्यतावच्छेदकेहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यदु
र्लभतयातदवगाहिज्ञानस्याभिधेयत्वप्रमेयत्वव्यभिचारीत्याकारकत्वानोपपद्यतइतिवाच्यं यतोऽभाववद्वृत्तित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वंद्वये राम॰
मेवहेतुःसाध्यस्यव्यभिचारीत्यत्रव्यभिचारपदार्थः तत्रादिमव्यभिचारपदार्थैकदेशेऽभावेऽनुयोगितारूपषष्ठ्यर्थस्यतत्रप्रकृत्यर्थतावच्छेदकवन्हित्वावच्छिन्ननिरूपि ४

निस्याकारकत्तयाताटृशाकारलेखनस्वरसात्ताटृशहेतुविशिष्टपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्यत्वस्यल
क्षणघटकत्वोपगमेपर्वतत्वाद्यवच्छेदेनवन्हेःसाध्यत्वेतत्समानाधिकरण्येनसाध्याभावादेरदोषत्वप्रसंगःसामानाधिकरण्यमात्रावगाहिबाधादिज्ञानस्यशुद्धपर्वतत्वावच्छे
देनवन्ह्यादिज्ञानंप्रत्येवप्रतिबंधकतयाधूमविशिष्टपर्वतत्वावच्छिन्नधर्मिकवन्ह्यादिज्ञानाप्रतिबंधकत्वादितितदुपेक्षितं नच विशेष्यतावच्छेदककोटौधूमादेरधिकस्यभा
नेपिशुद्धपर्वतत्वावच्छिन्नसंयोगसंबंधादेर्यत्रसंसर्गतातत्रपर्वतत्वसामानाधिकरण्येनवन्ह्यभावादिज्ञानस्यप्रतिबंधकत्वमावश्यकंताटृशानुमितेरपिशुद्धपर्वतत्वावच्छेदेन
वन्ह्याद्य वगाहित्वादितिवाच्यं धर्मितावच्छेदकावच्छेदेनविशिष्टबुद्धौधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमेवसंसर्गांशेभासतेनतुतदेकदेशावच्छिन्नत्व
मपितद्धर्मावच्छिन्नविशेष्यतानिरूपिततदेकदेशव्यापकत्वावच्छिन्नसंसर्गतायाः अप्रामाणिकत्वात् अथलिंगोपधानमतेहेतोःसर्वत्रैवधर्मितावच्छेदकतयाभानात्ताटृश
संसर्गताभ्युपगमआवश्यकः अन्यथाशुद्धपर्वतत्वावच्छेदेनहेतुमत्वज्ञानस्थलेहेतुविशिष्टपर्वतत्वावच्छिन्नसंसर्गकानुमितेरेवाभ्युपगमेपर्वतत्वादिसामानाधिकर
ण्यमात्रावगाहिबाधादिग्रहकालेपितथाविधसाध्यनिश्चयवतोऽनुमित्यापत्तिः नहिसामानाधिकरण्येनबाधसिद्ध्योःसत्वोरनुमितिं कश्चिदुपैति ताटृशबाधादिग्रहस्यक
चिदप्यनुमितौप्रतिबंधकत्वाभावात्तेषांहेत्वाभासताविलोपापत्तिश्चेतिचेदेवमपिलिंगानुपधानमतेताटृशविषयतायांमानाभावएवप्रकृतग्रंथस्तुनलिंगोपधानमताभिप्रायकः त
न्मतेऽनुमितेःसर्वत्रैवप्रकारतयाताटृशाकारत्वस्याव्यावर्तकतयाऽनुमितिपदस्यताटृशानुमितिपरत्वप्रदर्शनासंगतेः केचित्तुलिंगानुपधानमतेऽनुमितिपदस्यतदुभयपरत्वंव्या
ख्यायलिंगोपधानमतेयथाश्रुतपरतामाश्रयतेसाध्यव्याप्येत्यादिनाइत्याकारानुमितिपरंअनुमितेरित्याकारतामताभिप्रायकमितिव्याचक्षतेव्याख्याप्रयोजनंस्फुटयति नेने
तिएकत्रवन्हित्वाद्येकधर्मावच्छिन्नेव्यभिचारादीत्यादिनास्वरूपासिद्धिपरिग्रहः अन्यस्यपरामर्शात्तद्वन्हित्वादिरूपापरधर्मावच्छिन्नेव्याप्तिपक्षधर्मताद्यवगाहिज्ञानात्व्यभि
चारादिस्यस्यानुमित्यजनकत्वेपीत्यनेनसंबंधः यत्रतद्रूपावच्छिन्नेव्यभिचारज्ञानोत्पत्तिद्वितीयक्षणेकथंचित्तद्रूपावच्छिन्नलिंगकपरामर्शः तत्रक्षणैकविलंबेनानुमित्यु
पगमेव्यभिचाराभावात् नतत्रव्यभिचारोदर्शितः ननुतद्धर्मावच्छिन्नलिंगकानुमितौतद्धर्मावच्छिन्नधर्मिकव्यभिचारादिज्ञानाभावस्यहेतुत्वोपगमान्नव्यभिचारः तद्धर्मा
वच्छिन्नलिंगकत्वंचस्वाव्यवहितोत्तरत्वसंबंधेनतद्रूपावच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वंताटृशसंबंधेनव्यभिचारज्ञानविशिष्टंयत्तदन्यत्वमेववाजन्यतावच्छेदकं
तेनधूमव्याप्यवन्हिमानयमित्याकारकशाब्दादिपरामर्शोत्पत्तिद्वितीयक्षणेयत्रलौकिकसन्निकर्षादिजन्योधूमव्यभिचारीवन्हिर्धूमव्याप्येंधनवानित्याकारकसमूहालंब
नग्रहस्तज्जन्यानुमितेरुक्तसंबंधेनवन्हित्वावच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वेपिनक्षतिरित्यतआह व्याप्त्यादीति क्लृप्तकारणताकव्याप्त्यादिज्ञानसत्वेव्यभिचारज्ञाना

CC-0. In Public Domain. Digitization by eGangotri

२ स्वनिरूपकप्रतिबन्धकतावच्छेदकविषयिताशालिज्ञानप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वस्येना
नुमितित्वव्यापकत्वं प्रतिबध्यतायां प्रवेशनीयं अन्यथा पक्षविशेष्यकत्वानुपादाने गौरवविशेषणसाधा
रणाव्याप्यकथनेन न्यूनतापत्तेरितीदिक् २

जा॰सा॰ दृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकताशालियथार्थज्ञानविषयत्वं पर्यवसितार्थः।अत्र साध्यतावच्छेदकावच्छिन्नादिप्रकारकानुमितिसामान्यांतर्गतायां प
२ र्वतो वन्हिमान् वन्हिव्याप्यधूमवांश्चेतिइत्याद्यनुमितौ ह्रदो न वन्हिमानित्यादिनिश्चयस्याप्रतिबंधकत्वात् बाधसत्प्रतिपक्षस्वरूपासिद्ध्याश्रयासिद्धिव्याप्तिवारणाय प्र
कृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशः द्रव्यत्वादिना ह्रदादिविशेष्यकानुमितौ तथाविधबाधनिश्चयस्या प्रतिबंधकत्वान्न दोषः तादवस्थ्यमतः पक्षतावच्छे
दकावच्छिन्नत्वोपादानं अवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वं तेनातेजस्वी पर्वतो वन्हिमानित्यादौ विशिष्टपर्वतत्वादिमति वन्ह्याद्यभावरूपबाधस्य काञ्चनमयः पर्वतो वन्हि
मानित्यादौ चाश्रयासिद्धेः शुद्धपर्वतत्वाद्यवच्छिन्नपक्षकानुमित्यविरोधित्वेपि नासंग्रहः एवमग्रेपि बोध्यं साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे परामर्शाविरो
धितया बाधसत्प्रतिपक्षयोरव्याप्तिः तत्र साध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेपि तद्दोषतादवस्थ्यं वन्हित्वावच्छिन्नाभावनिश्चयस्य धूमजनकतेजस्त्वीवन्हिव्याप्यधूम
वांश्च ह्रद इत्याद्यनुमित्यप्रतिबंधकत्वात् यत्तु साध्याप्रसिद्धिवारणप्रयोजनकत्वं तदुपादानस्य इति तु न सत् वन्हिर्नो काञ्चनमय इत्याद्यादिनिर्णयस्य पक्षे वन्हित्वादिना वन्ह्याद्यनु
मित्यविरोधित्वेपि द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नांतर्भावसत्त्वात्तस्य काञ्चनमयवन्हिव्याप्यधूमवान्पर्वत इत्यनुमितिविरोधितया तत्र लक्षणसमन्वयात् द्वितीय
दलप्रवेशाद्व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः तत्रापि साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टत्वनिवेशाद्व्यभिचारविरोधयोर्नाव्याप्तिः वन्हि
धूमव्यभिचारीति ज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तिज्ञानसंभवात् तद्दोषतादवस्थ्यमतो व्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वोपादानं अन्वयव्याप्तिव्यतिरे
कव्याप्तौ विशेष्योपादाय तदुभयविशिष्टहेतुप्रकारत्वमेव निवेश्यम् एकमात्रव्याप्त्युपादाने साधारण्यानुपसंहारित्वयोरेकतरासंग्रहप्रसंगात् इत्यग्रे व्यक्तीभविष्यति तादृश
व्याप्तिद्वयप्रकारतानिरूपितहेतुप्रकारतायास्तत्साध्यकतद्धेतुकानुमितिजनकतावच्छेदकप्रकारतात्वेनानुगमय्य निवेशनं च न संभवति साध्याभाववद्वृत्तित्वज्ञानदशायां
केवलव्यतिरेकव्याप्त्यादिप्रकारकहेतुमत्त्वज्ञानोत्पत्त्या साधारण्यादेस्तादृशशाब्दानुमितिसामान्यविरोधित्वाभावात् व्याप्तिविशिष्टविषयकत्वमात्रस्य तद्विशिष्टहेतुतावच्छेदका प्रकारता।
वच्छिन्नविषयकत्वमात्रस्य वा निवेशे स्वरूपासिद्धाव्याप्तिरतः पक्षांशे तादृशव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकत्वनिवेशः पक्षांशे व्याप्तिविशिष्टप्रकारकत्व
मात्रनिवेशेपि तद्दोषतादवस्थ्यं धूमाभाववान्ह्रद इत्यादिज्ञानस्य द्रव्यत्वादिना हेतुमत्त्वज्ञानाविरोधित्वात् साधारण्याद्यव्याप्तिश्च वन्हित्वाद्यवच्छिन्ने धूमाभाववद्वृत्तित्वादिग्रह वि
स्य धूमादिव्याप्तिविशिष्टतत्तद्वृत्तित्वावच्छिन्नप्रकारकज्ञानाविरोधित्वात् अतो हेतुतावच्छेदकावच्छिन्नत्वनिवेशः पक्षांशे साध्यादिप्रकारकसंस्कारादेराहार्यज्ञानादेश्च राम॰
बाधादिज्ञानाप्रतिबध्यत्वादसंभव इत्यतस्तादृशानुमितिव्यापकतानिवेशः साध्यव्याप्यहेतुधर्मितावच्छेदके साध्यवत्त्वज्ञानस्येव साध्यव्याप्यहेतुमान्पक्षः साध्यवा २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितिप्रतिबंधकतावच्छेदकविषयताश्रयत्वपर्यंतस्यसमूहालंबनज्ञानविषयताश्रयोदासीनपदार्थवारणायप्रथमलक्षणेविवक्षणीयतयाबाधादिज्ञानप्रतिबंधकतायांप्रायसो
हेतुविषयतायाअनवच्छेदकत्वात्तत्रस्यहेतावव्याप्तिश्चयद्विषयकत्वेनेत्यादिलक्षणेचतृतीयायाअवच्छेदकत्वार्थतयासुतरांतथेसत आह। यथाश्रुतमिति इदमेतल्लक्षण
त्रयं ननुहेतुवदाभासंतइतिव्युत्पत्त्याहेत्वाभासपदस्यदुष्टहेतुपरत्वेदुष्टहेतुनिर्णयस्यैवप्रतिज्ञातत्वात्तल्लक्षणमेवाकांक्षितमतस्तदनुक्तौमूलस्यन्यूनता· अन्यविधव्यु
त्पत्त्याहेत्वाभासपदस्यहेतुदोषपरत्वसंभवेपितेचेत्यादिनादुष्टहेतूनामेवविभजनाद्दुष्टहेतुनिरूपणस्यैवप्रतिज्ञातत्वेनतत्संगतेःएवंदुष्टहेतुनिरूपणस्याप्रकृतत्वेदुष्टहेतूनांवि
भागानर्हतयातेषांसंकरेणविभागव्याघातशंकयाअनवतारात् उपधेयसंकरेपीत्यादिग्रंथस्यउपाध्यसंकरेणविभागोपपादनपरस्यासंगतिरित्यत आह तद्रूपत्वंचेति तादृशदो
षवत्त्वंचेत्यर्थः दुष्टहेतूनांलक्षणमित्यनुषज्यतेस्फुटमितिशेषः तथाचदुष्टहेतुनिरूपणस्यप्रतिज्ञातत्वेपिदोषलक्षणेकृतेदुष्टहेतुलक्षणस्यस्फुटतयालाभेनोक्तानुपपत्तिरि
तिभावः तदभिप्रायेणैवेति दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः अनुमितिपदस्यानुमितिसामान्यपरत्वेऽसंभवात् यत्किंचिदनुमितिपरत्वेऽतिप्रसंगात् प्रकृतपक्षसाध्यहेतु॰
कानुमितिपरत्वमावश्यकं तथाचव्यभिचारादावव्याप्तिः वन्हिर्धूमव्यभिचारीइतिज्ञानाभावस्यपर्वतोधूमवानित्यनुमित्यजनकत्वात् लक्षणशात्तस्यप्रकृतानुमितिकार
णज्ञानमात्रपरत्वेचबाधादावव्याप्तिः बाधादिज्ञानस्यपरामर्शाप्रतिबंधकत्वादतोऽनुमितिपदमजहत्स्वार्थलक्षणयातदुभयपरतयाव्याचष्टे तत्रेति तादृशवाक्यलक्षणइ
त्यर्थःलक्षणघटकतावच्छेदकमुभयसाधारणमनुगतरूपमाह अनुमितिनिष्ठकार्यतेति अनुमितिपदस्यप्रकृतपक्षतावच्छेदकविशिष्टप्रकृतसाध्यतावच्छेदकावच्छिन्न
प्रकारकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वंस्वयमेवदर्शयिष्यति अतोनवक्ष्यमाणाऽतिप्रसंगः निरूपकत्वंचात्रयद्प्रतियोगित्वतदाकार्यस्यकार्यताप्रतियो
गित्वाभावादनुमित्यसंग्रहः अतःसंबंधिपदंसंबंधिद्वयसाधारणस्यतत्साक्षात्कारजनकसाक्षात्कारविषयतात्मकनिरूपकत्वस्यलाभाय अत्रपर्वतोवन्हिमान्द्रव्यंचतथा
इत्यादिसमूहालंबनानुमित्यादिविरोधिहृदनिष्ठवन्ह्यभावादिरूपबाधादेः पर्वतादौधूमादिनावन्ह्यादिसाधनेदोषताप्रसंगः प्रकृतानुमितिनिष्ठकार्यतानिरूपकेसंबंधिग्रा
ह्यत्वस्यप्रतिबध्यतानवच्छेदकतयातदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानिवेशासंभवात् तथाविग्रहत्वव्यापकप्रतिबध्यतानिवेशेचानुमित्यविरोधिनिव्यभि
चारादौपरामर्शाविरोधिनिबाधादौचाव्याप्तिः उभयविरोधिपक्षाप्रसिद्ध्यादावेवतादृशप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्वादतः कल्पांतरमाह साध्यव्याप्येति प्रकृत
पक्षतावच्छेदकविशिष्टपक्षेप्रकृतसाध्यतावच्छेदकावच्छिन्नतद्व्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकानुमितिसामान्यपरमित्यर्थः एवंचसमूहालंबना
नुमितेर्व्याप्तिविषयकतयाव्यभिचारज्ञानादिप्रतिबध्यत्वान्नव्यभिचाराद्यसंग्रहः दर्शितसमूहालंबनादिप्रतिबंधकतामादायातिप्रसंगस्यवारणायसामान्यपदं तथाचता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चि॰ यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वं॰ तथापि ज्ञायमानस्याभासत्वात्र लक्षणम्॰।
यद्वा प्रत्यक्षादौ बाधेन ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञाने॰ प्रामाण्यं ज्ञाप्यते॰ अनुमितौ तूत्पत्तिरेव प्रतिबध्यते॰ ॥ ॥इति॰॥

जा॰सा॰ यद्विषयत्वेन ज्ञानस्य अनुमितिप्रतिबंधकत्वं तद्वत्त्वमेववाच्यं सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव तथा तद्वत्त्वमपि हेतोस्तज्ज्ञानरूपसंबंधेन तस्य समूहालंबनरूपतया
२ हेतुरूपविषयत्वादिति तदपि तुच्छं साध्याभाववत्त्वस्य विषयत्वेन तादृशपक्षज्ञानप्रमात्वविषयत्वेन वा ज्ञानस्य प्रतिबंधकत्वं तस्य च साध्यवत्यपि पक्षे संभवादतिव्याप्तेः विशिष्ट
विषयत्वेन प्रतिबंधकत्वं विशिष्टं च तत्राप्रसिद्धमिति चेत्तर्हि किं सर्वत्र सत्प्रतिपक्षे साध्याभावव्याप्यवान् पक्षः प्रसिद्धः यथाकथंचित् संबंधेन तद्वत्त्वं चातिप्रसक्तं धूमादेरपि ज्ञान
2 रूपेण तदाश्रयाश्रयत्वादिना वा सम्बंधेन व्यभिचारादिमत्वात् यादृशसंबंधावगाहित्वेन ज्ञानस्य प्रतिबंधकत्वं तेन तद्वत्त्वञ्च न सर्वत्र सत्प्रतिपक्षिते हेतावस्ति च क्वचित् संदूतावितिः
रुतं पल्लवितेन। यद्यपीति स्थाणुत्वाभावस्य तद्व्याप्यकरादेश्च निश्चये स्थाणुत्वप्रत्यक्षशाब्दयोरनुदयात्। नचैवं नरशिरःकपालं शुचि प्राण्यंगत्वादित्यादिना प्यागमप्रतिरोधः
स्यात् तत्रानुकूलतर्काभावेन बलवत्तरागमविरोधेन च व्याप्तिनिश्चयस्यानुमितेश्चानुत्पत्तेरिति भावः। यद्वेत्याद्यभ्युच्चयमात्रं प्रत्यक्षप्रत्यानुमानिकबाधादिनिश्चयस्याप्रतिबंध
कत्वेऽपि शाब्दप्रतिप्रतिबंधकत्वात् योग्यताज्ञाने नान्यथासिद्धत्वात् तदभावो न तत्र हेतुरिति चेदेवमप्युपनीतभानविशेषंप्रति तत्त्वेन हेतुतायादुर्वारत्वात्॥ ❁ ॥ अथ गाधा
रीसामान्यनिरुक्तिः॥ हेत्वाभासनिरूपणेप्रसंगस्यापि संगतित्वं संभवति व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणे सति व्याप्तिपक्षधर्मताविरोधित्वहिरहवतो दुष्टहेतोः स्म
रणात्तत्तत्प्रदर्शकमूलस्य न्यूनतापरिजिहीर्षुः प्रसंगस्यापि तन्निरूपणप्रयोजकत्वमाह। एतावतेति॰ परिकरः व्याप्तिपक्षधर्मते निरूप्य सं तत्र क्रमेण दुष्टहेतोः स्मृतत्व
स्य प्रसंगनिर्वाहकस्य लाभाय तत्प्रसंगादिति सपरिकरहेतुनिरूपितप्रसंगसंगतेरित्यर्थः तज्ज्ञानजन्यजिज्ञासाधीनत्वं च मत्यर्थः अन्वयश्चास्य निरूपणे मित्यनेन तत्त्व॰
निर्णयविजयप्रयोजकत्वादिति मूलं यद्यपि हेत्वाभासनिष्ठतत्त्वनिर्णयादिजनकज्ञानविषयत्वार्थकतया शिष्यप्रवृत्त्युपयोगिनिरूपणघटकज्ञानप्रयोजनप्रदर्शनपरं तथापि॰
तन्मात्रपरत्वे संगत्यप्रदर्शनेन मूलस्य न्यूनता स्यादिति तस्यैककार्यकारित्वरूपसंगतिप्रदर्शनपरत्वमपि संभवतीति स्फुटीकर्तुमाह तत्त्वनिर्णयादिति आदिपदाद्विजयपरिग्रहः
तत्कार्यकारित्वात् सपरिकरहेतुप्रयोज्यकार्यप्रयोजकत्वात् प्रयोजकत्वं च जनकतावच्छेदकादिसाधारणं स्वविषयकज्ञानकार्यं प्रति स्वस्य तथात्वमस्तमेवेति तत्त्व
निर्णयः प्रमितकोटिनिश्चयः तत्र व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानमिव तद्विपरीतकोटिसाधकस्य हेत्वाभासत्वज्ञानमप्युपयुज्यते प्रतिबंधकीभूतविपरीतकोटिव्याप्यवत्ता
ज्ञानाप्रामाण्यग्राहकत्वादित्युभयोस्तत्त्वनिर्णयप्रयोजकत्वं अथवा तत्त्वनिर्णयः साध्यवत्ताज्ञाने प्रमात्वनिश्चयः तत्रानुमापकहेतोर्व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानमिव
विपरीतकोटिसाधकहेतोर्दुष्टत्वज्ञानमप्युपयुज्यते प्रकृतसाध्यग्रहाप्रामाण्यग्राहकविपरीतकोटिसाधकहेत्वदुष्टत्वग्रहविघटनद्वाराविनयप्रयोजकत्वं च हेत्वाभासस्य स्व राम॰
ज्ञानाधीनपरोक्तहेतुदोषोद्भावनद्वारा व्याप्त्यादिविशिष्टहेतोश्च स्वज्ञानाधीनसन्न्यायप्रयोगद्वाराबोध्यं मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः यथार्थज्ञाननिष्ठानु॰ २

अस्तिपार्थर्वे वाचन्दतेरच शब्दस्य प्रतित-दोटौ न सत्या पतोरा८-अ. यथोति॰२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त् एवञ्च वस्तुमात्रनिश्चयादनन्तरं निर्वह्नित्वाविशिष्टे वह्नेर्ग्रहेऽपि नक्षतिस्तस्य विरोध्यविषयकत्वात् एवं साध्यनिश्चयोत्तरं तस्यानुमितावपि मानसज्ञानाविरोधित्वा च
तादृशपक्षे तादृशसाध्यवैशिष्ट्यस्य तादृशसाध्यनिरूपितव्याप्तिविशिष्टतादृशहेतुवैशिष्ट्यस्य चावगाहिनो ज्ञानस्य यद्विषयं ज्ञानं विरोधिविषयकत्वं तादृशज्ञानविरो
धित्वं वा हेतुदोषत्वं ज्ञानविरोधित्वं च तद्विषयविषयकग्रहविरोधिग्रहविषयत्वं एवंविधैव रीतिरुक्तत्र सर्वत्र सव्यभिचारलक्षणादावनुसर्तव्या इत्यपि केचित् । केचित्तु यादृ
शपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः संभवंति तावदन्यान्यत्वमेकमात्रदोषस्थले च तत्त्वमेव हेत्वाभासत्वं सचातिरिक्त एवान्योन्याभाव इति नवैयर्थ्यं पंचविधभे
दोक्तिस्तु तत्संभवस्य लाभिप्रायेण व्यभिचारादेः साध्यादिभेदनियंत्रितत्वात् शब्दाभेदमात्रस्य चाकिंचित्करत्वादित्याहुः । स्यादेतत् शब्दोऽनित्यः शब्दत्वात् इत्यत्रासाधा
रणेऽव्याप्तिः सर्वसाध्यवद्व्यावृत्तेस्तत्रासत्त्वात् एवं शब्दोऽनित्यः कृतकत्वात् इत्यस्य सत्प्रतिपक्षे नित्यत्वव्याप्याद्रव्यद्रव्यत्वादावपि पक्षस्य तद्वृत्ताविरहादित्याशंकां तयोर
लक्ष्यत्वेन निराकुरुते दशाविशेष इति । हेत्वोः सद्धेत्वोः असाधारणः पक्षमात्रवृत्तिः सन् प्रतिपक्षो विरोधिपरामर्शो यस्य स तथा तयोर्दशाविशेषे हेतौ सर्वसाध्यवद्व्यावृ
त्तत्वस्य पक्षे साध्याभावव्याप्यवत्त्वस्य च भ्रमदशायमाभासत्वात् अनुमित्यजनकत्वात्तद्बुद्धेर्हेत्वादौ साध्यवद्व्यावृत्तत्वादिबुद्धेः प्रतिबंधकत्वं परमायाति न तु तद्विषयस्य दोष
त्वम् असत्त्वात् अन्यथा बाधभ्रमेणानुमित्यनुदयात् तस्यापि दोषत्वं स्यात् को हि साध्याभाववद्व्याप्यवत्ता भ्रमयोरनुमितिविरोधित्वे विशेषः निर्युक्तिकस्तु भवादो न श्रद्धे
यः यत्तु ज्ञानस्य यदनुमितिप्रतिबंधकतावच्छेदकं तद्वत्त्वं तत्प्रकारकधर्मविषयत्वं च लक्षणार्थः तच्च द्विविधं विषयरूपसाधारण्यादि बाधे च प्रमितसाध्याभाववान् पक्षः त
द्विषयत्वेन ज्ञानस्यानुमितिप्रतिबंधकत्वात् अविषयरूपं च विरोधिसामग्रीकालीनत्वादिकं तद्वत्त्वं च ज्ञानस्यैव न तद्विषयस्य हेतोरपीति तन्न तद्वत्त्वं हि हेतोर्नाभेदेन वा धेतद
भावात् अत एव नाश्रयतया वह्निव्यभिचारिद्रव्यत्वादिमति धूमेऽतिप्रसंगाच्च साध्याभाववत्पक्षस्यैव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रतिबंधकत्वात् साधारण्यादिविषय
कत्वस्य ज्ञाननिष्ठस्यैव प्रतिबंधकतावच्छेदकत्वात् सत्तादिसाध्यके ज्ञानेऽतिप्रसंगाच्च यथाकथञ्चित्तद्वत्त्वस्य चातिप्रसञ्जकत्वात् विरोधिसामग्रीसमवहितोऽपि च लिंगपरा
मर्शो न स्वसाध्यकानुमितेः प्रतिबंधको मणिसमवहितो वह्निरिव दाहस्य अयं यद्धर्मविशिष्टज्ञाने सत्यवश्यमनुमितिप्रतिबंधः तदेवात्र प्रतिबंधकतावच्छेदकमुक्तं भवति च
प्रतिबंधकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टे परामर्शे तथा इति चेत् न वै कालादिसाधारणकारणघटितासामग्री क्वापि प्रतिबंधिका विशेषणस्य त्वत्र तत्त्वे कार्यत्वादेः
स्यदुर्वारत्वात् किंतु विरोधिपरामर्शस्तथा यदि च तत्सत्त्वेऽपि तत्साध्यबाधावतारान्नानुमितिप्रतिबंधः प्रामाणिकस्तदा अप्रामाण्यग्रहाभावस्येव तदभावस्यापि वैशिष्ट्यं त
त्र निवेश्यतां यथा च भ्रमप्रमासाधारणविरोधिपरामर्शसत्त्वे नानुमितिस्तथा तथाविधबाधादिग्रहेऽपीत्यतिप्रसंगः । न चातीतादौ लिंगे विरोधिपरामर्शकालीनत्वमपि यदनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः ॥ अथ हेत्वाभासत्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते । ननु अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं
तद्यमानं सद्यदनुमितिप्रतिबन्धकं यत्त्वं वा हेत्वाभासत्वम् ॥ चिन्तामणिः ॥ ॥

जा॰ सा॰ श्रीगणेशाय नमः ॥ अथ सामान्यनिरुक्तिः शिरोमणिः एतावता प्रबंधेन सपरिकरं हेतुं निरूप्य तत्प्रसंगात् तत्त्वनिर्णयादिरूपतत्कार्य्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते अथे
१ ति अनुमितीति यथाश्रुतमिदं हेतुदोषाणां लक्षणं तद्दलत्वञ्च दुष्टहेतूनां तदभिप्रायेणैव उपधेयसंकरेऽपीत्यादि वक्ष्यति तत्रानुमितिपदं अनुमितिनिष्ठकार्य्यतानिरूपकसम्बंधि
न्यात८। त्वेनानुमिति तत्कारणज्ञानपरं साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारानुमितिपरं वा तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यस्य परामर्शाद्दनुमित्युत्पादेऽनन्यभिचाराद्यसा
दिज्ञानेनान्यथासिद्धत्वाच्च व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेऽपि न क्षतिरिति वदन्ति । पर्वतो निर्वन्हिर्धूमो वन्हेरभिधेयत्वं वा मेयत्वस्य व्यभिचारी स्यादित्यादिभ्रमादनुमितिप्र
१ तिबंधादाह यथार्थेति ननु प्रतिबंधकज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वाभासतापत्तिः । अथ विशिष्टविषयज्ञानं प्रतिबंधकं तद्घटकञ्च न विशिष्टमिति
चेत्तर्हि यथार्थेति व्यर्थं भ्रमविषयविशिष्टस्याप्रसिद्धत्वादित्यनुशयेनाह । यदिति । केचित्तु दुष्टानामेव हेतूनामेतानि लक्षणानि तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचा
रादेः प्रतिबंधकत्वमभ्युपेत्य तदर्थश्च तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वमग्रे च तत्त्वमित्यस्य तद्वत्त्वमित्यर्थः आद्यस्यैव वा दु
ष्टहेतुलक्षणत्वमिति प्राहुः लिङ्गमविवक्षितं यद्विषयत्वेन यादृशविशिष्टविषयत्वेन तेनानुमितिप्रतिबंधकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सद्धेत्वादिनि स्वेनातिप्रसं
गः अवच्छेदकञ्चेहानतिरिक्तवृत्तित्वं तेन विशिष्टस्यासत्वेऽपि भ्रमात् प्रतिबंधेऽपि न क्षतिः विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन तेन प्रमेयत्वादिविशिष्टसव्यभिचा
रादौ नातिप्रसंगः एवञ्च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा साध्याभाववद्वृत्ति साधनं साधनवद्वृत्ति साध्याभावो वा हेतुदोषः येन केनापि संबन्धेन तद्वा
न्पक्षतो हेतुर्दुष्टः यादृशधर्म्मिणि यादृशधर्मवत्ताज्ञानं अनुमितिप्रतिबंधकं तेस्य धर्म्मिणस्तादृशधर्मवत्त्वं हेतुदोषत्वपि कश्चित् । अथ पर्वतत्वेन पक्षत्वे वन्हित्वेन सा
ध्यत्वे विशिष्टधूमत्वेन च हेतुत्वे पर्वतादेः कांचनमयत्वविरहो ह्रदस्य वन्हिधूमशून्यत्वं पर्वतस्य महानसीयवन्हिधूमविरहितत्वं मेयत्वस्य केवलधूमस्य वा वन्हिव्यभिचारो वि
शिष्टस्य धूमस्य वा पर्वतीयवन्हिव्यभिचारो न दोषः न वा तत्सम्बन्धेन तत्र तस्य हेतोर्दुष्टत्वं अतस्तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्साध्यकतद्धर्मावच्छिन्नतद्धेतु
कानुमितिप्रतिबंधकत्वं वाच्यं तथा च निर्वन्हिः पर्वतो वन्हिमान् पर्वतावृत्तिवन्हिमान् वा तद्व्यभिचारिणः पर्वतावृत्तेर्वा धर्मादित्यादौ न कोपि हेत्वाभासः स्यात् तादृशानुमि
तेरप्रसिद्धत्वादिति अत्र वदन्ति यद्विषयनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरं अनुमितौ अनाहार्य्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकवि
शिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्तावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वं हेतुदोषत्वं राम
पक्षतावच्छेदकवैशिष्ट्यादिकञ्चवैज्ञानिकं न तु वास्तवं ग्राह्यं व्याप्तिश्चान्वयतो व्यतिरेकतश्च वाच्या तादृशावगाहित्वप्रसिद्धिराहार्यज्ञान एवाभ्युपेतव्या नन्वगतिकत्वा १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं. ४१५०

श्रीहरिः

॥अथजागदीशीसामान्यनिरुक्तिःप्रारभ्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं. ४१५१

श्रीः

॥ अथजागदीश्यवच्छेदकत्वनिरुक्तिः प्रारभ्यते ॥

233

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा·अ· ॥श्रीगणेशायनमः॥ नन्ववच्छेद त्वमिह नस्वरूपसम्बन्धविशेषः सम्भवतिचलघोधर्म्मे गुरौ तदभावात् प्रमेयधूमत्वकम्बुग्रीवादिमत्त्वप्राणग्राह्यगुणत्वादेरतयात्वेन
१ तेनरूपेणसाध्यतायांव्यभिचारिण्यतिप्रसंगात् नाप्यनतिरिक्तवृत्तित्वं प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेनधूमत्वादेरपि तदतिरिक्तवृत्तित्वा
त्। नन्वतथाविधयत्किंचिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वंतत् अतएवातिरिक्तसामान्याभावस्याभावधूमत्वादेरप्यनवच्छेदकत्वापाताद्दशेतत्साधनमपि
२ साधुसंगच्छतइतिवाच्यं वन्हिघटवृत्तिद्वित्वताणीतार्णदहनवृत्तिद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवन्हित्वादावतिप्रसंगात् एतेनान्यून
वृत्तित्वविशेषितमपि परास्तम् अतएवनानाप्रतियोगिवृत्त्येकप्रतियोगितांगीकारेऽपिननिस्तारः लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः तादृशात
दवच्छिन्नत्वाप्रसिद्धेरिति चेन्न प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात्। स्वसमानवृत्तिकंचावच्छेदकंग्राह्यं तत्त्वञ्च स्वपर्य्याप्त्यधिकरणपर्याप्ति
वृत्तिकत्वं यावत्वादिकन्तु नतथापर्य्याप्तिप्रत्ययमेकोघटइमौद्वावितिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषएवत्रित्वादिकमपिनद्वित्वादिसमानवृत्तिकमितिद्वित्वादिना
साध्यतायांनाव्याप्तिः घटकत्वावच्छेदकत्वंस्वरूपसम्बन्धविशेषः एवञ्चयद्धर्मावच्छिन्नेसत्त्वयद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वक्तव्यं तेनोक्ताव्याप्तिनिरासः। व
स्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसंबद्धस्वविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं वा तदनतिरिक्तवृत्तित्वंवक्त
व्यम् अतएवसत्तावान् जातेरित्यादौजातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपि सत्तात्वस्य नक्षतिः एवं स्वविशिष्टसम्बन्धि
निष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यं तादृशप्रतियोगिताश्च विशिष्योपादेयाः नानागुरोरवच्छेदकत्वविनाद्युत्वेन त्वप्रतियोगित्वसम्बन्धित्वञ्च साध्य
तावच्छेदकसम्बन्धेन बोध्यमतो नसम्बन्धभेदमादाय दोषः। कालिकविशेषणताविशेषेण च साध्यतायां तादृशप्रतियोगितावच्छेदकत्वमनित्यतत्तद्व्यक्तित्वेप्रसिद्धम् अ
भावश्च प्रतियोगिव्यधिकरणो बोध्यः। नचमौलमिदमीयञ्च प्रतियोगिवैयधिकरण्यमनुपादेयं संयोगत्वाद्यवच्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभा
वप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभाव वतिचावृत्तेरव्याप्त्यतिव्याप्त्योरनवकाशादिति वाच्यं धूमवान् वन्हेरित्यादावतिव्याप्तेः महाकालं
तिकालावच्छेदेनापि महानसादौ किंचित्संयोगेनवर्ततेयेनवन्हिमदयोगोलकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वाद्यवच्छिन्नाभाववदवृत्तित्वंधू
मत्वविशिष्टस्यसंभाव्येत। प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वस्यविशेषणताविशेषावच्छिन्नत्वस्यवाविवक्षणेपुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयम् यत्राधि राम·
करणेव्यभिचारस्तदन्यत्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वसाध्यवत्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यन्ताभावप्रतियोगि १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानवच्छेदकत्वात्‌ हेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात्‌ तथा च विशेषणताविशेषावच्छिन्नयद्धर्म्मविशिष्टसम्बन्धिनि
ष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्सम्बन्धावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्या
प्तिरिति पर्यवसितोऽर्थः यत्र सद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवेयं रीतिः रूपादेर्यत्यपि वदन्ति गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्।
नास्तीति प्रतीतिवलात्‌ गुरुरपि धर्म्मोऽवच्छेदकः प्रतियोगितायाः। न चास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनं तथाविधयत्किंचिद्व्यक्तिसत्त्व एव तादृशप्रतीतेरुदया
त्‌ अत एवैकघटवति भूतले कम्बुग्रीवादिमान्‌ नास्तीति शब्दो न प्रमाणं प्रमाणञ्च घटसामान्यशून्ये न चेदेवं लघुरूपसमनियतानां गुरूणामव्याप्यत्वापत्तिः गुणादिगुणकर्म
न्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितायालाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात्‌ तत्तद्व
च्छेदकत्वे व्यक्तीनां च प्रातिस्विकरूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात्‌ एवं द्रव्यत्वादिविशिष्टद्रव्यत्वादेरव्याप्यत्वप्रसंगोऽप्यनुसन्धेयः उपदर्शितप्रकाराणा
मपि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात्‌ अत एव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वं साधु संगच्छते तद्रूपापि केचिदिति कृतं पल्लवितेन॥ ॥द्रव्यवच्छेदक
त्वनिरुक्तेः शिरोमणिः॥ [illegible]यावच्छेदकत्वनिरुक्तिः॥ [illegible]॥ इहानवच्छेदकत्वमित्यत्रावच्छेदकत्वमवच्छेदकत्वपदार्थः विशिष्टसत्तात्वसमनियतस्य सत्तात्वस्य लघुनो
पि न विशिष्टाभावस्य प्रतियोगितावच्छेदकत्वं गुणादावपि सत्ता नास्तीति प्रतीतिप्रसंगात्‌ पृथिवीसमवेतत्वासमनियतस्यापि च समवेतत्वस्य पृथिवीसमवेताभावप्रति
योगितावच्छेदकत्वमनतिप्रसंगात्‌ एवं घटरूपत्वस्यासमनियतमपि रूपत्वं व्यधिकरणसंयोगादिसम्बन्धावच्छिन्नघटरूपाद्यभावस्य प्रतियोगितावच्छेदकमतः
समनैयत्यमकिंचित्करं यस्यावच्छेदकत्वस्वीकारेऽतिप्रसंगाद्यभावः स एवावच्छेदक इत्याशयेनाह सम्भवतीति अतिप्रसंगाद्यनापादके लघौ सम्भवतीत्यर्थः प्रमेयधू
मत्वस्य तादृशप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधूमत्वानतिरेकादाह। कम्बुग्रीवेति न च कम्बुग्रीवादिमत्त्वं कम्बुग्रीवादिव्यक्तिरेव सा च प्रत्येकं हेतुमन्निष्ठा
भावप्रतियोगितावच्छेदिकैवेति कुतो निर्व्याप्तिरिति वाच्यं परम्परया संस्थानगतकंबुग्रीवात्वादिजातिमत्त्वस्यैव साध्यतावच्छेदकत्वात्‌ तस्य च परंपरयावच्छेदकत्व
कल्पनामपेक्ष्य लाघवेन घटत्वस्यैव साक्षात्तथात्वादिति भावः ननु पृथिवीत्वतेजस्त्वादिसांकर्यात्‌ घटत्वयदिनानातदानेकमपि घटत्वं कंबुग्रीवादिमत्त्वसमनियतमत
आह। घ्राणग्राह्येति घ्राणग्राह्यगुणत्वापेक्षया लघोर्ग्राह्यगंधत्वस्यैव प्रतियोगितावच्छेदकत्वादिति भावः अन्यथा परमाणौ गंधत्वेन सह घ्राणग्राह्यगुणत्वस्यासमनियतत्वा
भावात्‌ गंधत्वस्यैव प्रतियोगितावच्छेदकत्वाभावादिति भावः अत्र घ्राणग्राह्यगुणत्वं घ्राणग्राह्यत्वे सति गुणत्वव्यापकजातिमत्त्वं तेन गंधत्वस्य लघोः समनैयत्ये ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰ अ॰ त्पर्यमित्यपि कश्चित् अतथात्वेन प्रतियोगितानवच्छेदकत्वेन तेन रूपेण प्रमेयधूमत्वादिरूपेणेत्यर्थः। व्यभिचारिणि प्रमेयत्वादौ सपक्षवृत्तिप्रमेयत्वादौ तेन विरुद्धसाध्य
२ सामानाधिकरण्याभावात् तिव्याप्यभावेपि न क्षतिः नापीति तादृशप्रतियोगितायास्तत्तद्व्यक्तित्वावच्छिन्नाभाववदवृत्तित्वमपि नेत्यर्थः तेन तादृशप्रतियोगिताप्रतियो
गिकाभाववद्वृत्तितया धूमत्वादेरवच्छेदकत्वाभावादतिप्रसंगसंभवात् स्वरूपसम्बन्धात्मिकायादृत्यस्य न वैयर्थ्यं नवाग्रिमग्रन्थविरोध इति ध्येयं स्वरूपसम्बन्धात्मिका
याइति प्रतिव्यक्तिभिन्नत्वे हेतुः नन्तद्भावप्रतियोग्युभयस्वरूपायाइतितत्यर्थः तत्तत्प्रतियोगिमात्रस्वरूपत्वे सामान्याभावविशेषाभावयोः प्रतियोगितायामविशेषाप
त्तेरिति ध्येयं धूमत्वादेरपीति तथाच धूमवान् वह्नेरित्यादौ व्याप्तिलक्षणातिव्याप्तिरिति भावः नचेति वाच्यमिति परेणान्वयः तथाविधेति यत्किंचित्सद्व्याप्यवृत्तिसाध्यकस्थ
लीयलक्षणाभिप्रायेण तथाच तथाविधो हेतुसमानाधिकरणो यो यत्किंचिदभावस्तत्प्रतियोगित्वावच्छिन्नाभाववदवृत्तित्वं तत्रार्थः तथाविधाभावीयप्रतियोगितासामान्य
शून्य॰ शून्यत्वमप्रसिद्धं सर्वस्यैव वस्तुनस्तादृशयावत्त्वावच्छिन्नाभावप्रतियोगितासत्वात् तदुक्तं यत्किंचिदिति समनियताभावयोरैक्यानुपगमाच्च तेन घटादिसामान्याभाव
स्यैव घटीयादिसंयोगसम्बन्धेन प्रमेयादिसामान्याभावतया पुनर्नाप्रसिद्धिः एकधर्मावच्छिन्नार्थकं पदं अव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्त्यभिप्रायेण तथाविधायाएकध
र्मावच्छिन्नाप्रतियोगिता तत्सामान्यशून्यावृत्तित्वमिति योजना यत्प्रतियोगिताया अवच्छेदकीभूतधर्मावच्छिन्नानधिकरणत्वं हेतुमतस्तत्प्रतियोगिताया अवच्छेदकीभूत
धर्मावच्छिन्नप्रतियोगितासामान्यशून्यत्वं तत्रार्थ इति वस्तुगतिः एकपदं शृंगग्राहिकतया तत्तदभावप्रवेशार्थमिति तु रिक्तवचस्तन्निवेशवैयर्थ्यात् यत्किंचित्सदेनैव तल्ला
भादिति ध्येयम्। यद्यपि प्रमेयवान् वाच्यत्वादित्यादौ समवायेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः प्रमेयत्वावच्छिन्नाभावप्रतियोगितासामान्यशून्यत्वाप्रसिद्धेः तादृ
शाभावांतरस्य निरुक्तप्रतियोगितानवच्छेदकतायाः प्रमेयत्वे सत्त्वात् तथापि तादृशयत्किंचिदेकाभावप्रतियोगितात्वं यद्धर्मव्यापकतावच्छेदकं तत्त्वं विवक्षितमस्ति च प्र
मेयत्वव्यापकत्वं प्रमेयसामान्याभावप्रतियोगितायामित्यदोषः तत अवच्छेदकत्वं अत एवेति यत्किंचिदेकाभावव्यक्तेः प्रवेशादित्यर्थः यद्दिसामान्याभावो नास्ति तदा व
न्हिमन्निष्ठतत्तद्धूमाभावप्रतियोगितासामान्यशून्ये धूमांतरे वर्तमानतया धूमत्वस्य निरुक्तावच्छेदकत्वं न स्यादिति व्याप्तिलक्षणातिव्याप्तिनिरासार्थमेव सामान्याभावः सा
धयिष्यत इति तथाच धूमसामान्याभावस्यैव हेतुसमानाधिकरणस्य प्रतियोगितासामान्यशून्ये घटादावृत्त्या धूमत्वस्यावच्छेदकत्वमिति भावः ननु तादृशप्रतियोगिता
न्यूनानतिरिक्तवृत्तित्वं वाच्यं वन्हित्वं तु घटवृत्तितादृशप्रतियोगितान्यूनवृत्त्यत आह तार्णातार्णेति अतिप्रसंगादिति तथाच व्याप्तिलक्षणासंभव इति भावः एतेनेति क्वाचि रम॰
त्कं तत्र एतेन तार्णतार्णोभयाभावमादाय यद्दत्तदोषेण सामान्याभावप्रतियोगित्वमेकमेव समस्तप्रतियोगिवृत्ति इति तदनतिरिक्तवृत्त्येव धूमत्वमतो नोक्तातिव्याप्तिरिति प्रग २

CC-0. In Public Domain. Digitization by eGangotri

ल्भोक्तं दूषयति। अत एवेति। उक्तरीत्या वन्हित्वादेरवच्छेदकत्वप्रसंगादेवेत्यर्थः। ननु प्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वं स्वरूपसम्बन्धरूपएव वाच्यं स्वावच्छेद्यप्र
तियोगिताकत्वेन साध्यतावच्छेदकं पुनर्विशेषणीयमतो गुरुधर्मेण साध्यतायां नातिव्याप्तिरत आह। लघुरूपेति ननु घटवान्महाकालत्वादित्यादावव्याप्तिभियेवगु
रुरूपेण साध्यतायामतिव्याप्तिभियापि प्रतियोगिताधर्मिकाभयाभावघटितं लक्षणं वाच्यमतस्तदपि दूषयति लघुरूपेत्यादिनेत्यपि कश्चित् वन्हित्वादिलघुरूपसम
नियतं यत्समेयवन्हित्वादिकं तद्रूपेण साध्यतायां धूमादावव्याप्तिरित्यर्थः। प्रतियोगितावच्छेदकेति हेतुसमानाधिकरणाभावप्रतियोगितायां यदवच्छेदकं तदभाववद्
वृत्तित्वस्य मूलस्य प्रतियोगितावच्छेदकतात्तेन विवक्षितत्वादित्यर्थः। अन्यनेन संबन्धेन प्रतियोगितावच्छेदकत्वे तेनैव तदभावो ग्राह्यस्तेन धूमादिमन्निष्ठाभावप्रतियोगिताव
च्छेदकत्वस्य घटत्वादेः कालिकादिसम्बन्धेनाभाववत्यात्मादौ वन्हित्वादेः समवायेनावृत्तावपि नोक्तावच्छेदकत्वं नवा धूमत्वादेः संयोगादिसंबन्धेन स्वाभाववति समवेतत्वे
ष्यवच्छेदकत्वहानिः यत्तु साध्यतावच्छेदकताघटकसंबन्धेन तदभावो ग्राह्य इति तत्तुच्छं धूमत्वप्रकारकप्रमाविशेष्यवान् वन्हेरित्यादावतिव्याप्तेः लघुतया हेतुमन्निष्ठतादृशप्र
माविशेष्याभावप्रतियोगितावच्छेदकीभूतस्य धूमत्वादेः स्वरूपसम्बन्धेनाभाववति धूम एव तादृशप्रमाविशेष्यत्वस्य वृत्तेः तद्वृत्तित्वं च स्वरूपसंवन्धेन तद्वृत्तिसाध्य
तावच्छेदकताघटकसम्बन्धेनावर्तमानत्वं नातो धूमत्वाभावस्य वकालिकसम्बन्धेनाश्रये धूमे समवायेन स्वरूपसम्बन्धेन च तदाश्रये सत्त्वादौ कालिकविशेषणतया धूमत्वस्य
वर्त्तमानत्वात् अवच्छेदकत्वहानिः न च तथापि समवायेन प्रमेयस्य साध्यतायां भाववत्वादावतिव्याप्तिः प्रमेयत्वरूपस्यावच्छेदकस्याभावाप्रसिद्ध्या प्रमेयाभावस्य लक्षण
घटकत्वादिति वाच्यं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मान्यूनवृत्तितत्वस्यैव विवक्षितत्वात् तत एव समवायेन सत्ताश्रयस्य साध्यत्वेपि तादृशावच्छेदकीभूतस्य स
त्वस्याभाववति सामान्यादौ साध्यतावच्छेदकताघटकीभूतसमवायसम्बन्धेन वृत्तेरप्रसिद्धावपि भाववत्वादिहेतौ नातिव्याप्तिः। इदन्तु चिन्त्यते तादृशप्रतियोगितावच्छेद
कानतिरिक्तवृत्तिभिन्नत्वापेक्षया नञर्थद्वयाप्रवेशेन लाघवात्तादृशावच्छेदकयद्यतत्तत्त्वसेकातिरिक्तवृत्तित्वं साध्यतावच्छेदकस्य विशेषणं वक्तुमुचितं ननु धूमादिम
न्निष्ठाभावप्रतियोगितावच्छेदकं यद्यद्द्रव्यादि निष्ठं तार्णतार्णेदहनोभयत्वयावत्त्वं वा तदनतिरिक्तवृत्त्येव वन्हित्वादिकमिति व्याप्तिलक्षणमसंभवीत्यत आह। स्वसमानेति
स्वमनतिरिक्तवृत्तित्वेनाभिमतम्। तथा च स्वसमानवृत्तिकं यद्धेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं तदनतिरिक्तवृत्तित्वमर्थः। ननु स्वसमानवृत्तिकत्वस्यान्यूनानतिरिक्त
वृत्तित्वे तथा च वन्हिनिष्ठयावत्वादेरपि समवायादिना वन्हित्वादिसमानवृत्तित्वमेवात आह। तत्वचेति स्वसमानवृत्तिकत्वंचेत्यर्थः पर्य्याप्तीति न च वन्हित्वपर्य्याप्त्यधिक
रणेयावत्स्येव वन्हौ वन्हिवृत्तियावत्वादेः पर्य्याप्तत्वाद्वन्हित्वस्यावच्छेदकत्वं दुर्वारमिति वाच्यं स्वपर्य्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकत्वस्योक्तत्वात् वन्हित्वपर्य्याप्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·अ
३

वच्छेदकीभूततत्तद्वह्नित्वावच्छेदेन यावत्त्वादेरपर्य्याप्तत्वात् नचैवमनतिरिक्तवृत्तित्ववैयर्थ्यं वह्नित्वपर्य्याप्त्यवच्छेदकधर्मावच्छिन्नपर्य्याप्तिकतत्तद्वह्न्यन्यतरत्वादिकमादा
यवह्नित्वस्यापि पारिभाषिकावच्छेदकत्वापत्तेरिति भावः यावत्त्वादिकमिति आदिना तार्णातार्णोभयत्वादिसंग्रहः नतयेति नवह्नित्वपर्याप्त्यधिकरणपर्य्याप्तिकमित्यर्थः ननु
पर्य्याप्तिः समवायः स च तार्णातार्णोभयत्वादावव्याप्त एवेत्यत आह। पर्याप्तिश्चेति अयमेको घट इति एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्य्याप्तिं दर्शयितुं इमौ द्वावित्यु
3 भयवृत्तिधर्मावच्छेदेन द्वित्वस्य पर्य्याप्तिं दर्शयितुं अन्यथा द्वौ द्वित्ववानिति प्रतीत्योरविशेषप्रसंगादिति भावः नचायमेक इत्यादिप्रतीतेः समवायेनैवोपपत्तौ एकत्ववह्नित्वादेः पर्या
प्तिसंबन्धत्वे मानाभावात्ताद्रूप्येण साध्यतायां व्यभिचारिण्यपि व्याप्तिरिति वाच्यं इदंत्वावच्छिन्ने एव वह्नित्वमेकत्वं च पर्य्याप्तं न तु द्वित्वमित्याद्यनुभवादेव तदभ्युपगमादि
ति भावः व्यासज्यवृत्तित्वतदन्यत्वान्यतररूपेणैव स्वस्वसमानवृत्तित्वोक्त्यापि वह्नित्वादिवारणसंभवे स्वपर्य्याप्ती त्यादिपर्यंतानुधावनस्य प्रयोजनमाह त्रित्वादिकमिति।
तथाच धूमवह्निद्वित्वाभावप्रतियोगितावच्छेदकस्य वह्निधूमघटत्रितयत्वस्य व्यासज्यवृत्तितया स्वसमानवृत्तिकस्य तस्यैवानतिरिक्तवृत्तित्वं वह्निधूमोभयत्वस्यापीति ता
द्रूप्येण स्वसमानवृत्तिकत्वोक्तौ वह्निधूमोभयवान् धूमादित्यादावेव व्याप्तिलक्षणाव्याप्तिः स्यादिति भावः यद्यपि तार्णातार्णोभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगितावच्छेदकता
घटकसंबंधः पर्य्याप्तिरेव न तु समवायः तार्णमात्रसत्त्वेपि तार्णातार्णोभयं नास्तीति प्रतीतेः तथाच प्रतियोगितावच्छेदकताघटकपर्य्याप्तिसंबन्धेन तादृशोभयत्वाद्यभाव
वति प्रत्येकवह्नौ वृत्तिमत्त्वाद्वह्नित्वादेरवच्छेदकत्वासंभवात् स्वसमानवृत्तिकेत्यर्थं तथापि प्रत्येकवह्नौ पर्य्याप्तिसम्बन्धेनापि तार्णातार्णोभयत्वादेरभावः किंतु
घटादावेव अन्यथा तत्सम्बन्धेन प्रत्येकावृत्तिधर्मस्य तत्संबंधेन समुदायावृत्तित्वनियमात् उभयत्रैव प्रत्येकं द्वित्वाभावसत्त्वादिमौ न द्वावित्यपि प्रतीत्यापत्तेः नचैवमय
द्वावित्यपि प्रत्यक्षप्रतीतिः प्रमास्यादेकव्यक्तावपि द्वित्वस्य पर्य्याप्तिसम्बन्धेन सत्त्वादिति वाच्यं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यादिप्रतीतेर्मूलावच्छेद्यसमवायेन क
पिसंयोगाद्यवगाहित्ववदुक्तप्रतीतेरपीदंत्वावच्छेद्यपर्य्याप्तिसंबन्धेन द्वित्वावगाहितया प्रमात्वायोगात् एकव्यक्तेरिदंत्वावच्छेद्यपर्य्याप्तिसंबधेन द्वित्वरहितत्वात् अ
तएवायं न द्वावित्यादिप्रतीतेः प्रमात्वमुपपद्यते इदंत्वावच्छेद्यपर्य्याप्तिसम्बन्धेन यो द्वित्वस्याभावस्तद्वन्निं तदवगाहितत्वात् नचेदंत्वावच्छेद्यपर्य्याप्त्यप्रसिद्धिः एकत्वव
ह्नित्वादौ तत्सौलभ्यात् एकत्वं वह्नित्वं चेदंत्वावच्छिन्ने पर्य्याप्तं न तु द्वित्वादिकमित्यनुभवस्य सर्वसिद्धत्वात् नचैकस्य द्वित्वपर्य्याप्त्यधिकरणत्वे घटद्वयशून्येपि गृहा
दावत्र घटाविति प्रतीतिः प्रमास्यादिति वाच्यं तद्गृहनिष्ठघटे घटद्वयत्वावच्छेदेन तद्गृहवृत्तित्वविरहात् घटद्वयत्वावच्छेदेन तद्गृहवृत्तित्वावगाहिन्याः प्रोक्तप्रतीतेर्भ्रम राम·
त्वात्। अतएव घटौ न तद्गृहनिष्ठावित्याकारकधीस्तत्र प्रमा तद्गृहस्थितस्यापि घटस्य घटद्वयत्वावच्छेदेन तन्निष्ठत्वाभावसंभवात् घटपटयोर्न घटत्वमित्यादिप्रतीतेः प्रमात्व २

CC-0. In Public Domain. Digitization by eGangotri

नुरोधेन व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकस्य प्रतियोगिमत्यपि तदभावस्य सर्वसंमतत्वात् न च घटत्वादौ घटपटोभयवृत्तित्वाभाव एवोक्तप्रतीतिविषयः सामान्य·
घटयोर्न समवायेन घटत्वमित्यादौ सामान्यघटोभयसमवेतत्वाप्रसिद्ध्या तदभावस्याभानासंभवादिति सम्प्रदायविदः परे तु तदनतिरिक्तवृत्तित्वमथ च तदभाववदवृत्तित्वं
तथा सति हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं प्रत्येकं तदभाववान्वह्निधूमश्चेति तदुभयवृत्तित्वस्यैव वह्निधूमोभयत्वे सत्त्वात् तादृप्येण साध्यता·
यां वह्न्यादिहेतावतिव्याप्त्यापत्तेः किन्तु तादृशप्रतियोगितावच्छेदकवती यावती व्यक्तिस्तद्भेदकूटवदवृत्तित्वमेव तथा वाच्यं तथा च वह्निमान्धूमादित्यत्राव्याप्तिरेव तादृशाव·
च्छेदकीभूतयत्तार्णातार्णोभयत्वादिकं तद्वतो निखिलवह्नेः प्रत्येकभेदकूटवति वह्नित्वस्यावृत्तेरतः स्वसमानवृत्तिकत्वं देयमेवेति वदन्ति तन्न तुच्छं हेतुमन्निष्ठाभावप्र·
तियोगितावच्छेदकं यद्धूमत्वं तदभाववति पर्याप्तिसंबन्धेन वह्निधूमोभयत्वस्यावृत्तित्वादेव तादृप्येण साध्यतायां वह्निहेतावतिव्याप्त्यभावाद्भेदकूटनिवेशवैयर्थ्यतापात
दिति केचित्तु तार्णातार्णोभयेनास्तीति प्रतीतौ प्रतियोगितावच्छेदकतानिर्वाहकः समवाय एव सम्बन्धो भासते न तु पर्याप्तिः दण्डिपुरुषत्वाश्रयस्य सत्त्वेऽपि तदवच्छिन्ना·
भाववत्तादृशोभयत्वाश्रयस्य तार्णमात्रस्य सत्त्वेऽपि तादृशोभयत्वावच्छिन्नाभावो न विरुद्धस्तदवच्छिन्नाधिकरणतया साकमेव तस्य विरोधात् एवं च यथाश्रुतमेव स
म्यगित्याहुस्तच्चिन्त्यं वस्तुतस्तु समवायेन प्रमेयसाध्यकेऽभावत्वादिहेतावतिव्याप्तिवारणार्थमवश्यं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य हेतुमन्निष्ठाभावप्र·
तियोगितावच्छेदकं यदन्यूनवृत्तित्वमर्थो वाच्यः तत्र न्यूनवृत्तित्वं न प्रतियोगितावच्छेदकताघटकसम्बन्धेन वाच्यं वह्निधूमोभयवान्वह्नेरित्यादावतिव्याप्तेः हेतुम·
न्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं तस्य तादृशपर्याप्त्यधिकरणं यद्वह्निधूमोभयं तत्प्रत्येकनिष्ठस्य पर्याप्तिसंबन्धावच्छिन्नाभावस्य प्रतियोगित्वसत्त्वेन
वह्निधूमोभयत्वादिकं प्रत्यन्यूनवृत्तित्वात् किन्तु स्वावच्छिन्नप्रतियोगित्वसम्बन्धेनैव तथात्वं वाच्यं तथा च वह्निनिष्ठयावत्तार्णातार्णोभयत्वादेरपि स्वावच्छिन्नप्रतियो
गित्वसम्बन्धेन वह्नित्वादिकं प्रत्यन्यूनवृत्तित्वात् वह्निमान्धूमादित्यादौ वह्नित्वादेरवच्छेदकत्ववारणाय स्वसमानवृत्तिकत्वेनावच्छेदकं विशेषणीयमिति युक्तमुत्पश्या
मः ननु प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य घटकं प्रतियोगितावच्छेदकत्वं यदि प्रतियोगितानतिरिक्तवृत्तित्वरूपं तदा तार्णातार्णोभयत्वावच्छिन्नाभावमादाय·
वह्निमान्धूमादित्यादौ वह्नित्वं पारिभाषिकावच्छेदकं स्यादत आह घटकमिति प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे गुरुरूपेण साध्यतायामव्याप्तिमपाकर्तुमा
ह एवं चेति ननु धूमत्वमेकस्मिन्नेव पर्याप्तमित्यादिप्रतीतेः प्रत्येकवृत्तिधर्मावच्छिन्नाधिकरणताकत्वावगाहितयैवोपपत्तौ धूमत्वादेः पर्याप्तिसंबन्धत्वे मानाभाव इति
धूमवान्वह्नेरित्यादावतिव्याप्तिः स्वपदेन धूमत्वस्य गृहीतुमशक्यत्वात् एवं सत्तात्वस्य विशिष्टसत्तात्वानतिरिक्तवृत्तितया सत्त्वादिसाध्यकजातिमत्त्वादिहेतावव्याप्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्चेत्यन आह। वस्तुतस्त्विति। तदवच्छिन्नेति। हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभाववत्यसम्बद्धं यद्धर्मविशिष्टसामान्यं तदेव पारिभाषिकावच्छे
दकमित्यर्थः अत्र तदाश्रयप्रतियोगिताकाभावत्वकत्वो तादृशधूमत्वाश्रयप्रतियोगिकोभयाभावादिमति प्रमेये धूमत्वविशिष्टस्यासंबद्धतयावच्छेदकत्वं न स्यात्किंतु गग
नत्वादेरेव तथात्वं स्यादत उक्तं तदवच्छिन्नेति प्रतियोगित्वं साध्यतावच्छेदकसम्बन्धेन ग्राह्यं तेनायं घटएतत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं पटत्वं संब
धसामान्येन कालिकसंबंधेन वा तदवच्छिन्नाभाववति नित्यगुणगगनादौ घटत्वत्वविशिष्टस्यासंबद्धत्वेपि न व्याप्तिः पर्वतादेरुत्पत्तिकालावच्छेदे न संयोगसम्बन्धावच्
छिन्नधूमाभाववत्वात् तत्र च धूमत्वविशिष्टस्य सम्बद्धत्वात् तदसम्बद्धत्वविशिष्टसामान्यकं गगनादिकमुपादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगिव्य
धिकरणत्वेन तदवच्छिन्नोभावो विशेष्यः प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नासंबंधी तदवच्छिन्नाभाववान् ग्राह्य इति तु पर्यवसितार्थः। ते
न संयोगसम्बन्धावच्छिन्नधूमाभावस्य धूमवत्पर्वतादौ समवायादिसंबंधेन प्रतियोगिव्यधिकरणत्वेपि धूमत्वस्य नावच्छेदकत्वहानिः नवा द्रव्यं घटत्वादित्यादौ हेतुम
न्निष्ठाभावप्रतियोगितावच्छेदकं यद्घटभिन्नद्रव्यत्वं तत्प्रतियोगिव्यधिकरणे तदवच्छिन्नाभाववति गुणादौ द्रव्यत्वत्वविशिष्टस्यासत्वेप्यव्याप्तिः। वस्तुतो निरुक्त
प्रतियोग्यनधिकरणत्वमेव तदवच्छिन्नाभाववतः साध्यतावच्छेदकसंबंधेन वाच्यं न तु प्रतियोगितायास्तत्संबन्धावच्छिन्नत्वं कृत्यनियामकसम्बन्धेन साध्यतायां तत्सं
बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याव्याप्तिप्रसंगादिति ध्येयं न च घट वान्महाकालत्वादौ तादृशप्रतियोगितावच्छेदकं यद्गगनत्वं तदवच्छिन्नाभावस्य प्रतियोगिवैय
धिकरण्याप्रसिद्ध्याव्याप्तिरिति वाच्यं अत्रापि साध्यतावच्छेदकसम्बन्धसामान्ये तादृशधर्मावच्छिन्नप्रतियोगिकत्वयद्यनुयोगिकत्वोभयाभावस्तदसम्बद्धत्वस्य विवक्षितः
त्वात् तदसम्बद्धत्वमपि साध्यतावच्छेदकसम्बन्धेन सम्बद्धत्वसामान्याभावो बोध्यः तेन घटत्वाद्यवच्छिन्नाभाववति गगनत्वविशिष्टस्यापि यथाकथंचित्तादात्म्यादिना सं
बद्धतया न पारिभाषिकावच्छेदकाप्रसिद्धिनिबन्धनो व्याप्तिलक्षणासंभवः * न वा तादृशप्रतियोगितावच्छेदकीभूतमहानसीयवह्नित्वावच्छिन्नाभाववति जलादौ वह्नित्ववि
शिष्टस्यासम्बद्धत्वाद्वह्निमान्धूमादित्यादावव्याप्तिः धूमवन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्वह्नित्वावच्छिन्नाभाववति वह्नित्वविशिष्टस्य तत्तद्वह्नेरसम्बद्धत्वाद्व
ह्निमान्धूमादित्यादौ वह्नित्वमप्यवच्छेदकं स्यादतः सामान्यपदं ननु कालिकादिसम्बन्धेन गगनत्वविशिष्टघटादितस्य तादृशप्रतियोगितावच्छेदकीभूतगगनत्वाद्यवच्छि
न्नाभाववति साध्यता घटकसम्बन्धेन सम्बद्धत्वात् पारिभाषिकावच्छेदकाप्रसिद्ध्याव्याप्तिलक्षणासम्भवः नच साध्यतावच्छेदकताघटकसम्बन्धेन स्ववैशिष्ट्याभि
धानान्नैष दोषः पुरुषनिष्ठसंयोगसम्बन्धेन दण्डवतः कालिकविशेषणतया साध्यतायां महाकालत्वहेतावव्याप्त्यापत्तेः गगनत्वादेः पुरुषनिष्ठसंयोगसम्बन्धेनावृत्त्यापा

CC-0. In Public Domain. Digitization by eGangotri

रिभाषिकावच्छेदकाप्रसिद्धेः नचहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं यादृशसम्बन्धावच्छिन्नं तेनैवसम्बन्धेन स्ववैशिष्ट्याभिधानात् घटत्वगगनत्वादौ पारिभाषि-
कावच्छेदकत्वस्फलभमितिवाच्यं धूमत्वप्रकारकप्रमाविशेष्यवान्वन्हेरित्यादावतिव्याप्तिः साध्यतावच्छेदकमपेक्ष्यलघोर्धूमत्वस्यैव समवायेन हेतुमन्निष्ठसंयोगसंबन्धा
वच्छिन्नाभावप्रतियोगितावच्छेदकतया समवायेन च धूमत्वप्रकारकप्रमाविशेष्यत्वस्यारत्वात्तस्य पारिभाषिकावच्छेदकत्वाभावप्रसंगात् नच साध्यत्वतादृशप्रतियोगि
त्वयोरन्यतरावच्छेदकताघटकसंबंधेनैव स्ववैशिष्ट्यस्य विवक्षणान्नोक्ताव्याप्त्यतिव्याप्त्योः प्रसंगइतिवाच्यं तादात्म्येन धूमवतः संयोगेन साध्यतायां द्रव्यत्वादावतिव्याप्त्या
पत्तेः धूमापेक्षया लघुत्वेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धूमत्वं तदवच्छिन्नाभाववति तन्नत्सरमाणो प्रतियोगितावच्छेदकताघटकसमवायसंबंधेन धूमविशिष्ट
स्यपरमाणोः साध्यताघटकसंयोगसम्बन्धेनसंबद्धतया धूमस्य पारिभाषिकावच्छेदकत्वविरहादिति चेदत्राहुः यद्यत्संबंधेन यद्धर्मविशिष्टसामान्यं निरुक्तधर्मावच्छिन्नाभा
ववति साध्यतावच्छेदकसंबंधेनासंबद्धं तत्तत्संबंधेन तत्तद्धर्मावच्छिन्नविशेष्यताभिन्नयत्साध्यतावच्छेदकताघटकसंबंधावच्छिन्नं विशेष्यत्वं तदवच्छेदकसाध्यतावच्छे
दकधर्मवत्त्वस्य विवक्षितत्वान्नोक्तदोषः समवायेन वन्हित्वावच्छिन्नविशेष्यतायास्स्वरूपादिसंबंधेन गगनत्वावच्छिन्नविशेष्यताभिन्नत्वाद्वावच्छेदकाप्रसिद्धिर्निवं
धनासंभवस्यन्युदासादिति नन्वेवमपि विशिष्टसत्तावान्जातेरित्यादावतिव्याप्तिस्तादृशद्रव्यत्वाद्यभाववति गुणादौ विशिष्टसत्वस्य संबद्धत्वात् स्वस्यतादृशधर्मावच्छि-
न्नाभाववन्निष्ठसम्बन्धितानवच्छेदकत्वविवक्षया कथंचित्तत्रातिव्याप्तिवारणेपि सत्तावान्भावत्वादित्यादावतिव्याप्तिः सत्तात्वाद्यवच्छिन्नाभाववति सामान्यादौ साध्यता
घटकसमवायसंबंधित्वाप्रसिद्धेः सत्तात्वस्य निरुक्तावच्छेदकत्वाभावात् नच साध्यतावच्छेदकसंबंधसामान्ये तदवच्छिन्नाभाववदनुयोगिकत्वयद्धर्मावच्छिन्नप्रतियो
गिकत्वोभयभावस्तत्त्वं विवक्षितमतो नोक्तदोषः तथासति प्रमेयधूमवान्वन्हेरित्यादावतिव्याप्त्यापत्तेः धूमत्वघटिततादृशोभयत्वापेक्षया प्रमेयधूमत्वघटिततादृशोभयत्व
स्यगुरुतया तदवच्छिन्नप्रतियोगित्वाप्रसिद्धेरित्यस्वरसादाह। स्वविशिष्टेति। स्वपारिभाषिकावच्छेदकत्वेनाभिप्रेतं तथाचहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदके यद्वि
शिष्टसंबधिनिष्ठाभावप्रतियोगितानवच्छेदकं स एव पारिभाषिकावच्छेदकः तदन्यत्वं साध्यतावच्छेदकविशेषणमिति भावः अत्र विशिष्टसंबंधित्वं साध्यतावच्छेदकसंबंधे
नग्राह्यं तेनप्रतियोगितावच्छेदकमात्रस्यैव यथाकथंचित्संबंधेन यत्स्वविशिष्टसंबंधितन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि न पारिभाषिकावच्छेदकाप्रसिद्धिः अभाव
श्चात्र प्रतियोगिव्यधिकरणो बोध्यः तेन घटत्वाद्यवच्छेदकमात्रस्यैव स्वविशिष्टसंबधिनिष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् पारिभाषिकावच्छेद
काप्रसिद्ध्या वन्हिमान्धूमादित्यादौ नाव्याप्तिः प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यसंबन्धित्वं स्वविशिष्टसम्बन्धिनो विशेषणं द्वयमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा॰ अ॰ तुफलितार्थः तेनाभावस्यैवयथाकथंचित्कालिकादिसंबंधेनप्रतियोगिनःसंबंधिनिरृत्तावपिनक्षतिः नवाहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतविशिष्टसत्तात्वादेःस
५ त्तात्वाद्यवच्छिन्नसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेपिसत्तावान् जातेरित्यादावव्याप्तिः तादृशप्रतियोगितानुसाध्यतावच्छेदकसंबंधाव
च्छिन्नत्वयोरुक्तं तेननघटत्वादेरपिस्वविशिष्टसंबंधिनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकत्वेपिवन्हिमान्धूमादित्यादावच्छेदकाप्रसि
६ द्धिनिबंधनोदोषः वस्तुतः पूर्ववदिहापिसाध्यतावच्छेदकसंबंधेननिरुक्तप्रतियोग्यसंबंधित्वमेवस्वविशिष्टसंबन्धिनोवाच्यं तेनवृत्तिनियामकसम्बंधेनसाध्यतायां ता
दृशसंबंधावच्छिन्नप्रतियोगित्वा प्रसिद्धावपिनाव्याप्तिः प्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वंहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकताघटकसम्बन्धेन
बोध्यं तेनघटत्वादेर्विषयितासम्बन्धेनघटत्वादिविशिष्टस्यज्ञानादेःसंयोगेनाभावस्यप्रतियोगिव्यधिकरणस्यघटादिविशिष्टसंबंधिनिष्ठस्यप्रतियोगितायाविषयितासम्बन्धेनाव
च्छेदकत्वेपिनतादृशावच्छेद काप्रसिद्धिः। ननूक्तपारिभाषिकावच्छेदकघटकरूपस्यप्रवेशमूलोक्तप्रतियोगिव्यधिकरणस्यप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकर
णार्थकत्वेविफलंहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्यद्रव्यत्वत्वादेर्विशिष्टसत्तात्वाद्यवच्छिन्न वन्हिष्ठाभावप्रतियोगितानवच्छेदकत्वादेर्वविशिष्टसत्तावान्जातेरित्या
दावतिव्याप्त्यभावात् नचसंयोगेनघटाद्यभावस्यैवतत्समनियतघटविशिष्टवाच्यत्वाद्यभावत्वात् तत्प्रतियोगित्वावच्छिन्नस्यचवाच्यत्वस्यसर्वत्रसत्वात् प्रतियोगिव्यधि
करणस्यैवाप्रसिद्धिःस्यादिति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यप्रवेशोनस्यादितिवाच्यं यत्प्रतियोगित्वावच्छिन्नस्यानधिकरणंहेत्वधिकरणंतत्प्रति
योगितावच्छेदकीभूतधर्मोयद्विशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकस्तत्पारिभाषिकावच्छेदकमित्यस्यनिर्दोषत्वात् घटाभावस्यघटविशिष्ट
वाच्यत्वाभावस्वरूपत्वेपितस्यघटत्वावच्छिन्नंयत्प्रतियोगित्वंतदाश्रयव्यधिकरणत्वस्यसकलभत्वादिति नचतत्रावच्छेदकभेदेपिप्रतियोगितैक्यमुक्तंघटपटाद्यभावानाम
व्यकप्रतियोगिताकत्वापत्तेरितिचेदत्रभावः यत्प्रतियोगिताश्रयानधिकरणंहेत्वधिकरणंतत्प्रतियोगितावच्छेदकेत्याद्यभिधानेवन्हिमान्धूमादित्यत्राव्याप्तिः स्वरूपसम्बंधा
त्मिकायाःप्रतियोगितायाःप्रतिव्यक्तिभिन्नत्वात् वन्हित्वावच्छिन्नाभावीयंमहानसीयवन्हिवन्हिनिष्ठयत्प्रतियोगित्वंतदवच्छिन्नानधिकरणहेतुमत्पर्वतादिनिष्ठवन्हिसामान्या
भावप्रतियोगितावच्छेदकीभूतवन्हित्वादेःस्वविशिष्टसंबंधिनिष्ठनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि
वैयधिकरण्यप्रवेशेतुतादृशप्रतियोगितायावच्छेदकंयद्वन्हित्वादिकं तदवच्छिन्नानधिकरणत्वं नहेतुमतःपर्वतादेरितिसदोषइत्याहुः परेतुप्रतियोगिभेदेप्येकधर्मावच्छिन्न राम॰
प्रतियोगितालाघवादेकैवेतिमतेवन्हिमान्धूमादित्यादौनाव्याप्तिः परंतुतद्रूपान्यत्वविशिष्टसत्तावान्रूपत्वादवतिव्याप्तिरेवस्यादादिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधि ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणाभावोमौलोनस्यात् प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्यघटत्वादेः सर्वस्यैवतद्रूपान्यत्वविशिष्टसत्तात्वावच्छिन्नसंबंधिनिष्ठाभावप्रतियोगित
वच्छेदकत्वेनतादृशसत्तात्वस्यपारिभाषिकानवच्छेदकत्वादितिप्राहुः इदंत्ववधातव्यं अत्रापिलक्षणेहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकंयद्यत्संबंधेनयादृशयादृश
धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकंतत्तत्संबंधेनतादृशतादृशधर्मावच्छिन्नविशेष्यतान्यसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नविशेष्यतावच्छेद
कत्वमेवसाध्यतावच्छेदकेदृष्टव्यंनातःप्रागुक्तदोषाणामवकाशोनवामहानसीयवन्हित्वादेः पारिभाषिकावच्छेदकतयातदन्यत्वस्यवन्हित्वादावसत्वेपिवन्हिमान्धूमा
दित्यादावव्याप्तिः विशिष्टवन्हित्वाभिन्नस्यापिवन्हित्वस्यविशिष्टवन्हित्वावच्छिन्नविशेष्यतान्यविशेष्यतावच्छेदकत्वानपायात् ननुघटवान्महाकालत्वादित्यादावव्या
प्तेःगगनत्वादिविशिष्टस्यकालिकादिसंबंधेनसंबंध्यप्रसिद्ध्यापारिभाषिकावच्छेदकत्वासंभवात् नचसाध्यतावच्छेदकसंबंधसामान्येयादृशधर्मावच्छिन्नाभाववदनु
योगिकत्वयद्धर्मविशिष्टप्रतियोगिकत्वोभयाभावस्तत्त्वंविवक्षितं नचगगनत्वादौसुलभमितिवाच्यं तथासतिप्रमेयधूमवान्वन्हेरित्यादावतिव्याप्तेरित्युक्तत्वात् धूम
त्वविशिष्टप्रतियोगिकत्वघटिततादृशोभयत्वापेक्षयाप्रमेयधूमत्वविशिष्टप्रतियोगिकत्वघटिततादृशोभयत्वस्यगुरुत्वेनतदवच्छिन्नप्रतियोगित्वाप्रसिद्धेरितिचेदत्र
वदंतिस्वविशिष्टप्रतियोगित्वानिविशिष्योपादायसाध्यतावच्छेदकसंबंधसामान्येहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूततत्त द्धर्मावच्छिन्नाभाववदनुयो
गिकत्वस्ययद्धर्मविशिष्टप्रतियोगिकत्वव्यक्तीनांप्रत्येकस्यचद्वयोर्व्यतिरेकःसधर्मः पारिभाषिकावच्छेदकः प्रमेयधूमत्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वस्यगुरु
त्वात्प्रतियोगितानवच्छेदकत्वेपितत्तद्धूमप्रतियोगिकत्वघटितोभयाभावकूटमादायैवनातिव्याप्तिः कालोघटवान्महाकालत्वादित्यादौचगगनत्वमेवतादृशावच्छेद
कमादायलक्षणसमन्वयइतिवस्तुतस्तु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकोयोधर्मः प्रतियोगिव्यधिकरणतदवच्छिन्नाभाववत्त्वावच्छेदेनसाध्यताघटकसंबं
धावच्छिन्नसंबंधितानिरूपितविशेषणतयायद्धर्मविशिष्टसंबंधित्वसामान्याभावस्तत्वेयद्धर्मेहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोग्यनधिकरण
तावच्छेदकत्वसामान्यस्यप्रकृतसाध्याधिकरणतावच्छेदकत्वनिरूपितस्वरूपसंबंधेनाभावस्तत्त्वंवास्वविशिष्टसंबं धीत्यादिनिरुक्तेस्तात्पर्यात् गगनत्वादौसहजातःपा
रिभाषिकावच्छेदकत्वंसुलभमिति केचित्तुतादात्म्यसाध्यतावच्छेदकान्यतरसंबंधेनयः स्वविशिष्टसंबंधीतन्निष्ठोयस्तदन्यतरसंबंधेनप्रतियोगिव्यधिकरणोऽभावस्तत्प्र
तियोगितानवच्छेदकतत्त्वमुक्तलक्षणार्थः तथाचतादृशान्यतरतादात्म्यसंबंधेनगगनत्वविशिष्टसंबंधिन्याकाशेवर्त्तमानोगगनाभावोनतादृशान्यतरसंबंधेनप्रतियो
गिव्यधिकरणस्तस्यतादात्म्येनप्रतियोगिसमानाधिकरणत्वात् किंतुघटाभावएवतथेतितत्प्रतियोगितानवच्छेदकमेवहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतंगगनत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·अ मितितमाद्यैवकालोघटवान्महाकालत्वादित्यादौलक्षणसंगतिः नचैवंधूमगगनाभावान्यतरस्यसंयोगेनसाध्यत्वेवन्ह्यादावतिव्याप्तिः तादृशान्यतरत्वापेक्षयालघुत्वेनधूम-
६ त्वस्यैवहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात्तस्यचसंयोगतादात्म्यान्यतरसंबंधेनयस्तदन्यतरत्वविशिष्टस्यसंबंधीगगनाभावस्तन्निष्ठस्यतादात्म्यसं-
योगान्यतरसंबंधेनप्रतियोगिव्यधिकरणस्यधूमाभावस्यप्रतियोगितावच्छेदकतयाधूमगगनाभावान्यतरत्वस्यपारिभाषिकावच्छेदकत्वविरहादितिवाच्यं धूमगगना-
6 भावान्यतरत्वस्याप्यखंडस्यधूमत्वतुल्यतयातस्यैवहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्यस्वविशिष्टसंबंधिनिष्ठतादृशसंबंधावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगि-
तानवच्छेदकतयापारिभाषिकावच्छेदकत्वेनातिव्याप्तिविरहादितिप्राहुस्तन्मते रूपवान्घटत्वादित्यादावव्याप्तिप्रसंगात् हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकंयद्रूपत्व-
द्रव्यान्यतरत्वंतस्यतादृशसंबंधेनरूपत्वविशिष्टसंबंधिनिष्ठतादृशसंबंधावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेनरूपत्वस्यपारिभाषिकावच्छेदकत्वात्त-
थाहितादात्म्यसमवायान्यतरसंबंधेनयद्रूपविशिष्टस्यसंबंधिरूपंपृथिव्यादिकंवातत्रतादात्म्यसमवायान्यतरसंबंधेनप्रतियोगिव्यधिकरणोनरूपत्वद्रव्यान्यतरत्वावच्छिन्नाभा-
वःसमवायेनरूपेरूपत्वाख्यप्रतियोगिनस्तादात्म्येनचपृथिव्यादौद्रव्यात्मकप्रतियोगिनः संबद्धत्वात् किंतुरूपत्वविशिष्टस्यतथाविधसंबंधिनिष्ठोयः पटाद्यभावएवतादृशप्रति-
योगिव्यधिकरणइतिरूपत्वद्रव्यान्यतरत्वंतत्प्रतियोगितानवच्छेदकत्वध्रौव्यात् नचहेतुसमानाधिकरणस्याभावस्यापितादृशान्यतरसंबंधेनप्रतियोगिवैयधिकरण्यस्यव-
क्तव्यत्वान्नैषदोषः तथासतिसमवायेनघटस्यप्रमेयस्यवासाध्यत्वेतादात्म्येनहेतौघटत्वप्रमेयेवातिप्रसंगादिति दिक् अतएवेति वस्तुतस्त्वित्यादिकल्पस्यादृतत्वादेवेत्य-
र्थः यथाश्रुतस्यावच्छेदकानतिरिक्तवृत्तित्वस्यादरेतुसत्तावान्जातेरित्यादावव्याप्तिः स्यादेवेतिभावः जातिमन्निष्ठाभावप्रतियोगितायासत्तात्वान्यूनवृत्तित्वविशिष्टसत्तात्वाव-
च्छेद्यत्वसमवायसंबंधावच्छेद्यत्वोभयसत्वादवच्छेद्यताघटितलक्षणस्यापिप्रागुक्तस्यापिसत्तावान्जातेरित्यत्राव्याप्तिरतस्तदपिपरिष्करोति एवमितिस्वसाध्यतावच्छेद-
कं अत्रस्ववैशिष्ट्यंसाध्यतावच्छेदकताघटकसम्बंधेनैववाच्यं तेनधूमत्वादीनां कालिकादिसंबंधेनधूमत्वादिविशिष्टस्यघटादेःसंयोगिनिवर्तमानस्याभावस्यप्रतियोगि-
तावच्छेदकत्वेपिधूमवान्वन्हेरित्यादौनातिव्याप्तिः स्वविशिष्टस्यसंबंधित्वंसाध्यतावच्छेदकसंबंधेनग्राह्यं तेनधूमत्वाद्यवच्छिन्नप्रतियोगितायांकालिकादिसंबंधेनयद्धूमत्व-
विशिष्टस्यसम्बंधितन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वविरहेपिधूमवान्वन्हेरित्यादौनातिव्याप्तिः नचसामान्यतोधूमसंबंधिनिसंयोगेनसर्वस्यैवाभावसत्वाद्धूमवन्नि-
ष्ठसंयोगसंबंधावच्छिन्नप्रतियोगितानवच्छेदकाप्रसिद्ध्याकथमितिव्याप्तिरितिवाच्यं गोत्वत्वघटाभावत्वादेरेवतत्प्रसिद्धेः संयोगसंबंधावच्छिन्नगोत्वाद्यभावप्रतियोगितायाला- राम
घवेनगवेतरासमवेतादिभिरेवावच्छेदात् नचैवमपितदवच्छेद्यत्वाप्रसिद्धेरेवनातिव्याप्तिः गोत्वादिभेदप्रतियोगितायांतस्यालभ्यात् नहिसापिगवेतरासमवेतत्वमात्रावच्छि- ६

CC-0. In Public Domain. Digitization by eGangotri

न्नागोरूपादेर्गोत्वभेदासत्वप्रसंगात् यद्गोत्वत्वावच्छेद्यत्वसंयोगसंबन्धावच्छेद्यत्वोभयत्वावच्छिन्नाभावाप्रसिद्धेरेव नातिव्याप्तिः गवेतरासमवेतत्वाद्यवच्छेद्यत्वमा
त्रघटिततादृशोभयत्वस्यैव लघुत्वेन प्रतियोगितावच्छेदकत्वादिति विभाव्यते तदोक्तरीत्या वन्हिमान्धूमादित्यादावव्याप्तिवारणार्थमेव साध्यतावच्छेदकसंबन्धे
नस्वविशिष्टस्यसंबंधित्वंनिवेश्य इत्थंच निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये एवं साध्यवन्निष्ठाभावीयसंयोगसंबंधावच्छिन्नप्रतियो
गितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वसंयोगसंबन्धावच्छेद्यत्वोभयत्वावच्छिन्नाभावसत्वाद्धूमवान्वन्हेरित्यत्रैवातिव्याप्तिः गुरुतयोक्तक्रमेणतादृशोभयत्वा
वच्छिन्नाभावाप्रसिद्ध्या वन्हिमान्धूमादित्यादावव्याप्तिर्वास्यादतः प्रतियोग्यसंबन्धत्वेनापिस्वविशिष्टसंबंधीविशेषणीयः तदर्थश्च प्रतियोगितावच्छेदकसम्बन्धे
नप्रतियोगितावच्छेदकावच्छिन्नासम्बन्धित्वं तेन सम्बन्धसामान्येन यत्प्रतियोगितावच्छेदकावच्छिन्नासंबंधी वन्हित्वविशिष्टसम्बन्धी पर्वतादिस्तन्निष्ठस्यप्रत
योत्पन्नकर्मात्यन्ताभावस्य प्रतियोगितानवच्छेदकं यद्घटत्वादिकं तदवच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वयोश्च साधनवन्निष्ठाभावप्रतियोगितायां सत्वेपि वन्हिमा
न्धूमादित्यादौ नाव्याप्तिः नवाप्रतियोग्यसम्बन्धिसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकीभूतविशिष्टसत्तात्वाद्यवच्छेद्यत्वसमवायसम्बन्धावच्छेद्यत्वयोः सा
धनवन्निष्ठाभावप्रतियोगितायां सत्वेपि सत्तावान् जातेरित्यादावव्याप्तिप्रसंगः। प्रतियोगितावच्छेदकसबंधेन प्रतियोग्यसम्बन्धी यः साध्यतावच्छेदकावच्छिन्न
सम्बन्धितन्निष्ठाभावप्रतियोगितानवच्छेदकं नघटाद्यभावत्वगोत्वत्वादिकं तस्यापि साध्यवन्निष्ठतादृशभेदादिप्रतियोगितावच्छेदकत्वात् किंतु लघुसमनियतं
गुरुप्रमेयधूमत्वादिकमेव तथा तथाच तदवच्छेद्यत्वाप्रसिद्ध्या वन्हिमान्धूमादित्यादावसंभवो व्याप्तिर्वेत्यतः साध्यवन्निष्ठाभावप्रतियोगित्वमपि साध्यतावच्छे
दकसम्बन्धावच्छिन्नं ग्राह्यं तेन संयोगादिसंबधावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वप्रसिद्धेर्वलक्षणसंभवः वस्तुतः प्रागुक्तयुक्त्यात्रापि
साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिसाध्यतावच्छेदकावच्छिन्नसंबन्धिनो वक्तव्य ननु प्रतियोगितापितादृशसम्बन्धावच्छिन्नाग्राह्या नन्वेवमपिसा
ध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिसाध्यतावच्छेदकावच्छिन्नसम्बन्धिनिष्ठाभावाप्रसिद्ध्या विभुत्वविशिष्टघटवान्महाकालत्वादित्यादावव्याप्तिः महाका
लान्यत्वघटत्वावच्छिन्नाभावस्यैवतादृशस्य कथंचिन्महाकालेप्रसिद्ध्या तत्राव्याप्तिवारणेपि तद्वन्हीयसंयोगसम्बन्धेन वन्हेः साध्यतायां सद्धेतावव्याप्तिः तत्संबन्धेन यत्प्रतियो
गिसम्बन्धितदन्यत्वस्य तद्वन्हिमत्यभावात् महाकालनिरूपितविशेषणतया घटादेः साध्यतायां महाकालत्वहेतावुक्तक्रमेणाप्यव्याप्तिवारणासंभवाच्च तेन संबन्धेन यः
प्रतियोगिसंबन्धी तदन्यत्वस्य महाकाले विरहात् नच साध्यतावच्छेदकसम्बन्धसामान्ये साध्यतावच्छेदकावच्छिन्नसम्बन्धियत्किंचिद्वृत्त्यनुयोगिकत्वं यादृशप्रतियो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰अ॰ गितावच्छेदकावच्छिन्नप्रतियोगिकत्वोभयाभावस्तादृशप्रतियोगितानवच्छेदकावच्छिन्नत्वं निवेश्यम् अतो गगनाभाववह्नौ ऐव प्रसिद्धिरिति वाच्यं स्वरूपसंबन्धेन गगनादे
७ र्वृत्तिमत्त्वपक्षे एव प्रतियोगिताधर्मिकोभयाभावगर्भनिरुक्त्यादरात् तत्र गगनाभावमादाय प्रसिद्ध्यासंभवात् कालिकविशेषतायां गगनत्वावच्छिन्नप्रतियोगिकत्वसाध्य
वन्महाकालानुयोगिकत्वयोः सत्त्वादिति चेदेतदस्वरसेनैव प्रतियोगितेयोगित्यादिना प्रतियोगिवैयधिकरण्यमुपेक्ष्य लक्षणान्तरं वक्ष्यते इत्येके परे तु निरुक्तप्रतियोग्यसंबधिप्र
कृतसाध्यवन्निष्ठाभावप्रतियोगितायां यद्यद्धूमावच्छेद्यत्वसाध्यताघटकसंबन्धावच्छिन्नत्वोभयाभावः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणप्रकृतहेतुम
न्निष्ठाभावप्रतियोगितासामान्येपि तादृशोभयाभावकूटवत्त्वं विवक्षितं अस्ति च समवायाद्यवच्छिन्नघटाद्यभावप्रतियोगितायां यत्कालिकसंबंधावच्छिन्नत्वघटत्वावच्छिन्न
त्वोभयाभाववत्त्वं तद्वत्प्रतियोग्यनधिकरणमहाकालनिष्ठाभावप्रतियोगितासामान्येपीति घटवान्महाकालत्वादित्यादौ नाव्याप्तिः यद्यदिति वीप्सादरात् निरुक्तप्रतियोग्यन
धिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये एव गुणत्वावच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभयाभावसत्त्वेपि धूमवान्वन्हेरित्यादौ नातिव्याप्तिः धूमत्वावच्छेद्यत्वसं
योगसम्बन्धावच्छेद्यत्वोभयाभावस्यापि तादृशत्वेन तस्यैव प्रतियोग्यनधिकरणवन्हिमन्निष्ठाभावप्रतियोगितासामान्ये विरहात् संयोगसंबन्धावच्छिन्नधूमाभावप्र
तियोगितायां तदसत्त्वादित्याहुः ननु स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदके यत्र नानवच्छेदकत्वं न तादृशावच्छेदकप्रतियोगिकभेदमात्रं धर्ममात्रस्यैव तादृश
यत्किंचिदवच्छेदकभिन्नत्वेन व्याप्तिलक्षणासंभवप्रसंगात् किं तु तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकोभेदस्तथा चावच्छेदकत्वगर्भायां निरुक्तेः प्रमे
यधूमवान्वन्हेरित्यादावतिव्याप्तिः अवच्छेद्यत्वगर्भायास्तु प्रमेयवन्हिमान्धूमादित्यादावव्याप्तिः प्रमेयवन्हित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वप्र
तियोगितायां लाघवेन वन्हिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेनैवावच्छेदात् तत आह प्रतियोगितावच्छेति। तादृशावच्छेदकनिष्ठप्रतियोगिताव्यक्तयो विशेष्य तत्तदव
च्छेदकत्व[illegible]वच्छिन्नत्वेन प्रवेशनीया न तु अनुगततादृशावच्छेदकत्वावच्छिन्नत्वेन यतो गुरुधर्मस्यानवच्छेदकत्वे व्याप्तेर्दुर्वचत्वं स्यादित्यर्थः। स्वविशिष्टसम्बन्धिनिष्ठाभावी
यप्रतियोगिताविशेष्योपादाय तत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटवत्त्वं निवेशनीयमिति तत्त्व(?) व्याख्यानं तत्तत्प्रतियोगिताविशेषितावच्छेदकत्वव्यक्तीनां वा
त्विकतत्तदवच्छेदकत्वव्यक्तीरपेक्ष्य गुरुत्वेन तत्प्रतियोगितानिरूपितावच्छेदकत्वावच्छिन्नभेदानामप्यप्रसिद्ध्या दुर्वचत्वतादवस्थ्यात् यदि च समनियतनानाधर्माव
च्छिन्नप्रतियोगित्वस्य भेदे मानाभावस्तदा तत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटस्य प्रवेशेपि न क्षतिः तत्तत्प्रतियोगितावच्छेदकत्वस्य तत्तदवच्छेदकत्वसम राम
नैयत्याभावेन गुरुत्वस्याकिंचित्करत्वादिति ध्येयं सम्बन्धभेदमिति इदं च प्रागेव निरुक्तव्याख्यायां प्रपंचितं ननु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायाः सं ७

CC-0. In Public Domain. Digitization by eGangotri

योगत्वावच्छेद्यत्वेपि संयोगत्वस्य स्वविशिष्टसम्बंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात् संयोगीसत्त्वादित्यत्रातिव्याप्तिरत आह। भावत्वेति। निरुक्तित्रयेपि शेष:
तथा च निरुक्तप्रतियोग्यनधिकरणस्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं संयोगत्वे व्यस्ततमिति हेतुमन्निष्ठाभावप्रतियोगितापा: तदवच्छेद्यत्वाभा
वादेव नातिव्याप्तिरिति भाव: नन्वेवं गोमान्महाकालत्वादित्यत्राव्याप्ति: गोत्वविशिष्टसम्बन्धिनिष्ठस्याभावमात्रस्यैव साध्यताघटककालिकसम्बन्धेन प्रतियोगिसमा
नाधिकरणतया स्वविशिष्टसम्बन्धिनिष्ठप्रतियोग्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाप्रसिद्धेरत आह। कालिकेति तथा च स्वावच्छिन्नाधिकरणसाध्यवत्
खण्डकालनिष्ठाभावप्रतियोगितावच्छेदकतयैव तत्तद्व्यक्तित्वे निरुक्तावच्छेदकत्वं सुलभमिति भाव:। ननु हेतुमन्निष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावः
च्छेदकमात्रस्यैव घटत्वादिविशिष्टसम्बन्धिनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वात् पारिभाषिकावच्छेदकाप्रसिद्ध्या वन्हिमान्धूमादित्यादाव
व्याप्तिवारके द्वितीयनिरुक्तावभावप्रतियोगिवैयधिकरण्यप्रवेशस्य तामवच्छेद्यत्वघटिततृतीयनिरुक्तावपि हेतुमन्निष्ठाभावप्रतियोगितासामान्यस्यैव धूमत्वविशिष्टसं
बन्धिनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वाभावात् धूमवान्वन्हेरित्यादावतिव्याप्तिवारणार्थमभावेन तद्विशेषणदीयत्तां
प्रथमनिरुक्तौ तु प्रतियोगिवैयधिकरण्यमभावविशेषणं किमर्थमित्याशङ्क्यते न चेति वाच्यमिति परेणान्वय: संयोगीद्रव्यत्वादित्यादावव्याप्तिवारणमेतस्य फलं अन्यथो
पपन्नमिति संयोगत्वावच्छिन्नेति वृत्तेरिति अव्याप्त्यनवकाशादित्यग्रेन्वय: संयोगिसत्त्वादित्यादावतिव्याप्तिवारणमिदमीयस्य फलमन्यथाकुरुते गुणादीति द्रव्यत्वत्वं
टतं मूलोक्तेयथ... ...द्रव्यसमवेतत्वं तच्च न समवायसंबन्धेनाभावस्यप्रतियोगितावच्छेदकं लाघवेन द्रव्यान्यासमवेतत्वस्यैकत्वादित्यतस्तथैवाह।
ननूक्तज्ञानस्य विरोधित्वात्तादृशप्र... ...द्धेरिति। अतिव्याप्त्यनवकाशादिति योजना धूमवानिति संयोगेन द्रव्याणामव्याप्यवृत्तितया धूमत्वावच्छिन्नाभाववत्यपि धूम
तथाविधेति। कंबुग्रीवादिमत्त्वाश्रयेत्यर्थ: त... ...भावप्रतियोगितावच्छेदकं यद्योगोलकासंयुक्तत्वं धूमत्वविशिष्टस्य तदवच्छिन्नाभाववद्वृत्तित्वादेव नातिव्याप्तिर
दुद्यप्रसंग इति भाव: ननु तथाविधयत्किंचिद्या... ...यधिकरण्यप्रवेशमूलोक्तहेतुसमानाधिकरणाभावेपि तदवश्यमन्यथा हेतुमन्निष्ठाभावप्रतियोगितावच्छेदक
ह। अतएवेति गुरुधर्मस्यावच्छेदकत्वादेवेत्यर्थ: नप्रमा... ...च्छिन्नस्याधिकरणे गुणादौ संयोगत्वादिविशिष्टस्यावृत्ते: संयोगीद्रव्यत्वादित्यादावव्याप्तिरिति भाव: ला
प्रमाणत्वं त्वन्मते च कंबुग्रीवादिमत्त्वप्रतियोगिकाभावमून्य... ...योरित्यर्थ:। तथा च हेतुमन्निष्ठाभावीययद्यत्संबंधावच्छिन्नप्रतियोगितावच्छेदकीभूतयत्किंचिद्
...विशिष्टसामान्यकत्वं प्रथमस्य गुरुत्वविशिष्टसम्बंधिनिष्ठाभावीययत्सम्बन्धावच्छिन्नप्रतियोगि

Nepal Sanskrit University, Balmeeki-Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

जा॰अ॰ गिनावच्छेदकावच्छिन्नप्रतियोगिकत्वोभयाभावस्तादृशप्रति [illegible] योगितावच्छेदकत्वमर्थः तत्तत्संबन्धावच्छिन्नपर्य्यवसन्नस्यैकसम्बन्धावच्छिन्नत्वस्या
७ ईन्हिमत्त्वपक्षेऽपि वप्रतियोगिताधर्मिकोभयाभावगर्भनिरुक्त [illegible] न्यान्तरप्रवेशगौरवात्तदपेक्ष्य लाघवाच्चाह। विशेषणतेति अभावीयविशेषणताया लक्षणघटकत्व
बन्महाकालानुयोगिकत्वयोः सत्वादिति चेदेतद्दस्तरसेनै [illegible] त्वमभिप्रेत्याह। तदन्यत्वप्रकारेति। साध्यवत्वस्यावश्योपस्थितिकतया तद्घटितधर्मस्योपस्थितिलाघवा
कृतसाध्यवन्निष्ठाभावप्रतियोगितायां यद्धूमाव [illegible] ध्यवत्वेति। नन्वेवं विशेषणताविशेषावच्छिन्नप्रतियोगितासामान्ये यद्धूमविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगिता
न्निष्ठाभावप्रतियोगितासामान्येऽपि तादृशोभ [illegible] दकसम्बन्धावच्छिन्नत्वोभयाभावः साध्यतावच्छेदकसम्बन्धेन तद्धूमावच्छिन्नो हेतुर्व्यापक इत्युक्तक्रमेण तृतीयार्थः
त्वोभयाभाववत्वं तद्वप्रतियोग्यनधि [illegible] प्रतियोगितासामान्य एव साध्यतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्नत्वाभावेन तादृशोभयाभावसत्वात् धूमवान्वन्हेरि
[illegible] भावप्रतियोगितायां विशेषणताविशेषावच्छिन्नत्वं न देयमिति वाच्यं वन्हिमत्वप्रकारकप्रमाविशेष्यत्वादीनां संयोगादिसंबंधेनाभाव
स्य [illegible] सत्वेन वन्हिमान् धूमादित्यादौ सर्वत्रैवाव्याप्तिप्रसंगादित्यतः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वांशपरित्यागेन तृतीयस्यार्थे निःकृष्य दर्शयति तथा चेत्या
दिना। यद्धूमेति। यत्पदं साध्यतावच्छेदकपरं। तत्सम्बन्धावच्छिन्नेति। विशेषणताविशेषावच्छिन्नेत्यर्थः अत्र प्रतिपदव्यावृत्तिरुक्तदिशा बोध्या नच निरुक्तप्रतियोगिता
सामान्ये यद्धूमविशिष्टसम्बन्धिनिष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितावच्छेदकावच्छेद्यत्वं साधने तद्धूमावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्याप्ति
रुचितेति वाच्यं सामान्यपदस्य व्यापकतावाचित्वेन निरुक्तप्रतियोगितात्वव्यापकावच्छेदकं यद्धूमावच्छिन्नवन्निष्ठविशेषणताविशेषावच्छिन्नाभावप्रतियोगिताव
च्छेदकावच्छेद्यता — त्वमित्यर्थपर्यवसानेन प्रमेयधूमवान्वन्हेरित्यादावतिव्याप्त्यापत्तेः प्रमेयधूमवन्निष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यत्वस्य गुरुधर्मतया वन्हि व॰
न्निष्ठाभावप्रतियोगितात्ववन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेन तादृशप्रतियोगितात्वव्यापकतावच्छेदकत्वात्। अस्माकं तु प्रमेयधूमत्वावच्छिन्नवन्निष्ठाभावप्र
तियोगितानवच्छेदकं यद्यः पिण्डभेदत्वं तदवच्छेद्यत्वाभावस्यैव साधनवन्निष्ठाभावप्रतियोगितात्वव्यापकत्वाभावेनातिव्याप्त्यभावात् एतेन साधनसमानाधिकरणा
भावसामान्ये यद्धूमावच्छिन्नसमानाधिकरणाभावत्वं तादृशाभावप्रतियोगितासामान्ये वा यद्धूमावच्छिन्नसमानाधिकरणाभावप्रतियोगितात्वं साधने तद्धूमावच्छिन्नसा
मानाधिकरण्यं व्याप्तिर्लाघवादित्यपि प्रत्युक्तमिति ध्येयं साध्यसाधनभेदेन व्याप्तेर्भिन्नतया प्रमेयवन्हित्वादिना गुरुधर्मेण साध्यतास्थले एव साध्यतावच्छेदकावच्छेद्य राम
त्वाप्रसिद्ध्या प्रोक्तक्रमेण व्याप्तिर्वाच्या वन्हिमान्धूमादित्यादौ तु लघुक्रमेण साध्यतास्थले हेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्व यद्धूमावच्छिन्न ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वोभयाभावघटितैवसावक्तव्याशब्देक्यस्या किंचित्करत्वादित्याह। यत्रसद्धेतुविशेषइति नव्यमतमुपन्यस्यति गौरवेति यादृशप्रतीत्यागुरोरवच्छेदकत्वप्रसिद्धिः ता
दृशबुद्धौगौरवज्ञानस्ययदिविरोधित्वंस्यात्तदामानाभावाद्गुरोरवच्छेदकत्वंनस्यात् नचैतदस्तीतिभावः यद्यपिगौरवज्ञानमात्रंनावच्छेदकत्वधीप्रतिबंधकंविशिष्ट
सत्तात्वस्यद्रव्यत्वत्वापेक्षयागुरुत्वग्रहेपिविशिष्टसत्तानास्तीतिप्रतीत्यातदवच्छेदकत्वग्रहस्यप्राचीनैःस्वीकृतत्वात् नचतद्धर्मसमानाधिकरणधर्मेधर्मिकस्तदपेक्ष
यालघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबंधकः नीलधूमत्वसमानाधिकरणधूमत्वेतदपेक्षयालघुत्वग्रहेपिनीलधूमोनास्तीतिप्रतीत्यानीलधूमत्वस्यावच्छेदक
त्वावगाहनस्यसर्वसंमतत्वात् नापितद्धर्मसमनियतधर्मधर्मिकएवतद्धर्मापेक्षयालघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबंधकइतिसांप्रतं घटज्ञानत्वापेक्ष
यालघुनोपिज्ञानत्वस्यघटज्ञानत्वसमनियतत्वाभावाद्गुरुणोपिघटज्ञानत्वस्यसंयोगसम्बन्धावच्छिन्नघटज्ञानाभावस्यप्रतियोगितावच्छेदकत्वापत्तेः तथापिसंस
र्गमर्यादयाप्रतियोगितावच्छेदकत्वग्रहंप्रतितादात्म्येनकंबुग्रीवादिमत्वरूपगुरुधर्मः प्रतिबंधकइतिनकदाचिदपितेष्ववच्छेदकत्वग्रहइतिप्राचांतात्पर्यंवस्तुतः सं
सर्गमर्यादयाकंबुग्रीवादिमत्वावच्छेद्यप्रतियोगिताकत्वावगाहिज्ञानसमानविशेष्यत्वप्रत्यासत्त्याकंबुग्रीवादिमत्वापेक्षयालघुधर्मावच्छिन्नप्रतियोगिताकत्व
ज्ञानत्वेनैवप्रतिबंधकत्वं प्राचामभिप्रेतं तथाचजलादौनिर्वन्हित्वस्याग्रहदशायांवन्हिभ्रमस्यैवतदुक्तक्रमेणगौरवस्याग्रहदशायामपिकंबुग्रीवादिमत्वावच्छि
न्नप्रतियोगिताकत्वेनतादृशग्रहोजायतएव अन्यथाकंबुग्रीवादिमान्नास्तीतिधियोः वाधनिश्चयविधयाविशिष्टधीविरोधित्वानुपपत्तेः कंबुग्रीवादिमत्वावच्छिन्न
स्यविशिष्टबुद्धौतदवच्छिन्नप्रतियोगिताकत्वेनाभावनिश्चयस्यविरोधित्वादितिध्येयम्। प्रतीतेर्वलमवच्छेदकत्वावगाहित्वंगुरुरूपेपीति तथाचस्वरूपावच्छेदकत्वय
दितंमूलोक्तंयथाश्रुतमेवलक्षणंसम्यक्प्रमेयधूमत्वादेस्तादृशावच्छेदकत्वेनव्यभिचारिण्यतिव्याप्तिविरहादितिकृतंपारिभाषिका वच्छेदकत्वनिर्वचनेनेतिभावः।
ननूक्तज्ञानस्यविरोधितात्तादृशप्रतीत्यावच्छेदकत्वंनावगाह्यते परंतुकंबुग्रीवादिमन्निष्ठप्रतियोगिताकाभावमात्रंमित्याशंक्यनिषेधयति। नचेति। अवलम्बनंविषयः
तथाविधेति। कंबुग्रीवादिमत्वाश्रयेत्यर्थः तादृशप्रतीतेः कंबुग्रीवादिमान्नास्तीत्याकारकप्रतीतेः अनुदयादिति तथाचत्वन्मतेकंबुग्रीवादिमदंतरस्याभावमादायत
दुदयप्रसंगइतिभावः ननुतथाविधयत्किंचिद्व्यक्तिनिर्णयेसएवप्रतिबंधकः अन्यथाविशेषादर्शनदशायांतत्रापिकंबुग्रीवादिमान्नास्तीतिप्रतीतिर्जायतएवतत्रेत्यतआ
ह। अतएवेति गुरुधर्मस्यावच्छेदकत्वादेवेत्यर्थः नप्रमाणमितिकंबुग्रीवादिमत्वावच्छिन्नाभावप्रकारत्वेनतादृशान्वयबोधोभ्रमइतितादृशशब्दस्यभ्रमजनकत्वेना
प्रमाणत्वं त्वन्मतेचकंबुग्रीवादिमत्वतियोगिकाभावशून्यतायाघटेवत्सभावात् तादृशप्रतीतेर्नभ्रमत्वमितितादृशशब्दोप्यप्रमाणंनस्यादित्यर्थः ननुभ्रमत्वस्यप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा·अ· कारभेदेन भिन्नत्वात्सर्वत्र तदभाववद्विशेष्यकत्वं न भ्रमत्वं घटकं समवायेन गगनादिभ्रमेणातन्निवेशवैयर्थ्यात्। तथा च तत्रैव प्रकृतेपि कंबुग्रीवादिमत्प्रतियोगिकाभावप्रका
१ रतामात्रेण तादृशान्वयबोधोभ्रमो भविष्यतीत्याह प्रमाणं चेति। तथा च तत्रापि कंबुग्रीवादिमान्नास्तीतिशब्दः प्रमाणं न स्यादित्यकामेनापि प्रकृते भ्रमत्वं तदभाववद्विशेष्य
कत्वघटितं वाच्यमिति भावः धूमो न वह्निव्याप्य इत्यादेर्वह्निव्याप्त्यभावकूटार्थकत्ववत् कंबुग्रीवादिमान्नास्तीत्यादावपि कंबुग्रीवादिमत्प्रतियोगिकाभावकूटबोधकत्वा
९ देव तादृशशब्दस्याप्रामाण्याद्युपपत्तिरन्यथा धूमालोकसाधारणानुगतव्याप्तेरभावादालोकगर्भव्याप्तित्वावच्छिन्नाभावस्य धूमे सत्त्वात्तन्मादाय धूमो न वह्निव्याप्य
इति वाक्यस्याप्रामाण्यापत्तेः एवं गुरुधर्मस्यानवच्छेदकतया तादृशधर्मावच्छिन्नविशिष्टबुद्धिं प्रति तादृशधर्माश्रयप्रतियोगिकाभावकूटवत्तानिश्चयत्वेनैवानन्यग
त्याविरोधित्वकल्पनात् कंबुग्रीवादिमान्नास्तीतिदशायां कंबुग्रीवादिमदस्तीतिज्ञानविरोधोपि घटत इति प्राचीनमतनिर्भरः अतो गुरुधर्मस्यानवच्छेदकत्वे व्याप्तेरपि
दुर्वचत्वमित्याह नचेदेवमिति लघ्विति द्रव्यं गुणाद्विशिष्टसत्ता ह्याद्इत्यादौ द्रव्यत्वसमनियतानां गुणत्वविशिष्टसत्तादीनामित्यर्थः अव्याप्तिमुपपादयति। गुणादीति। ननु
हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वव्यक्तीनां तत्तद्व्यक्तित्वेनाभावकूटवत्त्वमेव साध्यतावच्छेदकांशे निवेश्यमतो नोक्तदोषात आह। तत्त्वेति यद्यपि गुरोरवच्छेदकत्व
पक्षेपि स्वस्वप्रतियोगिव्यधिकरणाभावघटितव्याप्तेस्तत्प्रतियोगितागर्भत्वेन दुर्ज्ञेयत्वं। तथापि व्याप्यवृत्तिसाध्यकस्थलीयव्याप्तेरभिप्रायेणेदं तत्र प्रतियोगिवैयधिकरण्या
प्रवेशात् निरवच्छिन्नहेत्वधिकरणवृत्तिकाभावप्रतियोगितानवच्छेदकत्वमेव सर्वत्र व्याप्तिप्रविष्टमित्याशयेनेदमिति तु परमार्थः तेनाव्याप्यवृत्तिसाध्यकस्थलेपि व्याप्ते
र्न ज्ञेयत्वमिति ध्येयं। द्रव्यत्वत्वेति द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षया द्रव्यत्वत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुतया तदवच्छिन्नाभावाप्र
सिद्धेरिति भावः। ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतयत्किंचिद्धर्मावच्छिन्नाभाववत्सर्वप्रस्वविशिष्टसामान्यकभिन्नत्वं स्वविशिष्टसंबंधिनिष्ठाभावीयप्रति
योगितावच्छेदकीभूततादृशधर्मावच्छिन्नसंयत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र वा दुर्ज्ञेयत्वाभावात्तथैव व्याप्तिर्वाच्येत्यत आह उपदर्शितेति
स्वत्वादित्यादिना व्यापकतापर्यवसन्नत्वस्य तत्तदवच्छेदकत्वाभावगर्भसामान्यत्वस्योपग्रहः अत एव गुरोरवच्छेदकत्वादेवसंगच्छत इति अन्यथा ग्राह्यगंधत्वापेक्षया गुरुत्वेन घ्राण
ग्राह्यगुणत्वावच्छिन्नाभावाप्रसिद्ध्यान्द्वृत्तिकत्वं व्यभिचरितत्वं तत्र न स्यादिति भावः यद्यपि साध्यव्यापकतावच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वमेव व्यभिचारः स च घ्राण
गंधत्वावच्छिन्नाभाववद्वृत्तित्वेनैव तत्र सुलभ इत्यपि शक्यते वक्तुं तथापि तद्धेतुः प्रकृतसाध्यानुमितिविरोधितया हेत्वाभा सतां न स्यात् पद्विषयकत्वेन यादृशानुमानविरो राम·
धित्वं तस्यैव तत्र तथात्वादिति भावः॥:॥ इति श्रीजगदीशविरचिताऽवच्छेदकत्वनिरुक्तिः समाप्तिमगमत्॥ मितिफाल्गुणकृष्णषष्ठीमंदवासरे सम्वत् १९३०॥ श्रीरामचंद्र॥ १

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥इतिजागदीश्यवच्छेदकत्वनिरुक्तिःसमाप्तिमबिभ्रत्॥